उत्तर प्रदेश राजर्षि टण्डन मुक्त
विश्वविद्यालय, इलाहाबाद

**MAST-01**
# वैदिक वाङ्मय

## खण्ड

# 1

## वैदिक सूक्त ( भाग-2 )


इकाई - 4 5

इन्द्र 4.1, सवितृ 4.2, मरुत् 4.3

इकाई - 5 41

अश्विन् , विश्वामित्रनदी संवाद 5.1

अग्नि 5.2, अक्ष 5.3

इकाई - 6 98

अथर्ववेदीय सूक्त : राष्ट्राभिवर्धन 6.1,

पृथिवीसूक्त 6.2 ( 1.10 मन्त्र मात्र )

# खण्ड-एक वैदिक सूक्त

प्रथम खण्ड के दो भाग हैं। इनमें छह इकाईयाँ हैं। प्रथम इकाई में ऋग्वेद का सामान्य परिचय, द्वितीय इकाई में देवताओं का सामान्य परिचय तथा तृतीय इकाई में वैदिक व्याकरण का विवेचन है। चतुर्थ इकाई में इन्द्र, सवितृ तथा मरुत सूक्त का वर्णन किया गया है। पञ्चम इकाई में विश्वामित्र नदी संवाद, अग्नि सूक्त तथा अक्ष सूक्तों की व्याख्या की गई हैं। इकाई छह में अथर्ववेदीय सूक्त राष्ट्राभिवर्धनम् तथा पृथिवी सूक्त का वर्णन है।

# इकाई -४ इन्द्र, सवितृ तथा मरुत सूक्त

## इकाई की रूपरेखा

४.० उद्देश्य

४.१ इन्द्रसूक्त

४.२ सवितृसूक्त

४.३ मरूत्सूक्त

## ४.० उद्देश्य

इस यूनिट में निम्नलिखित सूक्तों के मन्त्रों की व्याख्या से परिचित कराया जायेगा।

## ४.१ इन्द्रसूक्तम्

**वेद-ऋग्वेद** **मण्डल संख्या-१** **सूक्त संख्या-३२**

**ऋषि-हिरण्यस्तूप** **देवता-इन्द्र** **छन्द-त्रिष्टुप्**

**इन्द्रस्य नु वीर्याणि प्र वोचं**
**यानि चकार प्रथमानि वज्री ।**
**अहन्नहिमन्वपस्ततर्द**
**प्र वक्षणा अभिनत्पर्वतानाम् ॥१॥**

**पदपाठ—** इन्द्रस्य । नु । वीर्याणि । प्र । वोचम् । यानि । चकार । प्रथ-मानि । वज्री ॥ अहन् । अहिम् । अनु । अपः । ततर्द । प्र । वक्षणाः । अभि-नत् । पर्वतानाम् ॥

**सा०भा०—** वज्री वज्रयुक्तः इन्द्रः प्रथमानि पूर्वसिद्धानि मुख्यानि यानि वीर्याणि पराक्रमयुक्तानि कर्माणि चकार तस्य इन्द्रस्य तानि वीर्याणि नु क्षिप्रं प्रब्रवीमि । कानि वीर्याणीति तदुच्यते । अहिं मेघम् अहन् हतवान् । तदेतदेकं वीर्यम् । अनु पश्चात् अपः जलानि ततर्द हिंसितवान् भूमौ पातितवानित्यर्थः । इदं द्वितीयं वीर्यम् । पर्वतानां संबन्धिनीः वक्षणाः प्रवहणशीलाः नदीः प्र अभिनत् भिन्नवान् कूलद्वयकर्षणेन प्रवाहितवानित्यर्थः । इदं तृतीयं वीर्यम् । एवमुत्तरत्रापि द्रष्टव्यम् ॥ वीर्याणि । 'शूरवीर विक्रान्तौ' । ण्यन्तात् 'अचो यत्' इति यत् । 'णेरनिटि' इति णिलोपः । 'तित्स्वरितम्' इति स्वरितत्वम् । 'यतोऽनावः' इत्याद्युदात्तत्वं न भवति । आद्युदात्तत्वे हि सुशब्देन बहुव्रीहौ 'आद्युदात्तं द्व्यच्छन्दसि' इत्यनेनैवोत्तरपदाद्युदात्तत्वस्य सिद्धत्वात् 'वीर-वीर्यौ च' इति पुनस्तद्विधानमनर्थकं स्यात् । अतोऽवगम्यते 'यतोऽनावः' इत्याद्युदात्तत्वं वीरशब्दे न प्रवर्तते इति । अतः परिशेषात् 'तित्स्वरितम्' इति प्रत्ययस्य स्वरित-त्वमेव । वोचम् । 'अस्यतिवक्तिख्यातिभ्योऽङ्' इति च्लेः अङादेशः । 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः । चकार । णलि लित्स्वरेण प्रत्ययात् पूर्वस्योदात्तत्वम् । यद्वृत्तयोगादनिघातः । अहन् । लङि 'इतश्च' इति इकारलोप 'हल्ङ्याब्भ्यः०' इति तकारलोपः । अहिम् । आङ्पूर्वात् हन्तेः 'आङि श्रिहनिभ्यां ह्रस्वश्च' (उ०सू० ४.५७७) इति इण्प्रत्ययः, आङो ह्रस्वत्वं च । चशब्देन 'वेञो डित् समाने ख्यश्चोदात्तः' इत डित्वं पूर्वपदोदात्तत्वं चानुकृष्यते । ततः टिलोपे पूर्वपदस्योदात्तत्वम् । ततर्द । 'उतृदिर् हिंसानादरयोः' । 'तिङ्ङतिङः' इति निघातः । वक्षणाः । 'वक्ष रोषे' । 'क्रुधमण्डार्थेभ्यश्च' (पा०सू० ३.२.१५१) इति युच् । चित्स्वरं

जघान ॥ वृष्णः । वध्रिः । प्रतिऽमानम् । बुभूषन् । पुरुऽत्रा । वृत्रः । अशयत् । विऽअस्तः ॥

**सा० भा०**— अपात् वज्रेण च्छिन्नत्वात् पादरहितः अहस्तः हस्तरहितः वृत्रः इन्द्रम् उद्दिश्य अपृतन्यत् पृतनां युद्धम् ऐच्छत् । द्वेषाधिक्येन बहुधा विद्धोऽपि युद्धं न परित्यक्तवानित्यर्थः । अस्य हस्तपादहीनस्य वृत्रस्य सानौ पर्वतसानुसदृशे प्रौढस्कन्धे अधि उपरि वज्रम् आ जघान इन्द्रः आभिमुख्येन प्रक्षिप्तवान् । अशक्तस्यापि युद्धेच्छायां दृष्टान्तः । वध्रिः छिन्नमुष्कः पुरुषः वृष्णः रेतःसेचनसमर्थस्य पुरुषान्तरस्य प्रतिमानं सादृश्यं बुभूषन् प्राप्तुमिच्छन् यथा न शक्नोति तद्वदयमिति शेषः । सः वृत्रः पुरुत्रा बहुष्ववयवेषु व्यस्तः विविधं क्षिप्तः ताडितः सन् अशयत् भूमौ पतितवान् ॥ अपात् । बहुव्रीहौ पादशब्दस्य अन्त्यलोपश्छान्दसः । अहस्तः । बहुव्रीहौ 'नञ्सुभ्याम्' इत्यु-त्तरपदान्तोदात्तत्वम् । अपृतन्यत् । 'सुप आत्मनः क्यच्' । 'कव्यध्वरपृतनस्य०' इति अन्त्यलोपः । बुभूषन् । 'सनि ग्रहगुहोश्च' (पा०सू० ७.२.१२) इति इट्प्रतिषेधः । पुरुत्रा । 'देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्' (पा०सू० ५.४.५६) इति सप्तम्यर्थे त्राप्रत्ययः । अशयत् । व्यत्ययेन परस्मैपदम् । 'बहुलं छन्दसि' इति शपो लुगभावः । व्यस्तः । 'असु क्षेपणे' इत्यस्मात् कर्मणि क्तः । 'यस्य विभाषा' इति इट्प्रतिषेधः । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । संहितायाम् 'उदात्तस्वरितयोर्यणः०' इति परस्यानुदात्तस्य स्वरितत्वम् ॥

**अन्वय**— अपात् अहस्तः इन्द्रम् अपृतन्यत् । अस्य सानौ अधि वज्रम् आ जघान । वृष्णः प्रतिमानं बुभूषन् वध्रिः वृत्रः पुरुत्रा व्यस्तः अशयत् ।

**पदार्थ**— अपात् = पैरों से रहित । अहस्तः = हाथों से रहित । इन्द्रम् = इन्द्र के प्रति । अपृतन्यत् = युद्ध की इच्छा की । अस्य = इस वृत्र के । सानौ = पर्वत शिखर के समान कन्धे पर । अधि = ऊपर । वज्रम् = वज्र को । जघान = प्रहार किया । वृष्णः = साँड, शक्तिशाली । प्रतिमानम् = सादृश्य को, समानता को । बुभूषन् = प्राप्त करना चाहता हुआ, होने की इच्छा करता हुआ । वध्रिः = वधिया किया हुआ, नपुंसक । वृत्रः = वृत्र । पुरुत्रा = अनेक अङ्गों में, कई स्थानों पर । व्यस्तः = क्षतविक्षत होकर, विखरे अंग वाला होकर । अशयत् = गिर गया, सो गया, पड़ गया ।

**अनुवाद**— (वज्र से) पैरों तथा हाथों से रहित हो जाने पर भी वृत्र ने इन्द्र के प्रति युद्ध करने की इच्छा की । (इन्द्र ने) इस वृत्र के पर्वत शिखर के समान (मजबूत) कन्धे पर सामने आकर प्रहार किया । साँड के सादृश्य को प्राप्त करना चाहते हुए बधिया बैल के समान वह वृत्र अनेक अङ्गों में क्षत-विक्षत होकर भूमि पर सो गया (गिर गया) ।

**व्याकरण**—

१. अपात् – न पादौ यस्य सः (बहुव्रीहि), पाद के अन्तिम वर्ण का छान्दस् लोप ।

२. अहस्तः – न हस्तौ यस्य सः (बहुव्रीहि) ।

३. अपृतन्यत् – पृतना + क्यच् = पृतन्य = √पृतन्य, युद्ध की इच्छा करना, लङ् प्रथमपुरुष एकवचन ।

४. प्रतिमानम् – प्रति + √मा + (अन) = प्रतिमान ।

५. बुभूषन् – भवितुम् इच्छति अर्थ में सन् प्रत्यय = बुभूष + सन् । प्रथमा विभक्ति, एकवचन ।

६. पुरुत्रा – √पुरु (बहुत), अर्थ में सप्तमी विभक्ति के अर्थ में त्रा प्रत्यय ।

७. अशयत् – √शी (सोना), लङ्, प्रथमपुरुष, एकवचन ।

८. जघान – √हन् (मारना), लिट्, प्रथमपुरुष, एकवचन ।

**विशेष**—

१. पीटर्सन ने अपृतन्यत् का अर्थ किया है– युद्ध । उसके अनुसार सानौ का अर्थ है On his back अर्थात् उसकी पीठ पर ।

२. इस मन्त्र में वृत्र की उपमा बधिया बैल से तथा इन्द्र की उपमा साँड से दी गयी है जिस प्रकार बधिया बैल साँड से लड़कर पराजित होता है, उसी प्रकार वृत्र इन्द्र से लड़कर पराजित हुआ ।



नदं न भिन्नममुया शयानं

**मनो रुहाणा अति यन्त्यापः ।**

**याश्चिद्वृत्रो महिना पर्यतिष्ठ-**

**त्तासामहिः पत्सुतःशीर्बभूव ॥८॥**

**पदपाठ**— नदम् । न । भिन्नम् । अमुया । शयानम् । मनः । रुहाणाः । अति । यन्ति । आपः ॥ याः । चित् । वृत्रः । महिना । परिऽअतिष्ठत् । तासाम् । अहिः । पत्सुतःऽशीः । बभूव ॥

**सा०भा०**— अमुया अमुष्यां पृथिव्यां शयानं पतितं मृतं वृत्रम् आपः जलानि यन्ति अतिक्रम्य गच्छन्ति । तत्र दृष्टान्तः । भिन्नं बहुधा भिन्नकूलं नदं न सिन्धुमिव । यथा वृष्टिकाले प्रभूता आपो नद्याः कूलं भित्त्वा अतिक्रम्य गच्छन्ति तद्वत् । कीदृश्य आपः । मनो रुहाणाः नृणां चित्तमारोहन्त्यः । पुरा वृत्रे जीवति सति तेन निरुद्धा मेघस्थिता आपो भूमौ वृष्टा न भवन्ति तदानीं नृणां मनः खिद्यते । मृते तु वृत्रे विरोधरहिता आपो वृत्रशरीरमुल्लङ्घ्य प्रवहन्ति । तदा वृष्टिलाभेन मनुष्यास्तुष्यन्तीत्यर्थः । तदेतदु-त्तरार्धेन स्पष्टीक्रियते । वृत्रः जीवनदशायां महिना स्वकीयेन महिम्ना याश्चित् या एव मेघगताः अपः पर्यतिष्ठत् परिवृत्य स्थितवान्, अहिः वृत्रो मेघः तासाम् अपां पत्सुतःशीः पादस्याधःशयानः बभूव । यद्यप्यपां पादो नास्ति तथाप्यद्भिर्वृत्रस्य अभिलङ्घितत्वात् पादस्याधः शयनमुपपद्यते ॥ भिन्नम् । 'रदाभ्यां निष्ठातो नः०' (पा०सू० ८.२.४२) इति नत्वम् । अमुया । 'सुपां सुलुक्' इति सप्तम्या याजादेशः । शयानम् । 'शीङः सार्वधातुके गुणः' (पा०सू० ७.४.४१) । धातोर्ङित्त्वात् । लसार्वधातुकानुदात्तत्वे धातु-स्वरः । रुहाणाः 'रुह बीजजन्मनि प्रादुर्भावे' । व्यत्ययेन शानच् । कर्तरि शपि प्राप्ते व्यत्ययेन शः । 'अनित्यमागमशासनम्' इति वचनात् मुगभावः । अदुपदेशात् लसार्व-धातुकानुदात्तत्वे विकरणस्वरे प्राप्ते व्यत्ययेन धातुस्वरः । महिना । पूजायाम्' 'इन्सर्व-धातुभ्यः' इति इन्प्रत्ययः । व्यत्ययेन विभक्तेरुदात्तत्वम् । यद्वा । महिना महिम्ना । महच्छब्दस्य पृथ्वादिषु पाठात् 'तस्य भावः०' इत्येतस्मिन्नर्थे 'पृथ्वादिभ्य इमनिज्वा' (पा०सू० ५.१.१२२) इति इमनिच् प्रत्ययः । 'टेः' इति टिलोपः । 'चितः' इत्यन्तोदा-त्तत्वम् । तृतीयैकवचने अल्लोपे सति उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वम्। मकारलोपश्छान्दसः । पत्सुतःशीः । पादस्याधः शेते इति पत्सुतःशीः । 'क्विप् च' इति क्विप् । तसि 'पद्दन्०' इत्यादिना पादाशब्दस्य पदादेशः । 'शस्प्रभृतिषु' इति प्रभृतिशब्दः प्रकार-वचनः इति शलोदोषणी इत्यत्रापि दोषन्नादेशो भवति इत्युक्तत्वात् (का० ६.१.६३) मध्ये सु इति शब्दोपजनश्छान्दसः । यद्वा । पादशब्दस्य सप्तमी बहुवचने पदादेशे कृते 'इतराभ्योऽपि दृश्यन्ते' (पा०सू० ५.३.१४) इति सप्तम्यर्थे तसिल् । लुगभावश्छान्दसः ॥

**अन्वय**— मनः रुहाणाः आपः भिन्नं नदं न अमुया शयानं अति यन्ति । वृत्रः महिना याश्चित् पर्यतिष्ठत्, अहिः तासां पत्सुतःशीः बभूव ।

**पदार्थ**— मनः = मन को । रुहाणाः = प्रसन्न करने वाले, आकर्षित करते हुए । आपः = जल । भिन्नम् = कई भागों में कटे हुए, (टूटे) किनारों वाली । नदम् = नदी (के) । न = समान । अमुया = इस (पृथिवी) पर । शयानम् = सोये हुए, मृत पड़े हुए (वृत्र) को । अति यन्ति = अतिक्रान्त करके जाते हैं, पार करके बह रहा है । वृत्रः = वृत्र । महिना = (अपनी) महिमा से, पराक्रम से । याश्चित् = जो । पर्यतिष्ठत् = रोके हुए था, चारों तरफ से घेरे हुए था । अहिः = मेघ, राक्षस । तासाम् = उनका, उन्हीं के । पत्सुतःशीः = पैरों के नीचे पड़ा हुआ । बभूव = हो गया ।

**अनुवाद**— मन को प्रसन्न (आकर्षित) करने वाला जल कई भागों में कटे हुए (टूटे) किनारों वाली नदी के समान इस (पृथिवी) पर सोये हुए (मृत पड़े हुए) (वृत्र) को, अतिक्रान्त करके (पार करके) वह रहा है । वृत्र (अपनी) महिमा (पराक्रम) से जिस (जल) को चारों ओर से घेरे हुए था, वही राक्षस उन्हीं (जलों) के पैरों के नीचे पड़ा हुआ (सोया हुआ) हो गया ।

**व्याकरण**—

१. भिन्नम् - √भिद् + क्त । निष्ठा के त को न आदेश ।

अन्धकार (मृत्यु) में पड़ा है।

**व्याकरण—**

१. अतिष्ठन्तीनाम् – √स्था + शतृ + ङीप् = तिष्ठन्ती, न + तिष्ठन्ती = अतिष्ठन्ती। षष्ठी विभक्ति, बहुवचन।

२. अनिवेशनानाम् – नि + √विश् + ल्युट् (अन) = निवेशन, न निवेशन = अनिवेशन, षष्ठी, बहुवचन।

३. निहितम् – नि + √धा +क्त = निहितम्।

४. काष्ठानाम् – क्रान्त्वा स्थिता अर्थ में क्रम + √स्था + क्विप् = काष्ठा।

**दासपत्नीरहिगोपा अतिष्ठ-**
**न्निरुद्धा आपः पणिनेव गावः।**
**अपां बिलमपिहितं यदासी-**
**द्वृत्रं जघन्वाँ अप तद्ववार ॥११॥**

**पदपाठ—** **दासऽपत्नीः। अहिंऽगोपाः। अतिष्ठन्। निऽरुद्धाः। आपः। पणिनाऽइव। गावः। अपाम्। बिलम्। अपिऽहितम्। यत्। आसीत्। वृत्रम्। जघन्वान्। अप। तत्। ववार ॥**

**सा॰भा॰—** दासपत्नीः दासः विश्वोपक्षपणहेतुः वृत्रः पतिः स्वामी यासाम् अपां ताः दासपत्नीः। अत एव अहिगोपाः। अहिर्वृत्रो गोपा रक्षको यासां ताः। गोपनं नाम स्वच्छन्देन यथा न प्रवहन्ति तथा निरोधनम्। एतदेव स्पष्टीक्रियते। आपः निरुद्धाः अतिष्ठन् इति। तत्र दृष्टान्तः। पणिनेव गावः। पणिनामकोऽसुरो गा अपहृत्य बिले स्थापयित्वा बिलद्वारमाच्छाद्य यथा निरुद्धवांस्तथेत्यर्थः। अपां यत् बिलं प्रवहणद्वारम् अपिहितं वृत्रेण निरुद्धम् आसीत् तत् बिलं प्रवहणद्वारं वृत्रं जघन्वान्, हतवान् इन्द्रः अप ववार अपवृतमकरोत् वृत्रकृतमपां निरोधं परिहृतवान्। अत्र यास्कः— 'दास-पत्नीर्दासाधिपत्न्यो दासो दस्यतेरुपदासयति कर्माण्यहिगोपा अतिष्ठन्नहिना गुप्ताः। अहिरयनादेत्यन्तरिक्षेऽयमपीतरोऽहिरेतस्मादेव निर्ह्सितोपसर्ग आहन्तीति। निरुद्धा आपः पणिनेव गावः। पणिर्वणिग्भवति पणिः पणनाद्वणिक् पण्यं नेनेक्ति। अपां बिलमपिहितं यदासीत्। बिलं भरं भवति बिभर्तेर्वृत्रं जघ्निवानपववार तद्वृत्रो वर्ततेर्वा वर्धतेर्वा। यदवृणोत्तद्वृत्रस्य वृत्रत्वमिति विज्ञायते। यदवर्तत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते। यदवर्धत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते' (निरु॰ २.१७) इति॥ दासपत्नीः। 'दसु उपक्षये'। दासयतीति दासो वृत्रः। पचाद्यच्। 'चतः' इत्यन्तोदात्तत्वम्। दासः पति-र्यासाम्। 'विभाषा सपूर्वस्य' (पा॰सू॰ ४.१.३४) इति ङीप्; तत्सन्नियोगेन इकारस्य नकारः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। यद्वा दासस्य पालयित्र्यः। 'पत्यावैश्वर्ये' इति पूर्वपदप्रकृतिस्वरत्वम्। अहिगोपाः। 'गुपू रक्षणे'। गोपायतीति गोपाः। 'आयादय आर्धधातुके वा' (पा॰सू॰ ३.१.३१) इति आयप्रत्ययः। ततः क्विप्। 'अतो लोपः'। 'वेरपृक्तलो पाद्वलिलोपो बलीयान्' इति पूर्वं यकार लोपः (पा॰सू॰ ६.१.६६-६७)। न च 'अचः परस्मिन्॰' इति अतो लोपस्य स्थानिवत्त्वं 'न पदान्तद्विर्वचन॰' इति प्रतिषेधात्। अहिर्गोपा यासाम्। पूर्ववत् स्वरः। निरुद्धाः। 'रुधिर् आवरणे'। 'झष-स्तथोर्धोऽधः' (पा॰सू॰ ८.२.४०) इति निष्ठातकारस्य धकारः। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। जघन्वान्। हन्तेर्लिटः क्वसुः। 'अभ्यासाच्च' (पा॰सू॰ ७.३.५५) इति अभ्यासादुत्तरस्य हकारस्य कुत्वम्। क्रादिनियमप्राप्तस्य इटः 'विभाषा गमहन॰' (पा॰सू॰ ७.२.६८) इत्यादिना विकल्पविधानादभावः। संहितायां नकारस्य रुत्वानुनासिकावुक्तौ॥

**अन्वय—** दासपत्नी अहिगोपा आपः पणिना गावः इव निरुद्धा अतिष्ठन्, वृत्रं जघन्वान्। अपां यत् बिलम् अपिहितम् आसीत्, तत् अपववार।

**पदार्थ**— दासपत्नीः = दास (वृत्र) के स्वामित्व रहने वाले, दास है स्वामी जिनका। अहिगोपाः = अहि है रक्षक जिनका, मेघ द्वारा रक्षा किये जाते हुए। आपः = जल। निरुद्धाः = रोके गये, रुके हुए। अतिष्ठन् = स्थित थे, पड़ा था। पणिना = पणि के द्वारा। गावः = गायें। इव = समान। वृत्रम् = वृत्र को। जघन्वान् = मार डाला। अपाम् = जलों का। यत् = जो। बिलम् = (बहने के) द्वार को, मार्ग को, सुरंग को। अपिहितम् = ढका हुआ, बंद हो गया। आसीत् = था। तत् = उसको। अपववार = खोल दिया।

**अनुवाद**— दास (वृत्र) के स्वामितव में रहने वाले और मेघ के द्वारा रक्षा किये जाते हुए जल उसी प्रकार रोके गये स्थित थे, जिस प्रकार पणि द्वारा गायें रोकी गयी थीं। इन्द्र ने वृत्र को मार डाला। जलों का जो (बहने का) द्वार ढका हुआ था, (इन्द्र ने) उसको खोल दिया।

**व्याकरण**—

१. दासपत्नीः – दासः पतिः यासां ताः (बहुव्रीहि समास)। दासयति इति दासः। दस् + घञ् = दास।
२. अहिगोपाः – अहिः गोपाः यासां ताः। (बहुव्रीहि)।
३. निरुद्धाः – नि + √रुध् + क्त।
४. अपिहितम् – अपि + √धा + क्त।
५. जघन्वान् – √हन् लिट् के अर्थ में क्वसु।
६. आसीत् – √अस् लङ्, प्रथमपुरुष, एकवचन।
७. अतिष्ठन् – √स्था लङ्, प्रथमपुरुष, बहुवचन।
८. अपववार – अप + √वृ (खोलना), लिट्, प्रथमपुरुष, एकवचन।

**विशेष**—

१. **दासपत्नीः** में दास पद का अर्थ सायण ने विनाश करने वाला किया है। यह वृत्र के विशेषण के रूप में प्रयुक्त किया है। पीटर्सन और अन्य पाश्चात्त्य विद्वानों ने इसका अर्थ 'अनार्य' अथवा 'दानव' किया है। 'अहि' का अर्थ यहाँ सायण ने वृत्र किया है। परन्तु इसका अर्थ 'मेघ' अधिक उपयुक्त मालूम पड़ता है। यास्क के अनुसार **पणि** शब्द का अर्थ व्यापारी है जो पण्य (विक्रेय वस्तु) का व्यवहार करता है। सायण के अनुसार पणि नामक एक जाति थी, जो बहुत लालची थी। ऋग्वेद के एक सूक्त में पणियों द्वारा इन्द्र की गौओं के अपहरण करने का वर्णन भी है। पीटर्सन ने यहाँ 'पणि' का अर्थ 'पणि नामक असुरों का सरदार' किया है।

**अश्व्यो वारो अभवस्तदिन्द्र**
**सृके यत्त्वा प्रत्यहन्देव एकः।**
**अजयो गा अजयः शूर सोम-**
**मवासृजः सर्तवे सप्त सिन्धून् ॥१२॥**

**पदपाठ**— अश्व्यः। वारः। अभवः। तत्। इन्द्र। सृके। यत्। त्वा। प्रतिऽअहन्। देवः। एकः॥ अजयः। गाः। अजयः। शूर। सोमम्। अव। असृजः। सर्तवे। सप्त। सिन्धून्॥

**सा०भा०**— सृके वज्रे। 'सृकः वृकः' (नि० २.२०.६) इति वज्र नामसु पठितत्वात्। देवः दीप्यमानः सर्वायुधकुशलः एकः अद्वितीयः वृत्रः यत् यदा त्वा त्वां प्रत्यहन् प्रतिकूलत्वेन प्रहृतवान् तत् तदानीं त्वम् अश्व्यो वारः अश्वसंबन्धी वालः अभवः। अथाश्वस्य वालोऽनायासेन मोक्षकादीन्निवारयति तद्वत् वृत्रमगणयित्वा निराकृतवानित्यर्थः। किं च गाः पणिनामहृताः त्वम् जितवान्। हे शूर शौर्ययुक्त इन्द्र सोमम् अजयः जितवान्। तथा च तैत्तिरीयाः 'त्वष्टा हतपुत्रः' इत्येतस्मिन्नुपाख्याने समामनन्ति— 'स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत्' (तै० २.४.१२.१) इति। सप्त सिन्धून् 'इमं मे गङ्गे' (ऋ०सं० १०.७५.१) इत्यस्यामृच्याम्नाता गङ्गाद्याः सप्तसङ्ख्याका नदीः सर्तवे सर्तुं प्रवाहरूपेण गन्तुम् अवासृजः त्यक्तवान्।

वृत्रकृतं प्रवाहनिरोधं निराकृतवानित्यर्थः ।। अश्व्यः । अश्वे भवः । 'भवे छन्दसि' इति यत् । 'यतोऽनावः' इत्याद्युदात्तत्वम् । वारयति दंशमशकानिति वारः । पचाद्यच् । कपिलका-दित्वात् लत्वविकल्पः (पा०सू० ८.२.१८) । वृषादित्वादाद्युदात्तत्वम् । प्रत्यहन् । 'यद्वृत्तान्नित्यम्' इति निघातप्रतिषेधः । 'तिङि चोदात्तवति' इति गतेरनुदात्तत्वम् । अजयः । गाः इत्यस्य वाक्यान्तरगतत्वात् तदपेक्षयास्य 'तिङ्ङतिङः' इति निघातो न भवति, 'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः' (पा०सू० ८.१८.५) इति वचनात् । सर्तवे । 'तुमर्थे सेसेन्०' इति तवेन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् ।।

**अन्वय**— देवः एकः यत् त्वा सृके प्रत्यहन् तत् इन्द्र, अश्व्यः वारः अभवः । शूर, गा अजयः सोमम् अजयः । सर्तवे सप्त सिन्धून् अवासृजः ।

**पदार्थ**— देवः = दीप्यमान्, प्रदीप्त होते हुए । एकः = अद्वितीय, अकेले । यत् = जब । त्वा = तुझ पर, तुम्हारे । सृके = वज्र पर । प्रत्यहन् = उलटा प्रहार किया । तत् = तब । इन्द्र = हे इन्द्र ! अश्व्यः = अश्व के, घोड़े के । वारः = बाल । अभवः = हो गये । शूर = हे शौर्यसम्पन्न, हे बहादुर । गाः = गौओं को । अजयः = जीता । सोमम् = सोम को । अजयः = जीता । सर्तवे = बहने के लिए । सप्त = सात । सिन्धून = नदियों को । अवासृजः = निर्मुक्त कर दिया, प्रवाहित किया ।

**अनुवाद**— प्रदीप्त होते हुए अद्वितीय अकेले वृत्र ने जब तुझ पर (और तुम्हारे) वज्र पर उलटा प्रहार किया, तब हे इन्द्र ! तुम घोड़े के (पूँछ के) बाल हो गये । हे शौर्य सम्पन्न इन्द्र ! तुमने गौओं को जीत लिया, तुमने सोम को जीत लिया और बहने के लिए सात नदियों को निर्मुक्त कर दिया ।

**व्याकरण**—

१. अश्व्यः – अश्वे भवः, भवेच्छन्दसि से यत् प्रत्यय । अश्व + यत् = अश्व्य ।

२. वारः – वारयति अर्थ में √वृ + णिच् + अच् = वार ।

३. सर्तवे – √सृ + तुमर्थक तवेन् प्रत्यय ।

४. अभवः – √भू लङ् मध्यमपुरुष एकवचन ।

५. प्रत्यह्न – प्रति √ह्न लङ् प्रथमपुरुष एकवचन ।

६. असृजः – √सृज् लङ् मध्यमपुरुष एकवचन ।

७. अजयः – √जी लङ् मध्यमपुरुष एकवचन ।

**विशेष**—

१. 'अश्व्यः वारः अभवः' घोड़े का बाल हो गए । जिस प्रकार घोड़ा अपनी पूँछ के बालों से हमला करता हुआ तुच्छ मक्खियों को उड़ा देता है, उसी प्रकार इन्द्र ने तुच्छ वृत्र के उड़ा दिया । अथवा घोड़ा जिस प्रकार पूँछ से अपनी रक्षा करता है, उसी प्रकार इन्द्र ने अपनी रक्षा की । 'एक देवः' पद इन्द्र का विशेषण भी हो सकता है । इन्द्र अद्वितीय देवता था । 'सिन्धु' शब्द का अर्थ कुछ भाष्यकारों ने समुद्र किया है ।

**नास्मै विद्युन्न तन्यतुः सिषेध**
**न यां मिहमकिरद्ध्रादुनिं च ।**
**इन्द्रश्च यद्युयुधाते अहिश्-**
**चोतापरीभ्यो मघवा वि जिग्ये ।।१३।।**

**पदपाठ**— न । अस्मै । विऽद्युत् । न । तन्यतुः । सिसेध । न । याम् । मिहम् । अकिरत् । ह्रादुनिम् । च ।। इन्द्रः । च । यत् । युयुधाते इति । अहिः । च । उत । अपरीभ्यः । मघऽवा । वि । जिग्ये ।।

**सा०भा०**— इन्द्रं निषेद्धुं वृत्रो यान् विद्युदादीन् मायया निर्मितवान् ते सर्वेऽप्येनं निषेद्धुमशक्ताः।

सोऽयमर्थोऽनेन मन्त्रेणोच्यते । अस्मै इन्द्रार्थं निर्मिता विद्युत् न सिषेध इन्द्रं न प्राप्नोत् । तथा तन्यतुः गर्जनं यां मिहं यां वृष्टिम् अकिरत् वृत्रो विक्षिप्तवान् सापि वृष्टिः न सिषेध । ह्रादुनि च अशनिमपि यां वृत्रः प्रयुक्तवान् सापि न सिषेध । इन्द्रश्च अहिश्च इन्द्रवृत्रावुभावपि यत् यदा युयुधाते युद्धं कृतवन्तौ । तदानीं विद्युदादयो न प्राप्ता इति पूर्वत्रान्वयः । उत अपि च मघवा धनवानिन्द्रः अपरीभ्यः अपराभ्यः अन्यासामपि वृत्रनिर्मितानां मायानां सकाशात् वि जिग्ये विशेषेण जितवान् ।। सिषेध । 'षिधु गत्याम्' । मिहम् । 'मिह सेचने' । मेहति सिञ्चतीति मिट् वृष्टिः । 'क्विप् च' इति क्विप् । अकिरत् । 'कृ विक्षेपे'। तुदादिभ्यः शः । 'ॠत इद्धातोः' इति इत्वम् । अडागम उदात्तः । यद्वृत्तयोगादनिघातः । युयुधाते । 'युध संप्रहारे' । लिटि प्रत्ययस्वरः । लिटि प्रत्ययस्वरः । जिग्ये । 'सन्लिटोर्जेः' (पा०सू० ७.३.५७) इति अभ्यासादुत्तरस्य अकारस्य कुत्वम् ।।

**अन्वय**— यत् इन्द्रः अहिः च युयुधाते अस्मै विद्युत् न सिषेध, न तन्यतुः, यां मि[illegible] ह्रादुनिं च न अकिरत् । उत मघवा अपरीभ्यः विजिग्ये ।

**पदार्थ**— यत् = जब । इन्द्रः = इन्द्र । अहिः च = और वृत्र । युयुधाते = युद्ध कर रहे थे । अस्मै = इस (इंन्द्र) के लिए । विद्युत् = बिजली । न = नहीं । सिषेध = पा सका । न = नहीं । तन्यतुः = गर्जना । याम् = जिस । मिहम् = वृष्टि को । ह्रादुनिम् च = और वज्र को । अकिरत् = छोड़ा । न = नहीं । उत = और । मघवा = ऐश्वर्य सम्पन्न (इन्द्र) । अपरीभ्यः = दूसरी मायाओं से । विजिग्ये = विजय प्राप्त की ।

**अनुवाद**— जब इन्द्र और वृत्र दोनों युद्ध कर रहे थे, तब वृत्र द्वारा प्रयुक्त मायाओं में से न तो बिजली इन्द्र को पा सकी, न गर्जना उसे पा सकी, और वृत्र ने जिस वृष्टि और वज्र को छोड़ा था, वे भी उसको न पा सके और ऐश्वर्यशाली इन्द्र ने वृत्र की दूसरी मायाओं पर विजय प्राप्त की ।

**व्याकरण**—

१. विद्युत् – विशेषेण द्योतते अर्थ में वि + √द्युत् + क्विप् = विद्युत् ।
२. सिषेध – √षिध् लिट् प्रथमपुरुष, एकवचन ।
३. मिहम् – √मिह् + क्विप् = मिह् । द्वितीया, एकवचन ।
४. अकिरत् – √कृ लङ् प्रथमपुरुष, एकवचन ।
५. युयुधाते – √युध् आत्मनेपद, लिट्, प्रथमपुरुष, द्विवचन ।
६. विजिग्ये – वि + √जि + आत्मनेपद लिट्, प्रथमपुरुष, एकवचन ।

**विशेष**—

१. सायण ने 'अपरीभ्यः' का अर्थ किया है— वृत्र की अन्य मायाओं से, परन्तु पीटर्सन इससे भिन्न अर्थ मानते हैं । उनका अर्थ है— आने वाले सभी समयों के लिए ।

**अहेर्यातारं कमपश्य इन्द्र**
**हृदि यत्ते जघ्नुषो भीरगच्छत् ।**
**नव च यन्नवतिं च स्रवन्तीः**
**श्येनो न भीतो अतरो रजांसि ॥१४॥**

**पदपाठ**— अहेः । यातारम् । कम् । अपश्यः । इन्द्र । हृदि । यत् । ते । जघ्नुषः । भीः । अगच्छत् ॥ नव । च । यत् । नवतिम् । च । स्रवन्तीः । श्येनः । न । भीतः । अतरः । रजांसि ॥

**सा०भा०**— हे इन्द्र जघ्नुषः वृत्रं हतवतः तव हृदि चित्ते यत् यदि भीरगच्छत् न हतवानस्मीति बुद्ध्या भयं प्राप्नुयात् तर्हि अहेः वृत्रस्य यातारं हन्तारं कमपश्यः त्वत्तोऽन्यं कं पुरुषं दृष्टवानसि । तादृशस्य पुरुषान्तरस्याभावात् मा भूत् तव भयमित्यर्थः । यत् यस्मात् कारणात् त्वं नव च नवतिं च स्रवन्तीः एकोनशतसङ्ख्याकाः प्रवहन्तीर्नदीः प्राप्य रजांसि तत्रत्यान्युदकानि अतरः तीर्णवानसि

१. वर्तमानः – √वृत् + शानच् + प्रथमा, एकवचन।
२. निवेशयन् – नि + विश् + णिच् + शतृ, प्रथमा, एकवचन।
३. हिरण्ययेन-हिरण्य + मयट् = हिरण्यमय, किन्तु मकार का लोप होकर हिरण्यय बना। तृतीया, एकवचन।
४. पश्यन् – √दृश् (पश्य) + शतृ, प्रथमा, एकवचन।
५. याति – √या, लट् प्रथमपुरुष एकवचन।

**याति॑ दे॒वः प्र॒वता॑ या॒त्यु॒द्वता॑**
**याति॑ शु॒भ्राभ्यां॑ यज॒तो हरि॑भ्याम्।**
**आ दे॒वो याति सवि॒ता प॑रा॒वतो-**
**ऽप विश्वा॑ दुरि॒ता बाध॑मानः ॥३॥**

**पदपाठ—** याति॑। दे॒वः। प्र॒ऽवता॑। याति॑। उ॒त्ऽवता॑। याति॑। शु॒भ्राभ्या॑म्। य॒ज॒तः। हरि॑ऽभ्याम्॥ आ। दे॒वः। या॒ति॒। स॒वि॒ता। प॒रा॒ऽवतः॑। अप॑। विश्वा॑। दुः॒ऽइ॒ता। बाध॑मानः ॥३॥

**सा० भा०—** देवः दीप्यमानः सविता प्रवता प्रवणता मार्गेण याति गच्छति। तथा उद्वता उत्कृष्टेनोर्ध्वदेशयुक्तेन मार्गेण याति। उदयानन्तरम् आमध्याह्नमूर्ध्वो मार्गः तत उपरि आसायं प्रवणो मार्ग इति विवेकः। तथा यजतः यष्टव्यः स देवः शुभ्राभ्यां श्वेताभ्यां हरिभ्याम् अश्वाभ्यां याति देवयजनदेशे गच्छति। सविता देवः विश्वा दुरिता सर्वाणि पापानि अप बाधमानः विनाशयन् परावतः दूरदेशात्। 'परावतः' (निरु० ३.२६.५) इति दूरनामसु पठित्वात्। तादृशात् द्युलोकात् आ याति यागदेशे आगच्छति॥

**अन्वय—** देवः प्रवता याति, उद्वता याति। यजतः सविता देवः शुभ्राभ्यां हरिभ्यां याति, विश्वा दुरिता अप बाधमानः परावतः आ याति।

**पदार्थ—** देवः = देव। प्रवता = निचले मार्ग से, अधोगामी मार्ग से। याति = जाता है, गमन करता हैं। उद्वता = ऊँचे मार्ग से, उपरिगामी मार्ग से। याति = जाता है, गमन करता है। यजतः = पूजनीय, यजनीय। सविता देवः = सविता देव। शुभ्रा-भ्याम् = श्वेत वर्ण के। हरिभ्याम् = दो घोड़ों से। याति = गमन करता है। विश्वा दुरिता = सम्पूर्ण पापों को। अप बाधमानः = पूर्णतः विनष्ट करता हुआ। परावतः = बहुत दूर से। आ याति = आता है।

**अनुवाद—** देव (सविता) अधोगामी मार्ग से जाता है। उपरिगामी मार्ग से जाता है। पूजनीय सविता देव श्वेतवर्ण वाले दो घोड़ों से गमन करता है। (सविता देव) सम्पूर्ण पापों को पूर्णतः विनष्ट करता हुआ बहुत दूर से आता है।

**व्याकरण—**

१. प्रवता – प्र + √वन् + क्विप्, तृतीया, एकवचन।
२. उद्वता – उत् +√वन् + क्विप्, तृतीया, एकवचन।
३. यजतः – √यज् + अतच्, प्रथमा, एकवचन।
४. दुरिता – दुः + √इ + क्त, द्वितीया, नपुंसकलिङ्ग बहुवचन। वैदिक रूप, लौकिक संस्कृत में दुरितानि बनता है।
५. विश्वा – नपुंसकलिङ्ग द्वितीया बहुवचन विश्वानि का वैदिकरूप।
६. बाधमानः – √बाध् + शानच्, प्रथमा, एकवचन।

**अभीवृ॑तं कृश॑नैर्वि॒श्वरू॑पं**

**हिरण्यशम्यं यजतो बृहन्तम् ।**

**आस्थाद्रथं सविता चित्रभानुः**

**कृष्णा रजांसि तविषीं दधानः ॥४॥**

**पदपाठ**— अभिऽवृतम् । कृशनैः । विश्वऽरूपम् । हिरण्यऽशम्यम् । यजतः । बृहन्तम् ॥ आ । अस्थात् । रथम् । सविता । चित्रऽभानुः । कृष्णा । रजांसि । तविषीम् । दधानः ॥

**सा० भा०**— सविता रथम् आस्थात् आस्थितवान् आरूढवानित्यर्थः । कीदृशम् । अभीवृतम् अभितो वर्तमानम् । तथा कृशनैर्विश्वरूपं सुवर्णेन नानारूपम् । 'कृशनं लोहम्' (नि० १.२.७) इति सुवर्णनामसु पाठात् । क्वचित् सुवर्णनिर्मितगजपङ्क्तिः क्वचिदश्वपङ्क्तिः क्वचिन्मनुष्यपङ्क्तिरित्येवं बहुरूपत्वम् । हिरण्यशम्यम् । अश्वानां स्कन्धेषु रथयोजनवेलायां नियन्तुं प्रक्षेप्यमाणाः शङ्कवः शम्याः । ताः सुवर्णमय्यो रथे वर्तन्ते । बृहन्तं प्रौढम् । कीदृशः सविता । यजतः यष्टव्यः चित्रभानुः विविधरश्मियुक्तः कृष्णा रजांसि अन्धकारयुक्ततया कृष्णवर्णान् लोकानुद्दिश्य तमोनिवारणार्थं तविषीं बलं स्व-कीयं प्रकाशरूपं दधानः।

**अन्वय**— कृशनैः अभीवृतं विश्वरूपं हिरण्यशम्यम् बृहन्तं रथं यजतः चित्रभानुः सविता कृष्णा रजांसि तविषीं दधानः आ अस्थात् ।

**पदार्थ**— कृशनैः = सुवर्णों से । अभीवृतम् = जटित, घिरे हुए । विश्वरूपम् = अनेक रूपों वाले, विविध रूपों वाले । हिरण्यशम्यम् = सुवर्ण की कील वाले । बृहन्तम् = विशाल, ऊँचे । रथम् = रथ पर । यजतः = यजनीय, पूजनीय । चित्रभानुः = विविध किरणों वाला । सविता = सविता (देवता) । कृष्णा = काले, अन्धकारयुक्त । रजांसि = लोकों के (विरुद्ध) । तविषीम् = बल को, दधानः = धारण करता हुआ । आ अस्थात् = आरूढ़ हो गया है ।

**अनुवाद**— सुवर्णों से जटित (घिरे हुए), विविध रूपों वाले विशाल रथ पर (स्थित) पूजनीय (एवं) विविध किरणों वाला सविता (देव) अन्धकारयुक्त लोकों के (विरुद्ध) बल को (अर्थात् प्रकाश को) धारण करता हुआ आरूढ़ हो गया है ।

**व्याकरण**—

१. अभीवृतम् – अभि + √वृत् + क्विप्, द्वितीया, एकवचन । छान्दस् दीर्घता ।

२. कृष्णा – नपुंसकलिङ्ग द्वितीया बहुवचन, वैदिक रूप । लौकिक संस्कृत कृष्णानि रूप बनेगा । कृष्णानि का वैदिक रूप ।

३. बृहन्तम् – √बृह् + शतृ, द्वितीया, एकवचन ।

४. अस्थात् – √स्था + लुङ् प्रथमपुरुष, एकवचन ।

५. दधानः = √धा + शानच्, प्रथमा, एकवचन ।

**वि जनाञ्छ्यावाः शितिपादो अख्यन्**

**रथं हिरण्यप्रउगं वहन्तः ।**

**शश्वद्विशः सवितुर्दैव्यस्यो-**

**पस्थे विश्वा भुवनानि तस्थुः ॥५॥**

**पदपाठ**— वि । जनान् । श्यावाः । शितिऽपादः । अख्यन् । रथम् । हिरण्य-प्रउगम् । वहन्तः ॥ शश्वत् । विशः । सवितुः । दैव्यस्य । उपऽस्थे । विश्वा । भुवनानि । तस्थुः ॥

**सा० भा०**— श्यावाः एतन्नामकाः सूर्यस्याश्वाः । 'श्यावाः सवितुः' (नि० १.१५.८) इति निघण्टावुक्तत्वात् । ते च शितिपादः श्वेतैः पादैरुपेताः हिरण्यप्रउगम् । रथस्य मुखम् ईषयोरग्रं युगबन्धनस्थानं प्रउगमित्युच्यते । तच्चात्र सुवर्णमयम् । तद्युक्तं रथं वहन्तः जनान् प्राणिनः वि अख्यन् विशेषेण प्रकाशितवन्तं इत्यर्थः । शश्वत् सर्वदा विशः प्रजाः दैव्यस्य इतरदेवसम्बन्धिनः सवितुः प्रेरकस्य सूर्यस्य उपस्थे समीपस्थाने

तस्थु: स्थित-वत्य: । न केवलं प्रजा: किं तर्हि विश्वा भुवनानि सर्वे च लोका: प्रकाशाय सूर्यसमीपे तस्थु: ।

**अन्वय**— शितिपाद: हिरण्यप्रउगं रथं वहन्त: श्यावा: जनान् वि अख्यन् शश्वत् विश: विश्वा भुवनानि सवितु: दैव्यस्य उपस्थे तस्थु: ।

**पदार्थ**— शितिपाद: = श्वेत पैरों वाला । हिरण्यप्रउगम् = सुवर्ण निर्मित कील वाले । रथम् = रथ को । वहन्त: = खींचते हुए । श्यावा: = सवितृ देव के अश्वों ने । जनान् = लोगों को, प्राणियों को । वि अख्यन् = विशेष रूप से प्रकाशित किया है । शश्वत् = सर्वदा । विश: = प्रजाएँ । विश्वा भुवनानि = सम्पूर्ण लोक । सवितु: दैव्यस्य = सवितृ देव के । उपस्थे = गोद में, समीप स्थित स्थान में । तस्थु: = स्थित हैं ।

**अनुवाद**— सुवर्णनिर्मित कील वाले रथ को वहन करते हुए (खींचते हुए) श्वेत पैरों वाले, सवितृ देव के अश्वों ने लोगों को (प्राणियों को) विशेष रूप से प्रकाशित किया है । सर्वदा प्रजाएँ एवं सम्पूर्ण लोक सवितृ देव की गोद में (अथवा समीप स्थित स्थान में) स्थित हैं ।

**व्याकरण**—

१. जनाञ्छ्यावा: – जनान् + श्यावा: 'शि तुक्' (पा०सू० ८.३.३१) से तुक् आगम, विकल्प से = जनान् त् श्यावा: । स्तोश्चुना० (पा० सू० ८.४.४०) से जनान् च् श्यावा: रूप बना । ऐसी स्थिति में झय् चकार के बाद शकार होने के कारण 'शश्छोऽटि' (पा० सू० ८.४.६३) से जनाञ् च् छ्यावा: रूप बनने पर वैकल्पिक रूप में आये हुए तकार के हट जाने के परिणामस्वरूप 'जनाञ्छ्यावां:' रूप बन जाता है ।

२. प्रउगम् – यहाँ पर विवृत्ति है । जो स्वरों के मध्य में होने वाले उच्चारण काल के विराम को विवृति कहा जाता है । यह वैदिक भाषा की प्रमुख विशेषता है ।

३. वहन्त: – √वह् + शतृ, पुलिंग प्रथमा, बहुवचन ।

४. अख्यन् – √ख्या + लुङ्, प्रथम पुरुष, बहुवचन ।

५. तस्थु: – √स्था + लिट् + प्रथम पुरुष, बहुवचन ।

६. विश्वा – नपुंसकलिङ्ग प्रथमा बहुवचन वैदिक रूप, लौकिक संस्कृत में विश्वानि रूप बनता है । भुवनानि का विशेषण है ।

**तिस्रो द्याव॑: सवि॒तुर्द्वा उ॒पस्था॑ँ**
**एका॑ य॒मस्य॒ भुव॑ने विरा॒षाट् ।**
**आ॒णिं न रथ्य॑म॒मृताधि॑ तस्थु-**
**रि॒ह ब्र॑वीतु॒ य उ॒ तच्चिके॑तत् ॥६॥**

**पदपाठ**— तिस्र: । द्याव॑: । स॒वि॒तु: । द्वौ । उ॒पऽस्था॑ । एका॑ । य॒मस्य॑ । भुव॑ने । वि॒रा॒षाट् । आ॒णिम् । न । रथ्य॑म् । अ॒मृता॑ । अधि॑ । त॒स्थु॒: । इ॒ह । ब्र॒वी॒तु॒ । य: । उँ इति॑ । तत् । चिके॑तत् ॥

**सा० भा०**— द्याव: स्वर्गोपलक्षिता: प्रकाशमाना लोका: तिस्र: त्रिसंख्याका सन्ति । तत्र द्वौ लोकौ सवितु: सूर्यस्य उपस्था समीपस्थाने वर्तेते, द्युलोकभूलोकयो: सूर्येण प्रकाशिततत्वात् । एका मध्यमा भूमिरन्तरिक्षलोक: यमस्य भुवने पितृपतेर्गृहे विराषाट् विरान् गन्तृन् सहते । प्रेता: पुरुषा: अन्तरिक्षमार्गेण यमलोके गच्छन्तीत्यर्थ: । अमृता अमृतानि चन्द्रनक्षत्रादीनि ज्योतींषि जलानि वा अधि तस्थु: सवितारमधिगम्य स्थि-तानि । तत्र दृष्टान्त: । रथ्यम् आणिं न । रथाद्बहि: अक्षच्छिद्रे प्रक्षिप्त: कीलविशेष: आणिरित्युच्यते । रथसम्बन्धिनम् आणिम् अधिगम्य यथा रथास्तिष्ठिति तद्वत् । य: तु मानव: तत् सवितृरूपं चिकेतत् जानाति स: मानव: इह अस्मिन् विषये ब्रवीतु कथयतु । केनापि वक्तुमशक्य: सवितुर्महिमेत्यर्थ: ।

**अन्वय**— द्याव: तिस्र: द्वौ सवितु: उपस्था, एका विराषाट् यमस्य भुवने, रथ्यम् आणिं न अमृता

अधि तस्थुः । यः उ तत् चिकेतत् ब्रवीतु ।

**पदार्थ**— द्यावः = लोक, द्युलोक । तिस्रः = तीन । द्वौ = दो । सवितुः = सवितृ के । उपस्था = गोद में, समीप में । एका = एक । विराषाट् = मृत व्यक्तियों का निवास स्थान । यमस्य = यम के । भुवने = लोक में । रथ्यम् = रथ के । आणिम् = धुरा । न = समान । अमृता = देवलोक, देवगण । अधि तस्थुः = आश्रित हैं, स्थित हैं । यः = जो । उ = निश्चित ही । तत् = उसको । चिकेतत् = जानता है । ब्रवीतु = कहे, बतलावे ।

**अनुवाद**— लोक तीन हैं (जिनमें से) दो (लोक) सवितृ (देव) की गोद (समीप) में हैं । एक (जो) मृत व्यक्तियों का निवास-स्थान (स्वरूप है), यम के लोक में (है) । रथ के धुरे के समान देवलोक (उस सवितृ देव पर) आश्रित है (अर्थात् जिस प्रकार रथ धुरे पर आश्रित होता है, उसी प्रकार सम्पूर्ण देवता सवितृ पर आश्रित हैं) जो (उपासक) उसको जानता है (वह) (उसके सम्बन्ध में) कहे ।

**व्याकरण**—

१. उपस्थाँ एका – लौकिक संस्कृत के 'उपस्थे' का वेद में 'उपस्था' हुआ है तथा अन्तिम स्वर अनुनासिक हुआ फलस्वरूप एका का एकार बाद में होने पर भी सन्धिकार्य नहीं हुआ है । पदपाठ में अनुनासिकता समाप्त हो जाती है ।

२. ब्रवीतु – √ब्रू + लोट् + प्रथमपुरुष, एकवचन ।

३. तस्थुः – √स्था + लिट् प्रथमपुरुष, बहुवचन ।

४. चिकेतत् – √कित् + लेट्, प्रथमपुरुष, एकवचन ।

**वि सुपर्णो अन्तरिक्षाण्यख्यद्**
**गभीरवेपा असुरः सुनीथः ।**
**क्वेदानीं सूर्यः कश्चिकेत**
**कतमां द्यां रश्मिरस्या ततान ॥७॥**

**पदपाठ**— वि । सुऽपर्णः । अन्तरिक्षाणि । अख्यत् । गभीरऽवेपाः । असुरः । सुऽनीथः ॥ क्व । इदानीम् । सूर्यः । कः । चिकेत । कतमाम् । द्याम् । रश्मिः । अस्य । आ । ततान ॥

**सा० भा०**— सुपर्णः शोमनपतनः सूर्यस्य रश्मिः । 'सुपर्णा इति पञ्चदश रश्मि-नामानि' (नि० १.५.१५) इति तन्नामसु पठितत्वात् । अन्तरिक्षाणि अन्तरिक्षोपलक्षि-तानि लोकत्रयस्थानानि वि अख्यत् विशेषेण ख्यापितवान् प्रकाशितवान् । कीदृशो रश्मिः गभीरवेपाः गम्भीरकम्पनः । रश्मेः प्रकम्पनं चलनं केनापि द्रष्टुमशक्यमित्यर्थः । असुरः सर्वेषां प्राणदः । तथा चान्यत्र आम्नायते-'सर्वेषां भूतानां प्राणानादायोदेति' (तै. आ. १.१४.१) इति । सुनीथः सुनयनः शोभनप्रापणः । मार्गप्रकाशनेन अभीष्ट- देशं प्रापयतीत्यर्थः । तादृशरश्मियुक्तः सूर्यः इदानीं रात्रौ क्व कुत्र वर्तते । तदेतद्रहस्यं कश्चिकेत को जानाति । न कोऽपि इत्यर्थः । अस्य सूर्यस्य रश्मिः कतमां द्याम् आ ततान कं द्युलोकं रात्रौ व्याप्तवान् । एतदपि को जानाति ।

**अन्वय**— गभीरवेपाः असुरः सुनीथः सुपर्णः अन्तरिक्षाणि वि अख्यत् । इदानीं सूर्यः क्व? अस्य रश्मिः कतमां द्याम् आ ततान, कः चिकेत ।

**पदार्थ**— गभीरवेपाः = गम्भीर कम्पनयुक्त । असुरः = प्राण देने वाली, शक्तिदात्री । सुनीथः = अच्छी प्रकार से मार्गदर्शन कराने वाली । सुपर्णः = सुन्दर किरण। अन्तरिक्षाणि = अन्तरिक्षलोकों को । वि अख्यत् = विशेष रूप से प्रकाशित किया है । इदानीम् = इस समय, अब । सूर्यः = सूर्य । क्व = कहाँ । अस्य = इसकी । रश्मिः = किरण । कतमां = किस । द्याम् = लोक तक । आ ततान = विस्तृत है, फैली है । कः = कौन । चिकेत = जानता है ।

**अनुवाद**— गम्भीर कम्पनयुक्त, प्राण देने वाली, अच्छी प्रकार से मार्ग-दर्शन कराने वाली (सवितृ देव की) सुन्दर किरण ने अन्तरिक्ष लोकों को विशेष रूप से प्रकाशित किया है । इस समय इस (सवितृ

देव) की किरण किस लोक तक फैली है, (इसे) कौन जानता है?

**व्याकरण—**

१. सुपर्णः – सुष्ठु पर्णः । शोभनपतनः (सायण) । ग्रिफिथ–सूर्य । मैकडानल–पक्षी ।

२. गभीरवेपाः – 'वेपा' √विप् + असुन् प्रत्यय के योग से निष्पन्न है ।

३. असुरः – असुन् प्राणान् राति ददाति इति असुरः । प्राणदायक ।

४. अख्यत् – √ख्या + लुङ्, प्रथमपुरुष एकवचन ।

५. क्वे३ दानीम् – यहाँ कम्प हुआ है । जब स्वतन्त्र स्वरित से ठीक बाद उदात्त आता है तब वह स्वरित कम्प कहलाता है । यदि स्वरित स्वर ह्रस्व वर्ण पर होता है तब उसके आगे १ चिह्न लिखा जाता है एवं जब स्वरित स्वर दीर्घ वर्ण पर होता है तब उसके ३ चिह्न लिखा जाता है तथा स्वरित स्वर को अनङ्कित छोड़ दिया जाता है ।

६. ततान – √तन् + लिट्, प्रथमपुरुष,एकवचन ।

७. चिकेत – √कित्, लिट्, प्रथमपुरुष, एकवचन ।

**अ॒ष्टौ व्य॑ख्यत्क॒कुभः॑ पृथि॒व्या-**
**स्त्री धन्व॒ योज॑ना स॒प्त सिन्धू॑न् ।**
**हि॒र॒ण्या॒क्षः स॑वि॒ता दे॒व आगा॒-**
**द्दध॒द्रत्ना॑ दा॒शुषे॒ वार्या॑णि ॥८॥**

**पदपाठ— अ॒ष्टौ । वि । अ॒ख्य॒त् । क॒कुभः॑ । पृ॒थि॒व्याः । त्री । धन्व॑ । योज॑ना । स॒प्त । सिन्धू॑न् । हि॒र॒ण्य॒ऽअ॒क्षः । स॒वि॒ता । दे॒वः । आ । अ॒गा॒त् । दध॑त् । रत्ना॑ । दा॒शुषे॑ । वार्या॑णि ॥**

**सा० भा०—** पृथिव्याः सम्बन्धिनीः अष्टौ ककुभः प्राच्याद्याचतस्रो दिश आग्ने-य्याश्चतस्रो विदिश इत्येवमष्टौ दिशः व्यख्यत् सविता प्रकाशितवान् । तथा योजना प्राणिन स्वस्वभोगेन योजयितृन् धन्व अन्तरिक्षोपलक्षितान् त्री त्रिसंख्याकान् पृथिव्यादि-लोकान् सप्त सिन्धून् गङ्गादिनदीः समुद्रान्वा सविता व्यख्यत् । हिरण्याक्षः । हित-रमणीयचक्षुर्युक्तो हिरण्यमयाक्षो वा सविता देव आगात् इहागच्छतु । किं कुर्वन् । दाशुषे हविर्दत्तवते यजमानाय वार्याणि वरणीयानि रत्नानि दधत् प्रयच्छन् ।

**अन्वय—** पृथिव्या अष्टौ ककुभः, त्री धन्व, सप्त सिन्धून्, योजना वि अख्यत् । हिरण्याक्षः सविता देवः दाशुषे वार्याणि रत्ना दधत् आ अगात् ।

**पदार्थ—** पृथिव्याः = पृथिवी सम्बन्धी, पृथिवी की । अष्टौ = आठ । ककुभः = दिशाओं को । त्री = तीन । धन्व = लोकों को । सप्त = सात । सिन्धून् = नदियों को । योजना = प्राणियों के कर्म-फलों को । वि अख्यत् = विशेष रूप से प्रकाशित किया है । हिरण्याक्षः = सुवर्ण-सदृश नेत्रों वाला । सविता देव = सविता देव । दाशुषे = हविष्य प्रदान करने वाले के लिए । वार्याणि = इच्छित, अभीष्ट । रत्ना = बहु-मूल्य धनों को । दधत् = धारण करते हुए । आ आगात् = आ चुके हैं ।

**अनुवाद—** (सविता देव ने) पृथ्वी की आठ दिशाओं को, तीन लोकों को, सात नदियों को (एवं) प्राणियों के कर्मफलों को विशेष रूप से प्रकाशित किया है । सुवर्ण-सदृश नेत्रों वाले सविता देव हविष्य प्रदान करने वाले (यजमान) के लिए अभीष्ट बहुमूल्य धनों को धारण करते हुए आ चुके हैं ।

**व्याकरण—**

१. दाशुषे – √दाश् + क्वसु, चतुर्थी, एकवचन ।

२. योजना – योजन, प्रथमा बहुवचन योजना प्राणिनः (सायण) ।

३. हिरण्याक्षः – हिरण्यमयानि अक्षीणि यस्यासौ, स्वर्णिम आखों (किरणों) वाला (सायण) ।

४. दधत् – √धा + शतृ, प्रथमा, एकवचन ।

५. वार्याणि – वृङ् + ण्यत् द्वितीया, बहुवचन ।

६. रत्ना – नपुंसक लिंग बहुवचन रत्नानि का वैदिक रूप।
७. अगात् – √गा + लुङ्, प्रथमपुरुष एकवचन।

**हिरण्यपाणिः सविता विचर्षणि-**
**रुभे द्यावापृथिवी अन्तरीयते।**
**अपामीवां बाधते वेति सूर्य-**
**मभि कृष्णेन रजसा द्यामृणोति ॥९॥**

**पदपाठ**— हिरण्यऽपाणिः। सविता। विऽचर्षणिः। उभे इति। द्यावापृथिवी इति। अन्तः। ईयते॥ अप। अमीवाम्। बाधते। वेति। सूर्यम्। अभि। कृष्णेन। रजसा। द्याम्। ऋणोति॥

**सा०भा०**— हिरण्यपाणिः सुवर्णमयहस्तयुक्तः यद्वा यजमानेभ्यः दातुं हिरण्यं हस्ते धृतवान् 'विचर्षणिः विश्ववर्षणिः' (नि० ३.११.६) इति तन्नामसु पाठात्। सविता देवः उभे द्यावापृथिवी अन्तः उभयोर्लोकयोर्मध्ये ईयते गच्छति। अमीवां रोगादिबाधाम् अप बाधते सम्यक् निराकरोति। तथा सूर्यं वेति गच्छति। यद्यपि सवितृ-सूर्ययोरेकदेवतात्वं तथापि मूर्ति भेदेन गन्तृगन्तव्यभावः। कृष्णे तमसः कर्षणेन निव-र्तकेन रजसा तेजसा द्याम् आकाशम् अभि ऋणोति सर्वतो व्याप्नोति॥

**अन्वय**— हिरण्यपाणिः, विचर्षणिः सविता द्यावापृथिवी उभे अन्तः ईयते। अमीवाम् अप बाधते। सूर्यं वेति। कृष्णेन रजसा द्याम् ऋणोति॥

**पदार्थ**— हिरण्यपाणिः = स्वर्णिम हाथों वाला, स्वर्णयुक्त हाथों वाला। विचर्षणिः = सबको देखने वाला। सविता = सवितृ देव। द्यावापृथिवी = द्युलोक और पृथिवी। उभे = दोनों (लोकों) के। अन्तः = मध्यवर्ती (मार्ग से)। ईयते = गमन करता है। अमीवाम् = रोग आदि बाधाओं को। अप बाधते = पूर्ण रूप से विनष्ट कर डालता है। सूर्यम् = सूर्य के समीप। वेति = जाता है। कृष्णेन = अन्धकारयुक्त। रजसा = लोक से। द्याम् = द्युलोक को। ऋणोति = व्याप्त करता है।

**अनुवाद**— स्वर्णिम हाथों वाला (एवं) सबको देखने वाला सवितृ देव द्युलोक एवं पृथिवी दोनों (लोकों) के मध्यवर्ती (मार्ग से) गमन करता है। (प्राणियों के) रोग आदि बाधाओं को पूर्ण रूप से विनष्ट कर डालता है। सूर्य के समीप जाता है (तथा) अन्धकारयुक्त लोक से (आता हुआ) द्युलोक को व्याप्त करता है।

**व्याकरण**—
१. ईयते – √ई + लट्, आत्मनेपद, प्रथमपुरुष, एकवचन।
२. बाधते – √बाध् + लट्, आत्मनेपद, प्रथमपुरुष, एकवचन।
३. वेति– √वी + लट्, प्रथमपुरुष, एकवचन।
४. ऋणोति – √ऋणु, लट्, प्रथमपुरुष, एकवचन।

**विशेष**— इस मन्त्र में सवितृ देव का सूर्य के समीप गमन करना वर्णित है। यद्यपि सवितृ एवं सूर्य में अभेद है परन्तु मूर्ति-भेद से उपर्युक्त कथन सार्थक है।

**हिरण्यहस्तो असुरः सुनीथः**
**सुमृळीकः स्ववाँ यात्वर्वाङ्।**
**अप सेधन्रक्षसो यातुधाना-**
**नस्थाद्देवः प्रतिदोषं गृणानः ॥१०॥**

**पदपाठ**— हिरण्यऽहस्तः। असुरः। सुऽनीथः। सुऽमृळीकः। स्वऽवान्। यातु। अर्वाङ्॥

**अपऽसेधन् । रक्षसः । यातुऽधानान् । अस्थात् । देवः । प्रतिऽदोषम् । गृणानः ॥**

**सा० भा०**— हिरण्यहस्तः असुरः प्राणदाता सुनीथः सुष्ठु नेता प्रशस्य इत्यर्थः । 'सुनीथः पाकः' (नि० ३.८.७) इति प्रशस्यनामसु पाठात् । सुमृळीकः सुष्ठु सुखयिता स्ववान् धनवान् अर्वाङ् अभिमुखः कर्मदेशे गच्छतु । किं चायं देवः प्रतिदोषं प्रतिरात्रिं गृणानः स्तूयमानः अस्थात् स्थितवान् । किं कुर्वन्। रक्षसः बाधकत्वेन रक्षणनिमित्त-भूतान् 'रक्षो रक्षितव्यमस्मात्' (निरु० ४.१८) इति यास्कः । यातुधानान् असुरान् अप-सेधन् निराकुर्वन् ।

**अन्वय**— हिरण्यहस्तः असुरः सुनीथः सुमृळीकः स्ववान् देवः अर्वाङ् यातु । प्रति दोषम् गृणानः रक्षसः यातुधानान् अपसेधन् अस्थात् ।

**पदार्थ**— हिरण्यहस्तः = स्वर्णयुक्त हाथों वाला, स्वर्णिम हाथों वाला । असुरः = प्राणदाता । सुनीथः = अच्छी प्रकार से मार्ग-दर्शन कराने वाला । सुमृळीकः = भली-भाँति सुख देने वाला । स्ववान् = धनवान् । देवः = देव । अर्वाङ् = हमारी ओर । यातु = आवे । प्रतिदोषम् = प्रत्येक रात्रि में । गृणानः = स्तुत होता हुआ, पुकारा जाता हुआ । रक्षसः = राक्षसों को । यातुधानान् = मायावियों को । अपसेधन् = दूर करता हुआ, विनष्ट करता हुआ । अस्थात् = स्थित हो गया है ।

**अनुवाद**— स्वर्णयुक्त हाथों वाला, प्राणदाता, अच्छी प्रकार से मार्ग दर्शन कराने वाला, भली-भाँति सुख देने वाला, धनवान् (सवितृ) देव हमारी ओर आवे । प्रत्येक रात्रि में स्तुत होता हुआ (सवितृ देव) राक्षसों (एवं) मायावियों को दूर करता हुआ स्थित हो गया है ।

**व्याकरण**—

१. सुमृळीकः – सु + √मृड् + ईकन्, प्रथमा एकवचन । ऋग्वेद में दो स्वरों के मध्य उच्चरित होने वाला 'ड्' ळ् में परिवर्तित हो जाता है ।
२. स्ववान् – सु + अवस्, प्रथमा एकवचन । संहितापाठ में नकार का लोप होकर आकार अनुनासिक हो गया ।
३. यातु – √या + लोट्, प्रथमपुरुष, एकवचन ।
४. गृणानः – √गृ + शानच्, प्रथमा, एकवचन ।
५. अपसेधन् – अप + √सिध् + शतृ, प्रथमा, एकवचन ।
६. अस्थात् – √स्था + लुङ्, प्रथमपुरुष, एकवचन ।

**ये ते पन्थाः सवितः पूर्व्यासो-**
**ऽरेणवः सुकृता अन्तरिक्षे ।**
**तेभिर्नो अद्य पथिभिः सुगेभी-**
**रक्षा च नो अधि च ब्रूहि देव ॥११॥**

**पदपाठ**— **ये । ते । पन्थाः । सवितरिति । पूर्व्यासः । अरेणवः । सुऽकृताः । अन्तरिक्षे ॥ तेभिः । नः । अद्य । पथिऽभिः । सुऽगेभिः । रक्षः । च । नः । अधि । च । ब्रूहि । देव ॥**

**सा० भा०**— हे सवितः ते तव पन्थाः मार्गाः पूर्व्यासः पूर्वसिद्धाः अरेणवः धूलिरहिताः अन्तरिक्षे सुकृताः सुष्ठु सम्पादिताः । सुगेभिः सुष्ठुः गन्तुं शक्यैः तेभिः पथिभिः तैर्मार्गैरागत्य अद्य अस्मिन् दिने नः अस्मान् रक्ष च पालनमपि कुरु । तथा हे देव नः अस्मान् अनुष्ठातृन् अधि ब्रूहि च देवानामग्रेऽधिकत्वेन कथय च ॥

**अन्वय**— सवितः ते ये पूर्व्यासः अरेणवः अन्तरिक्षे सुकृताः पन्थाः तेभिः सुगेभिः पथिभिः अद्य देव नः रक्ष अधि ब्रूहि च ।

**पदार्थ**— सवितः = हे सवितृ (देव) । ते = तुम्हारे । ये = जो । पूर्व्यासः = प्राचीन, पूर्वनिर्मित । अरेणवः = धूलिरहित । अन्तरिक्षे = अन्तरिक्ष में । सुकृताः = अच्छी प्रकार से निर्मित । पन्थाः = मार्ग । तेभिः = उन्हीं । सुगेभिः = सुगम । पथिभिः = मार्गों से । अद्य = आज । देव = हे देव । नः = हमारी ।

रक्ष = रक्षा करो। च = तथा। अधि = ओर से। ब्रूहि = बोलो ॥

**अनुवाद**— हे सवितृ (देव)! तुम्हारे जो प्राचीन, धूलिरहित (एवं) अन्तरिक्ष में अच्छी प्रकार से निर्मित मार्ग हैं, उन्हीं सुगम मार्गों से आज (आकर) हे देव! हमारी रक्षा करो तथा हमारी ओर से बोलो ॥

**व्याकरण**—

१. पूर्व्यासः – पूर्व्य शब्द के प्रथमा बहुवचन का वैदिक रूप। लौकिक संस्कृत में पूर्व्याः रूप बनता है।

२. पन्थाः – पथिन् का वैदिक रूप, लौकिक संस्कत में 'पन्थानः' बनेगा।

३. तेभिः – 'तत्' के तृतीया बहुवचन का वैदिक रूप। वैदिक भाषा में 'भिस्' के स्थान पर 'ऐस्' आदेश विकल्प से होता। यहाँ यह आदेश नहीं हुआ है। लौकिक संस्कृत में तैः रूप बनता है।

४. पथिभिः एवं सुगेभिः – इन शब्द रूपों में भी उपर्युक्त 'भिस्' आदेश नहीं हुए हैं।

५. सुगेभी – सुगेभिः + रक्ष – यहाँ सुगेभिः के विसर्ग का रेफ होकर उसका लोप हुआ है तथा परिणामतः पूर्व स्वर का दीर्घ हो गया है। 'रोरि' 'ढ्रलोपेपूर्वस्य-दीर्घोऽणः' से।

६. रक्षा – रक्ष् + लोट्, मध्यमपुरुष, एकवचन। छान्दस् दीर्घता।

७. ब्रूहि – √ब्रू + लोट्, मध्यमपुरुष, एकवचन।

**अभ्यास**—

(१) निम्नलिखित मन्त्रों का हिन्दी में अनुवाद कीजिए—

(क) ह्वयाम्यग्निं प्रथमं.........................१

(ख) आ कृष्णेन रजसा.........................२

(ग) अभीवृतं कृशनैर्विश्वरूपं....................४

(घ) वि सुवर्णो अन्तरिक्षाण्यख्यत् ............७

(ङ) ये ते पन्थाः सवितः.......................११

(२) निम्नलिखित पर व्याकरणात्मक टिप्पणी लिखिए—

(क) अवसे।

(ख) हिरण्ययेन।

(ग) प्रउगम्।

(घ) उपस्थाँ।

(ङ) पूर्व्यासः।

(च) तेभिः

## ४.३ मरुत्-सूक्त

**मण्डल**- १ | **सूक्त**–८५

**ऋषि**–गौतम | **देवता**–मरुत् | **छन्द**–१२वें मन्त्र में त्रिष्टुप् और शेष में जगती।

**प्र ये शुम्भ॑न्ते॒ जन॑यो॒ न सप्त॑यो॒ याम॑न्रु॒द्रस्य॑ सू॒नव॑: सु॒दंस॑सः।**
**रोद॑सी॒ हि म॒रुत॑श्चक्रि॒रे वृ॒धे मद॑न्ति वी॒रा वि॒दथे॑षु॒ घृष्व॑यः ॥१॥**

**पदपाठ**—प्र। ये। शुम्भ॑न्ते। जन॑यः। न। सप्त॑यः। याम॑न्। रु॒द्रस्य॑। सू॒नव॑ः। सु॒ऽदंस॑सः। रोद॑सी॒। इति॑। हि। म॒रुत॑ः। चक्रि॒रे। ...

**शब्दार्थ—उक्षितासः** = अभिषिक्त होते हुये। **आशत** = प्राप्त किया है। **दिवि** = प्रकाशमान द्युलोक में। **रुद्रासः** = रुद्र के पुत्र। **सदः** = स्थान को। **अधिचक्रिरे** = सर्वोत्कृष्ट बनाया है। **अर्चन्तः** = पूजा करते हुये। **अर्कम्** = पूजनीय इन्द्र की। **जनयन्तः** = उत्पन्न करते हुये। **इन्द्रियम्** = इन्द्र के चिह्नभूत पराक्रम को। **श्रियः** = ऐश्वर्यों को। **अधिदधिरे** = अधिकार पूर्वक धारण किया है। **पृश्निमातरः** = नाना रूपों वाली भूमि के पुत्र।

**हिन्दी अनुवाद**—देवताओं द्वारा अभिषिक्त होते हुये उन मरुतों ने महिमा को प्राप्त किया है। रुद्र के पुत्र उन मरुतों ने प्रकाशमान द्युलोक में अपने स्थान को सर्वोत्कृष्ट बनाया है। पूजनीय इन्द्र की पूजा करते हुये और इन्द्र के चिह्नभूत पराक्रम को उत्पन्न करते हुये, नाना रूपों वाली भूमि के पुत्र उन मरुतों ने ऐश्वर्यों को अधिकार पूर्वक धारण किया है।

**व्याकरण—**

**उक्षितासः**–'उक्ष् सेचने' धातु से कर्म में 'क्त' प्रत्यय = उक्षित। प्रथमा का एकवचन वैदिक रूप। अथवा उक्षित + असुक् = उक्षितासः।

**पृश्निमातरः**–प्राश्नुते सर्वानि रूपाणि इति पृश्निः भूमिः। पृश्निः माता येषां ते पृश्निमातरः।

**विशेष**—मैक्डानल ने 'उक्षितासः' का अर्थ 'having waxed strong' और 'अर्कम् अर्चन्तः' का अर्थ 'singing their songs' किया है।

**गोमा॑तरो॒ यच्छु॒भय॑न्ते अ॒ञ्जिभि॑स् त॒नूषु॑ शु॒भ्रा द॑धिरे वि॒रुक्म॑तः।**
**बाध॑न्ते॒ विश्व॑मभिमा॒तिन॒मप॒ वर्त्मा॑न्येषा॒मनु॑ रीयते॒ घृ॒तम् ॥३॥**

**पदपाठ**–गोऽमा॑तरः। यत्। शु॒भय॑न्ते। अ॒ञ्जिऽभिः॑। त॒नूषु॑। शु॒भ्राः। द॒धि॒रे। वि॒रुक्म॑तः। बाध॑न्ते। विश्व॑म्। अ॒भि॒ऽमा॒तिन॑म्। अप॑। वर्त्मा॑नि। ए॒षा॒म्। अनु॑। री॒य॒ते॒। घृ॒तम् ॥३॥

**अन्वय**—गोमातरः यत् अञ्जिभिः शुभयन्ते तनूषु शुभ्राः विरुक्मतः दधिरे। विश्वम् अभिमातिनम् अपबाधन्ते, एषाम् वर्त्मानि अनु घृतम् रीयते।

**सायणः**—गोमातरः गोरूपा भूमिर्माता येषां ते मरुतः अञ्जिभिः रूपाभिव्यञ्जकैराभरणैः, यत् यदा शुभयन्ते स्वकीयान्यङ्गानि शोभायुक्तानि कुर्वन्ति तदानीं शुभ्रा दीप्ता मरुतः तनुषु स्वशरीरेषु विरुक्मतः विशेषेण रोचमानानलङ्कारान् दधिरे धारयन्ति। अपि च विश्वं सर्वम् अभिमातिनं शत्रुम् अपबाधन्ते हिंसन्ति। एषां मरुतां वर्त्मानि मार्गाननुसृत्य घृतं क्षरणशीलमुदकं रीयते स्रवति। यत्र मरुतो गच्छन्ति वृष्ट्युदकम् अपि तदनुसारेण तत्र गच्छतीत्यर्थः।

**शब्दार्थ—गोमातरः** = पृथिवी माता के पुत्र। **शुभयन्ते** = अलङ्कृत करते हैं। **अञ्जिभिः** = रूप को उज्जवल करने वाले अलङ्कारों से। **शुभ्राः** = श्वेत। **विरुक्भतः** = विशेष रूप से चमकने वाले। **अभिमातिनम्** = शत्रुओं को। **अपबाधन्ते** = मार डालते हैं। **वर्त्मानि अनु** = मार्गों का अनुसरण करके। **घृतम्** = बरसने वाला जल। **रीयते** = बहता है।

**हिन्दी अनुवाद**—गौ अर्थात् पृथिवी रूप माता के पुत्र ये मरुत् देवता जब रूप को उज्ज्वल करते वाले अलङ्कारों से अपने अङ्गों को अलङ्कृत करते हैं, अपने शरीरों पर श्वेत विशेष रूप से चमकने वाले अलङ्कारों को धारण करते हैं और सभी शत्रुओं को मार डालते हैं, तो इनके मार्गों का अनुसरण करके बरसने वाला जल भी बहता है।

**व्याकरण—**

**अञ्जिभिः**–'अञ्ज्' धातु से औणादिक 'इ' प्रत्यय = अञ्जि। तृतीया विभक्ति का बहुवचन।

**विरुक्मतः**–रोचते इति, अर्थ में रुच् + क्विप् = रुक्। विशिष्टा रुक् = विरुक्। 'विरुक् यस्य स' अर्थ में मतुप् प्रत्यय = विरुक्मत्। प्रथमा विभक्ति का बहुवचन।

**शुभ्राः**–'शुभ् दीप्तौ' धातु से 'र' प्रत्यय = शुभ्र।

**अभिमातिमन्**–'अभि + मीञ् हिंसायाम्' धातु से क्त प्रत्यय = अभिमात। 'अभिमातम् अस्य

बैठो और बैठकर मीठे सोमरस रूप अन्न का उपभोग करके तृप्त हो जाओ।

**व्याकरण—**

**रघुष्यदः**–रलयोरभेदः। 'लघु स्यन्दितुं शीलं येषां ते' अर्थ में रघु + स्यन्द् + क्विप् = रघुष्यद्। प्रथमा विभक्ति का बहुवचन।

**विशेष**—मैक्डालन ने 'मादयध्वम्' का अर्थ 'आनन्द लेना' (rejoice) किया है, जबकि सायण ने इसका अर्थ 'तृप्त होना' किया है।

**तेऽवर्धन्त स्वतवसो महित्वना नाकं तस्थुरुरु चक्रिरे सदः।**
**विष्णुर्यद्धावद्वृषणं मदच्युतं वयो न सीदन्नधि बर्हिषि प्रिये ॥७॥**

**पदपाठ**— ते। अवर्धन्त। स्वऽतवसः। महिऽत्वना। आ। नाकम्। तस्थुः। उरु। चक्रिरे। सदः। विष्णुः। यत्। ह। आवत्। वृषणम्। मदऽच्युतम्। वयः। न। सीदन्। अधि। बर्हिषि। प्रिये ॥७॥

**अन्वय**—ते स्वतवसः अवर्धन्त। महित्वना आ नाकं तस्थुः। उरु सदः चक्रिरे। यत् वृषणम् मदच्युतम् विष्णुः ह आवत्, प्रिये बर्हिषि वयः न अधिसीदन्।

**सायण**—ते मरुतः अवर्धन्त वृद्धिं गताः। कीदृशाः। स्वतवसः स्वाश्रयबलाः। नान्यस्य कस्यचिद् बलमपेक्षन्ते। वृद्धिं प्राप्य महित्वना महिम्ना महत्त्वेन नाकं स्वर्गम् आ तस्थुः आस्थितवन्तः। सदः सदनं नभोलक्षणं स्थानं च स्वकीयनिवासाय उरु विस्तीर्णं चक्रिरे। यत् येभ्यो मरुद्भ्यो यदर्थं वृषणं कामाभिवर्षकं मदच्युतं मदस्य हर्षस्य आसेक्तारं यज्ञं विष्णुः ह आवत् विष्णुरेवागत्य रक्षति ते मरुतः वयो न पक्षिणो यथा शीघ्रमागच्छन्ति एवं शीघ्रमागत्य बर्हिषि अधि अस्मदीये यज्ञे प्रिये प्रीतिकरे सीदन् सीदन्तु उपविशन्तु।

**शब्दार्थ—अवर्धन्त** = वृद्धि को प्राप्त हुये। **स्वतवसः** = अपने बल से। **महित्वना** = महिमा से। **नाकम्** = स्वर्ग। **आ तस्थुः** = अधिकार कर लिया है। **उरु** = विस्तृत। **सदः** = आकाश रूपी स्थान को। **आवत्** = रक्षा की है। **वृषणम्** = कामनाओं की पूर्ति करने वाले। **मदच्युतम्** = हर्ष को देने वाले। **वयः न** = पक्षियों के समान। **अधिसीदन्** = आकर बैठें।

**हिन्दी अनुवाद**—वे मरुत् देवता अपने ही बल का आश्रय लेकर वृद्धि को प्राप्त हुये हैं। अपनी महिमा से उन्होंने स्वर्ग पर अधिकार कर लिया है। उन्होंने अपने रहने के लिये विस्तृत आकाश रूपी स्थान को बना लिया है। जिन मरुतों के लिये कामनाओं की पूर्ति करने वाले और हर्ष को देने वाले यज्ञ की स्वयं विष्णु ने ही रक्षा की है। प्रीति देने वाले उस यज्ञ की वेदि पर बिछी कुशा पर मरुत् पक्षियों के समान शीघ्र आकर बैठें।

**व्याकरण—**

**आवत्**–'अव रक्षणे' धातु, लङ् लकार, प्रथम पुरुष, एकवचन। वर्तमान के अर्थ में लङ् लकार।

**मदच्युतम्**–'मदं च्योतयति' अर्थ में मद + च्युत् + क्विप् = मदच्युत्।

**विशेष**—'मदच्युतं वृषणम्' का मैक्डानल ने अर्थ किया है–'मस्त हुआ बैल' (bull reeling with introx ication)। इस बैल की रक्षा विष्णु करते हैं।

शूरा इवेद्युयुधयो न जग्मयः श्रवस्यवो न पृतनासु येतिरे।
भयन्ते विश्वा भुवना मरुद्भ्यो राजान इव त्वेषसंदृशो नरः ॥८॥

पदपाठः

**पदपाठ**—शूराःऽइव। इत्। युयुधयः न जग्मयः। श्रवस्यवः। न। पृतनासु। येतिरे। भयन्ते। विश्वा। भुवना। मरुत्ऽभ्यः। राजानःऽइव। त्वेषऽसंदृशः। नरः ॥८॥

**अन्वय**—शूराः इव इत् युयुधयः न जग्मयः श्रवस्यवः न पृतनासु येतिरे । मरुद्भ्यः विश्वा भुवना भयन्ते । नरः राजानः इव त्वेषसंदृशः ।

**सायण**—इत् इत्येतत् समुच्चये शूरा इवेत् शौर्योपेताः युयुत्सवः पुरुषाः इव च युयुधयः शत्रुभिर्युध्यमानाः पुरुषा इव च जग्मयः शीघ्रं गच्छन्तो मरुतः श्रवस्यवो न श्रवोऽन्नमात्मन इच्छन्तः पुरुषा इव पृतनासु संग्रामेषु येतिरे प्रयतन्ते वृत्रादिभिर्युद्धे व्याप्रियन्ते । तादृशेभ्यः मरुद्भ्यः विश्वा भुवना सर्वाणि भूतजातानि भयन्ते बिभ्यति । ये नरः वृष्ट्यादेर्नेतारो मरुतः राजान इव राजमाना नृपतय इव त्वेषसंदृशः दीप्तसंदर्शना उग्ररूपतया द्रष्टुमशक्या भवन्ति तेभ्य इत्यर्थः ।

**शब्दार्थ**—**युयुधयः** = युद्ध करने की इच्छा करने वाले । **जग्मयः** = तीव्रता से चलने वाले । **श्रवस्यवः** = अन्न या कीर्ति की इच्छा रखने वाले । **पृतनासु** = संग्रामों में । **येतिरे** = प्रयत्न करते हैं । **नरः** = वृष्टि आदि को लाने वाले । **त्वेषसंदृशः** = चमचमाते हुये रूप वाले ।

**हिन्दी अनुवाद**—शौर्य से युक्त पुरुषों के समान और युद्ध करने की इच्छा करने वाले पुरुषों के समान तीव्रता से चलने वाले एवं अपने लिये अन्न या कीर्ति की इच्छा रखने वाले पुरुषों के समान ये मरुत् देवता संग्रामों में प्रयत्न करते हैं । इस प्रकार के मरुतों से सभी लोक डरते हैं । वृष्टि आदि के लाने वाले वे मरुत् उज्ज्वल राजाओं के सामने चमचमाते हुये रूप वाले हैं । अर्थात् उग्र रूप वाला होने के कारण उनकी ओर देखना सम्भव नहीं है ।

**व्याकरण**—

**युयुधयः**–'युध् सम्प्रहारे' धातु से 'उत्सर्गश्छन्दसि' से क्विन् (इ) प्रत्यय । द्वित्व होकर = युयुधि । प्रथमा विभक्ति का बहुवचन ।

**जग्मयः**–गम् + क्विन् = जग्मि । प्रथमा का बहुवचन ।

**श्रवस्यवः**–'श्रवः आत्मने इच्छति' अर्थ में 'वयाच्छन्दसि' सूत्र से 'यु' प्रत्यय । श्रवस् + यु = श्रवस्यु । प्रथमा विभक्ति का बहुवचन ।

**त्वेषसंदृशः**–'त्विष् दीप्तौ', धातु से 'पचाद्यच्' अच् प्रत्यय । त्विष् + अच् (अ) त्वेष । सम् + दृश् + क्विप् = संदृश । त्वेषः संदृक् येषां ते ।

**विशेष**—मैक्डानल के अनुसार 'श्रवस्यवः' का अर्थ 'कीर्ति को चाहने वाले' (fame seeking), 'येतिरे' का अर्थ 'व्यूह-बद्ध खड़ा होना' (have arrayad) और 'त्वेषसंदृशः' का अर्थ 'भयानक आकृति वाले (of terroble aspect) है ।

**त्वष्टा यद्वज्रं सुकृतं हिरण्ययं सहस्रभृष्टिं स्वपा अवर्तयत् ।**
**धत्त इन्द्रो नर्यपांसि कर्तवेऽहन्वृत्रं निरपामौब्जदर्णवम् ॥९॥**

**पदपाठ**— **त्वष्टा । यद् । वज्रम् । सुऽकृतम् । हिरण्ययम् । सहस्रऽभृष्टिम् । सुऽअपाः । अवर्तयत् । धत्ते । इन्द्रः । नरि । अपांसि । कर्तवे । अहन् । वृत्रम् । निः । अपाम् । औब्जत् । अर्णवम् ॥९॥**

**अन्वय**—स्वपाः त्वष्टा यत् सुकृतम् हिरण्ययम् सहस्रभृष्टिम् वज्रम् आवर्तयत् इन्द्रः नरि अपांसि कर्तवे धत्ते । वृत्रम् अर्णवम् अहन् अपाम् निः औब्जत् ।

**शायण**—स्वपाः शोभनकर्मा त्वष्टा विश्वनिर्माता यद्वज्रम् अवर्तयत् इन्द्रं प्रत्यगमयत् दत्तवानित्यर्थः । कीदृशम् । सुकृतं सम्यङ् निष्पादितं हिरण्ययं सुवर्णमयं सहस्रभृष्टिम् अनेकाभिर्धाराभिर्युक्तम् । तद्वज्रम् इन्द्रः धत्ते धारयति । किमर्थम् । नरि । अत्र नृसम्बन्धात् नृशब्देन संग्रामोऽभिधीयते । संग्रामे अपांसि शत्रुहननादिलक्षणानि कर्माणि कर्तवे कर्तुम् । एवं वज्रं धृत्वा तेन वज्रेण वृत्रं वृष्ट्याद्युदकस्यावरकम् अर्णवम् अर्णवोदकेन युक्तं मेघम् अहन् अवधीत् । अपां तेन विरुद्धा अपश्च सः निः औब्जत् निःशेषेण अधोमुखमपातयत् । प्रवृष्टा अकरोदित्यर्थः ।

**शब्दार्थ**—**त्वष्टा** = विश्व की रचना करने वाला देवता । **सुकृतम्** = अच्छी प्रकार से बनाया गया ।

**हिरण्ययम्** = सोने का बनाया हुआ। सहस्रभृष्टिम् = हजारों धारों वाला। **स्वपाः** = उत्तम कार्य करने वाला। **अवर्तयत्** = दिया था। **नरि** = युद्ध में। **कर्तवे** = मुक्त करने के लिये। **अहन्** = मारा। **वृत्रम्** = वर्षा को रोकने वाले वृत्र को। अपाम् = जलों को। **निःऔब्जत्** = नीचे गिरा दिया। **अर्णवम्** = जल से भरे हुये मेघ को।

**हिन्दी अनुवाद**—उत्तम कार्य करने वाले और विश्व की रचना करने वाले त्वष्टा देवता ने अच्छी प्रकार से बनाये गये, सोने के बनाये हुये हजारों धारों वाले जिस वज्र को इन्द्र के लिये दिया था, इन्द्र उस वज्र को युद्ध में जलों को मुक्त करने के लिये अथवा शत्रुहनन आदि कर्मों को करने के लिये धारण करता है। उस इन्द्र ने वर्षा को रोकने वाले वृत्र को, जल से भरे हुये मेघ को मारा तथा जलों को सम्पूर्ण रूप से नीचे गिरा दिया अर्थात् बरसा दिया।

**व्याकरण**—

**हिरण्ययम्**–'हिरण्यस्य विकारः' अर्थ में हिरण्य = मयट्, 'म' का छान्दस लोप = हिरण्यय।

**कर्तवे**–'कर्तुम्' अर्थ में 'कृ' धातु से 'तुमर्थे सेसेन्' तवे (अवे) प्रत्यय।

**औब्जत्**–उब्ज् धातु, लङ् लकार, प्रथम पुरुष, एकवचन।

**अर्णवम्**–'अर्णांसि अस्य सन्ति' अर्थ में 'व' प्रत्यय। अर्णस् + व (स का लोप) = अर्णव।

**विशेष**—मैक्डानल ने 'नरि' का अर्थ 'मनुष्योचित' (manly) और 'अपांसि' का अर्थ 'कार्य' (deeds) किया है।

**ऊर्ध्वं नुनुद्रेऽवतं त ओजसा दादृहाणं चिद्बिभिदुर्वि पर्वतम्।**
**धमन्तो वाणं मरुतः सुदानवो मदे सोमस्य रण्यानि चक्रिरे ॥१०॥**

**पदपाठ—ऊर्ध्वं । नुनुद्रे । अवतम् । ते । ओजसा । दादृहाणम् । चित् । बिभिदुः । वि । पर्वतम् । धमन्तः । वाणम् । मरुतः । सुऽदानवः । मदे । सोमस्य । रण्यानि । चक्रिरे ॥१०॥**

**अन्वय**—ते अवतम् ओजसा ऊर्ध्वम् नुनुद्रे। ददृहाणम् चित् पर्वतम् वि बिभिदुः। सुदानवः मरुतः वाणम् धमन्तः सोमस्य रण्यानि चक्रिरे।

**सायण**—अथेयम् आख्यायिका। गोतम ऋषिः पिपासया पीडितः सन् मरुत उदकं ययाचे। तदनन्तरं मरुतोऽदूरस्थं कूपमुद्धृत्य यत्र स गोतम ऋषिस्तिष्ठति तां दिशं नीत्वा ऋषिसमीपे कूपमवस्थाप्य तत्पार्श्वे आहावं च कृत्वा कृत्वा तस्मिन्नाहावे कूपमुत्सिच्य तमृषिं तेनोदकेन तर्पयाञ्चक्रुः। अयमर्थोऽनयोत्तरया च प्रतिपाद्यते। ते मरुतः अवतम्। अवस्तात्ततो भवतीति अवतः कूपः कूपनामसु च 'अवतः अवटः' (नि० ६.२३.७) इति पठितम्। तम् ऊर्ध्वम् उपरि यथा भवति तथा ओजसा स्वकीयेन बलेन नुनुद्रे प्रेरितवन्तः उत्खातवन्त इत्यर्थः। एवं कूपमूत्खाय ऋषेराश्रमं प्रति नयन्तः मरुतः मार्गमध्ये ददृहाणं प्रवृद्धं गतिनिरोधकं पर्वतं चित् पर्ववन्तं शिलोच्चयमपि वि बिभिदुः विशेषेण बभञ्जुः। सुदानवः शोभनदानास्ते मरुतः वाणं शतसंख्याभिः तन्त्रीभिर्युक्तं वीणाविशेषं धमन्तः वादयन्तः सोमस्य मदे सोमपानेन हर्षे सति रण्यानि स्तुत्यानि रमणीयानि धानानि चक्रिरे स्तोतृभ्यः कुर्वन्ति।

**शब्दार्थ—ऊर्ध्वम्** = ऊपर तक। नुनुद्रे = प्रेरित किया है। **अवतम्** = नीचे तल वाले कुएँ को। **ददृहाणम्** = गतिरोधक पर्व वाले पर्वत को। **बिभिदुः** = तोड़ दिया है। **धमन्तः** = बजाते हुये। **बाणम्** = सौ तारों वाली विशेष प्रकार की वीणा। **सुदानवः** = उत्तम दान करने वाले। **मदे** = प्रसन्नता में। **रण्यानि** = रमणीय धनों को।

**हिन्दी अनुवाद**—उन मरुत् देवताओं के नीचे तल वाले इस कुएँ को अपने बल से ऊपर तक प्रेरित किया है। अर्थात् जिस प्रकार से उसमें ऊपर तक पानी भर जावे, उस प्रकार से खोदा है। उस कुएँ को ऋषि के आश्रम की ओर ले जाते हुये मार्ग में बढ़े हुये गतिरोधक पर्व वाले पर्वत को तोड़ दिया है। उत्तम दान करने वाले इन मरुतों ने सौ तारों वाली एक विशेष प्रकार की वीणा को बजाते हुये सोमपान की प्रसन्नता में रमणीय धनों को उपासकों को प्रदान किया है।

**व्याकरण**—

**ददृहाणम्**–'दृहि बृद्धौ' धातु से लिट् लकार के अर्थ में 'कानच्' प्रत्यय।

**रण्यानि**–रण् धातु से यत् प्रत्यय।

**धमन्तः**–ध्मा + शतृ = धमत्।

**सुदानवः**–शोभनं दानं येषां ते सुदानवः।

**विशेष**—मैक्डानल ने 'रण्यानि' का अर्थ 'यशस्वी कार्य (glorious deeds) किया है। इस सूक्त के सम्बन्ध में एक कथा प्रसिद्ध है। एक बाद प्यास से व्याकुल गोतम ऋषि ने मरुतों से जल माँगा। मरुतों ने एक कुँआ खोदा और उसको उठाकर ऋषि के पास ले अये। वहाँ उन्होंने एक चौबच्चा बनाकर और उसमें कुएँ के जल को भर ऋषि को पिलाया।

**जिह्मं नुनुद्रेऽवतं तया दिशा सिञ्चन्नुत्सं गोतमाय तृष्णजे।**

**आ गच्छन्तीमवसा चित्रभानवः कामं विप्रस्य तर्पयन्त धामभिः ॥११॥**

**पद पाठ**—जिह्मम्। नुनुद्रे। अवतम्। तया। दिशा। असिञ्चन्। उत्सम्। गोतमाय। तृष्णऽजे। आ। गच्छन्ति। ईम्। अवसा। चित्रऽभानवः। कामम्। विप्रस्य। तर्पयन्त। धामऽभिः ॥११॥

**अन्वय**—अवतम् तया दिशा जिह्मं नुनुद्रे, तृष्णजे गोतमाय उत्सम् असिञ्चन्। चित्रभानवः ईम् अवसा आगच्छन्ति, धामभिः विप्रस्य कामम् तर्पयन्त।

**सायण**—मरुतः अवतम् उद्धृतं कूपं यस्यां दिशि ऋषिर्वसति तया दिशा जिह्मं वक्रं तिर्यञ्चं नुनुद्रे प्रेरितवन्तः। एवं कूपं नीत्वा ऋष्याश्रमेऽवस्थाप्य तृष्णजे तृषिताय गोतमाय तदर्थम् उत्सं जलप्रवाहं कूपादुद्धृत्य असिञ्चन् आहावे अवानयन्। एवं कृत्वा ईम् एवं स्तोतारमृषिं चित्रभानवः विचित्रदीप्तयस्ते मरुतः अवसा ईदृशेन रक्षणेन सह आ गच्छन्ति तत्समीपं प्राप्नुवन्ति। प्राप्य च विप्रस्य मेधाविनो गोतमस्य कामम् अभिलाषं धामभिः आयुषो धारकैरुदकैः तर्पयन्त अतपर्यन्।

**शब्दार्थ**—**जिह्मम्** = तिरछा। **नुनुद्रे** = प्रेरित किया। **असिञ्चन्** = भरा। **उत्सम्** = जल प्रवाह को, चौबच्चे को। **गोतमाय** = गोतम ऋषि के लिये। **तृष्णजे** = प्यासे। **आगच्छन्ति** = आये हैं। **अवसा** = रक्षा करने के लिये। **चित्रभानवः** = सुन्दर कान्ति वाले। **कामम्** = इच्छा को। **विप्रस्य** = ब्राह्मण गोतम की। **तर्पयन्त** = तृप्त किया। **धामभिः** = आयु को धारण करने वाले जलों से। ईम् = 'ईम्' शब्द यहाँ निरर्थक है और केवल पादपूर्ति के लिये प्रयुक्त हुआ है।

**हिन्दी अनुवाद**—उन मरुतों ने उस खोदे हुये कुएँ को, जिस दिशा में ऋषि गोतम थे, उस दिशा में तिरछा प्रेरित किया अर्थात् ले गये। वहाँ जाकर उन्होंने प्यासे गोतम ऋषि के लिये चौबच्चे को भरा। इसके बाद सुन्दर कान्ति वाले मरुत ऋषि की रक्षा के लिये आये और उन्होंने आयु को धारण करने वाले जलों से उन ब्राह्मण गोतम ऋषि की इच्छा को तृप्त किया।

**व्याकरण**—

**तृष्णजे**–'ञितृषा' धातु से 'स्वपितृषोर्नजिङ्' से नजिङ् (नज्) प्रत्यय। तृष् + नजिङ् = तृष्णज्। चतुर्थी विभक्ति का एकवचन। अथवा तृष् + नङ् + ङ = तृष्णज।

**धामभिः**–धा + मनिन् = धामन्। तृतीया का बहुवचन।

**विशेष**—मैक्डानल ने 'धामभिः' का अर्थ किया है–अपनी शक्तियों से (by their power)।

**या वः शर्म शशमानाय सन्ति त्रिधातूनि दाशुषे यच्छताधि।**

**अस्मभ्यं तानि मरुतो वि यन्त रयिं नो धत्त वृषणः सुवीरम् ॥१२॥**

**पदपाठ**—या। वः। शर्म। शशमानाय। सन्ति। त्रिऽधातूनि। दाशुषे। यच्छत। अधि। अस्मभ्यम्। तानि। मरुतः। वि। यन्त। रयिम्। नः। धत्त। वृषणः। सुऽवीरम् ॥१२॥

**अन्वय**—मरुतः! वः या त्रिधातूनि शर्म शशमानाय सन्ति, दाशुषे अधियच्छत, तानि अस्मभ्यम् वि यन्त। वृषणः नः सुवीरम् रयिम् धत्त।

**सायण**—हे मरुतः वः युष्माकं सम्बन्धीनि या यानि शर्म शर्माणि सुखानि गृहाणि वा। कीदृशानि। त्रिधातूनि पृथिव्यादिषु त्रिषु स्थानेष्ववस्थितानि शशमानाय युष्मान् स्तुति-भिर्जमानाय दातुं सम्पादितानि। पूर्वोक्तलक्षणानि शर्माणि यानि सन्ति यानि च दाशुषे हविर्दत्तवते यजमानाय अधियच्छत अधिकं प्रयच्छत। हे मरुतः तानि सर्वाणि शर्माणि अस्मभ्यं वि यन्त विशेषेण प्रयच्छत। किञ्च हे वृषणः कामानां वर्षितारो मरुतः नः अस्मभ्यं सुवीरं शोभनैः वीरैः पुत्रादिभिर्युक्तं रयिं धनं धत्त दत्त।

**शब्दार्थ**—**शर्म** = सुख, घर। **शशमानाय** = स्तुति करने वाले उपासकों के लिये। **त्रिधातूनि** = तीन स्थानों पर बने हुये। **दाशुषे** = हवि प्रदान करने वाले यजमान के लिये। **अधियच्छत** = अधिक देते हो। **वियन्त** = विशेष रूप से दो। **रयिम्** = धन को। **वृषणः** = कामनाओं की वर्षा करने वाले। **सुवीरम्** = उत्तम वीर पुत्र आदि से युक्त।

**हिन्दी अनुवाद**—हे मरुतो! तुम्हारे जो तीन स्थानों पर बने हुये सुख अथवा घर स्तुति करने वाले उपासकों के लिये हैं और जिनको तुम हवि प्रदान करने वाले यजमानों के लिये अधिक देते हो, हे मरुतो! उन सुखों को और घरों को हमें भी विशेष रूप से दो। हे कामनाओं की वर्षा करने वाले मरुतो! हमारे लिये उत्तम वीर पुत्र आदि से युक्त धन को दो।

**व्याकरण**—

**शशमानाय**–'शश प्लुतगतौ' धातु से 'चानश्' प्रत्यय = शशमान, चतुर्थी एकवचन।

**यन्त**–'यम् धातु, लोट् लकार, मध्यम पुरुष, बहुवचन।

**बृषणः**–वृष् + कनिन् (अन्) = वृषन्। प्रथमा विभक्ति का बहुवचन।

**विशेष**—मैक्डानल ने 'शशमानाय' का अर्थ 'उत्साही' (zealous man) और 'शर्म' का अर्थ 'शरणस्थल' (shelters) किया है।

अभ्यास—

(१) निम्नलिखित मन्त्रों का हिन्दी में अनुवाद कीजिए—

(क) गोमातरो यच्छुभयन्ते....................३

(ख) वि ये भ्राज्यन्ते सुमखास..............४

(ग) तेऽवर्धन्त स्वतवसो महित्वना..........७

(घ) त्वष्टा यद्वज्रं सुकृतं.....................९

(२) निम्नलिखित शब्दों पर व्याकरणात्मक टिप्पणी लिखिए—

(क) उक्षितासः।

(ख) जग्मयः।

(ग) क्षमन्तः।

(घ) शशमानाय।

(ङ) यन्त।

# इकाई-५ वैदिक सूक्त

## इकाई की रूपरेखा

५.० अश्विन् सूक्त

५.१ विश्वामित्र नदी संवाद

५.२ अग्नि सूक्त

५.३ अक्ष सूक्त

**उद्देश्य**—इस यूनिट में निम्नलिखित सूक्तों के मन्त्रों की व्याख्या से परिचित कराया जायेगा।

## ५.० अश्विन्सूक्तम्

**वेद-ऋग्वेद** **मण्डल संख्या-१** **सूक्त संख्या-११६**

**ऋषि-कक्षीवान्** **देवता-अश्विनौ** **छन्द-त्रिष्टुप्**

**नासत्याभ्यां बर्हिरिव प्र वृञ्जे**
**स्तोमाँ इयर्म्यभ्रियेव वातः ।**
**यावर्भगाय विमदाय जायां**
**सेनाजुवा न्यूहतू रथेन ॥१॥**

**पदपाठ**— नासत्याभ्याम् । बर्हिःऽइव । प्र । वृञ्जे । स्तोमान् । इयर्मि । अभ्रियाऽइव । वातः ॥ यौ । अर्भगाय । विऽमदाय । जायाम् । सेनाऽजुवा । निऽऊहतुः । रथेन ॥१॥

**सा० भा०**— बर्हिरिव यथा कश्चिद्यजमानो यागार्थं बर्हिः प्र वृञ्जे प्रकर्षेण अन्यू-नानतिरिक्तं यागाय पर्याप्तं दर्भं वृङ्क्ते छिनत्ति सम्पादयतीति यावत् । एवमहं नासत्या-भ्याम् अश्विभ्यां स्तोमान् स्तुतीः इयर्मि सम्पादयामि । एतदेव विशदीक्रियते । अभ्रियेव । यथा अभ्रियाणि अभ्रेषु मेघेष्ववस्थिता-न्युदकानि वातः वायुः वर्षणार्थं बहुशः प्रेरयति एवमहम् अश्विभ्यां स्तोत्राणि इयर्मि बहुशः प्रेरयामि । कीदृशावश्विनौ। अर्भगाय बालाय स्वयंवरलब्धभार्याय विमदाय एतत्संज्ञाय राजर्षये मध्येमार्गं स्वयंव-रार्थमागतैः ताम् अलभमानेरन्यैर्नृपैः सह योद्धुमशक्नुवतेऽपि तस्मै सेनाजुवा शत्रुसेनायाः प्रेरकेण शत्रुभिः दुःप्रापेण रथेन यौ अश्विनौ जायां भार्यां परैरनुक्रान्तां न्यूहतुः शत्रून्निहत्य तदीयं गृहं प्रापयामासतुः । ताभ्यामित्यर्थः ॥ नासत्याभ्याम् सत्सु भवौ सत्यौ । न सत्यौ असत्यौ न असत्यौ नासत्यौ । 'नभ्राण्नपात्०' इत्यादिना नञः प्रकृतिभावः। अव्यय-पूर्वपदप्रकृतिस्वरत्वम् । वृञ्जे । 'वृजी वर्जने' । आदादिकः । इदित्वात् नुम्। 'लोपस्त आत्मनेपदेषु' इति तलोपः । इयर्मि । 'ऋ गतौ' जौहोत्यादिकः । 'अर्तिपिपर्त्योश्च' इति अभ्यासस्य इत्वम् । 'अभ्यासस्यासवर्णे' इति इयङ् । अभ्रियेव । 'समुद्राभ्राद्धः' इति भवार्थे घः । घस्य इयादेशः । 'शेश्छन्दसि बहुलम्' इति शेर्लोपः। अर्भगाय । 'अर्ति-गृभ्यां भन्' (उ०सू० ३.४३२) इति अर्तेर्भन् । अर्भः एवार्भकः । 'संज्ञायां कन्' (पा०सू० ५.३.८७) । छान्दसो गकारः । अपर आह । अर्भमल्पं गायति शब्दयतीत्यर्भगः । 'कै गै शब्दे' । 'गापोष्टक् (पा०सू० ३.२.८) । 'आतो लोप इटि च' इति आकारलोपः । तदेतत् पदकृतः शाकल्यस्य अभिमतम् । सेनाजुवा । जु इति सौत्रो धातुर्गत्यर्थः। अस्मादन्तर्भावितण्यर्थात् 'क्विब्वचिप्रच्छि०' इत्यादिना क्विब्दीर्घौ । तन्वादित्वादुवङ् (पा०सू० ६.४.७७.१) । न्यूहतुः । 'वह प्रापणे' लिटि अतुसि यजादित्वात् सम्प्रसारणम् । 'यद्वृत्तान्नित्यम्' इति निघातप्रतिषेधः ॥

**अन्वय**— नासत्याभ्यां बर्हिःइव स्तोमान् प्र वृञ्जे, वातः अभ्रियेव इयर्मि, यौ अर्भगाय विमदाय जायां सेनाजुवा रथेन न्यूहतुः ।

**पदार्थ**— नासत्याभ्याम् = दोनों नासत्यों (अश्विनों) के लिए, जो असत्य न हों ऐसे नासत्यों के

लिए । ब्रर्हि: इव = (पवित्र) कुश के समान । स्तोमान् = स्तोत्रों को, स्तुतियों को, प्रार्थनाओं को । प्रवृञ्जे = प्रकृष्ट रूप से सजाता हूँ, विस्तृत करता हूँ, फैलाता हूँ । वात: = वायु । अभ्रियेव = जिस प्रकार मेघ को । इयर्मि = भेजता हूँ । यौ = जिन दोनों (अश्विनों) ने । अर्भगाय = युवक के लिए । विमदाय = विमद के लिए । जायाम् = पत्नी को । सेनाजुवा = बाण के समान चलने वाले । रथेन = रथ से । न्युहतु: = लाया ।

**अनुवाद**— (उन) दोनों नासत्यों (अश्विनों) के लिए पवित्र कुश के समान स्तोत्रों (स्तुतियों) को सजाता (फैलाता) हूँ (और) जिस प्रकार वायु मेघ को (भेजता है) उसी प्रकार मैं (उन स्तोत्रों को उनके पास) भेजता हूँ, जिन दोनों (अश्विनों) ने युवक विमद के लिए पत्नी को (अपने) बाण के समान चलने वाले रथ से लाया ।

**व्याकरण**—

१. प्र वृञ्जे – प्र + √वृज् आत्मनेपद, लट् उत्तमपुरुष, एकवचन ।

२. इयर्मि – √ऋि (जाना) + लट्, उत्तमपुरुष, एकवचन ।

३. अर्भकाय – अर्भक शब्द, चतुर्थी, एकवचन ।

४. सेनाजुवा – सेना + √जु ।

५. न्यूहतु: – नि + √वह् (ले जाना) + लिट्, प्रथमपुरुष, द्विव॰ ।

**वीळुपत्मभिराशुहेमभिर्वा**
**देवानां वा जूतिभि:शाशदाना ।**
**तद्रासभो नासत्या सहस्त्र-**
**माजा यमस्य प्रधने जिगाय ॥२॥**

**पदपाठ**— **वीळुपत्मऽभि: । आशुहेमऽभि: । वा । देवानाम् । वा । जूति-ऽभि: । शाशदाना ॥ तत् । रासभ: । नासत्या । सहस्त्रम् । आजा । यमस्य । प्रऽधने । जिगाय ॥**

**सा०भा०**— वीळुपत्मभि: । वीड्विति बलनाम । बलवदुत्पतनै: आशुहेमभि: शीघ्रगमनै: । वाशब्द: समुच्चये । हे नासत्या अश्विनौ एवंभूतैरश्वैश्च देवानाम् इन्द्रादीनां जूतिभि: प्रेरणैश्च शाशदाना शाशद्यमानौ अत्यर्थं प्रेर्यमाणयोर्युवयोर्वाहनभूतो य: रासभ: प्रजापतिना दत्त: स: यमस्य वैवस्वतस्य प्रीतिकरे प्रधने प्रकीर्णधनोपेते आजा आजौ सङ्ग्रामे तत् शत्रूणां सहस्रं जिगाय जितवान् । वैवस्वतो हि बहूनां मरणहेतुना सङ्ग्रामेण तुष्टो भवति । यद्वा । जेतव्यत्वेन प्रजापतिना निहितं ऋक्सहस्रं शीघ्र-गमनयुक्तो रासभो जिगाय जयेनालभत । अन्येभ्य: देवेभ्य: पूर्वमेवाजिं प्राप्य युवां प्रापयामास । तथा चास्मिन्नर्थे 'प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत्' (ऐ०ब्रा० ४.७) इत्यादिकं ब्राह्मणमनुसन्धेयम्॥ वीळुपत्मभि: । वीळु बलवत्पतन्तीति वीळुपत्मान: । आशुहे- मभि: । आशु शीघ्रं हिन्वन्ति गच्छन्तीति आशुहेमान । तै: । 'हि गतौ वृद्धौ च' । अन्येभ्योऽपि दृश्यन्ते' इति मनिन् । कृदुत्तरपदप्रकृतिस्वरत्वम्। जूतिभि: । उतियूति-जूति०' इत्यादिना क्तिन उदात्तत्वम् । शाशदाना । 'शद्लृ शातने' । अत्र गत्यर्थो धातूनामनेकार्थत्वात् । अस्मात् यङन्तात् लट: शानच् । तस्य 'छन्दस्युभयथा' इति आर्धधातुकत्वात् शबभाव: । अतोलोपयलोपौ । 'अभ्यस्तानामादि:, इत्याद्युदात्तत्वम् । 'सुपां सुलुक्०' इति षठ्या: पूर्वसवर्णदीर्घ: । आजा । तेनैव सूत्रेण डादेश: । जिगाय । 'जि जये' । 'सन्लिटोर्जे:' इति अभ्यासादुत्तरस्य कुत्वं गकार: ॥

**अन्वय**— नासत्या, वीळुपत्मभि: देवानां वा जूतिभि: शाशदाना तत् रासभ: यमस्य प्रधने आजा सहस्रं जिगाय ।

**पदार्थ**— नासत्या = हे दोनों अश्विनो ! वीळुपत्मभिः = मजबूत पङ्खों से। आशुहेमभिः = शीघ्रगामी अश्वों से। देवानाम् वा = और देवताओं के। जूतिभिः = प्रेरणा से। शाशदाना = जीतते हुए। रासभः = खच्चर ने। यमस्य = यम के। प्रधने = धनयुक्त। आजा = रथदौड़ प्रतियोगिता में। तत् = उन। सहस्रम् = हजार को। जिगाय = जीत लिया।

**अनुवाद**— हे दोनों अश्विनों, मजबूत पङ्खों से, शीघ्रगामी अश्वों से और देवताओं की प्रेरणा से जीतते हुए (आप के) खच्चर ने यम के (द्वारा आयोजित) प्रचुर धनयुक्त रथदौड़ प्रतियोगिता में उन हजार (संख्या वाले प्रतियोगियों) को जीत लिया।

**व्याकरण**—

१. वीळुपत्मभिः – वीळुपत्मन्, तृतीया बहुवचन। पत्मन् = √पत् (उड़ना) + मनिन्।

२. नासत्या – नासत्य के सम्बोधन द्विवचन में वैदिकरूप, लौकिक संस्कृत में नासत्यौ रूप बनेगा।

३. आशुहेमभिः – आशुहेमन् का तृतया बहुवचन। आशुं + √हि + मनिन्।

४. जूतिभिः – जूति का तृतीया बहुवचन। जूति = √जू + क्तिन्।

५. शाशदाना – √शद् + शानच्, यङ्लुगन्त।

६. आजा – सप्तमी एकवचन का वैदिक रूप, लौकिक संस्कृत में आजि रूप होता है।

७. जिगाय – √जी + लिट् प्रथमपुरुष, एकवचन।

**तुग्रो॑ ह भुज्युम॑श्विनोदमे॒घे**
**र॒यिं न कश्चि॑न्ममृ॒वाँ अवा॑हाः।**
**तमू॑हथुर्नौ॒भिरा॑त्म॒न्वती॑भि-**
**रन्तरिक्ष॒प्रुद्भि॒रपो॑दकाभिः ॥३॥**

**पदपाठ**— **तुग्रः। ह॒। भु॒ज्युम्। अ॒श्वि॒ना। उ॒द॒ऽमे॒घे। र॒यिम्। न। कः। चि॒त्। म॒मृ॒ऽवान्। अव॑। अ॒हाः॥ तम्। ऊ॒ह॒थुः। नौ॒भिः। आ॒त्म॒न्ऽवती॑भिः। अ॒न्त॒रि॒क्ष॒प्रुत्ऽभिः। अप॑ऽउदकाभिः ॥३॥**

**सा० भा०**— अत्रेयमाख्यायिका। तुग्रो नाम अश्विनोः प्रियः कश्चिद्राजर्षिः। स च द्वीपान्तरवर्तिभिः शत्रुभिरत्यन्तमुपद्रुतः सन् तेषां जयाय स्वपुत्रं भुज्युं सेनया सह नावा प्राहेषींत्। सा च नौः मध्येसमुद्रमतिदूरं गता वायुवशेन भिन्ना आसीत्। तदानीं सः भुज्युः शीघ्रम् अश्विनौ तुष्टाव। तौ च स्तुतौ सेनया सहितम् आत्मीयासु नौषु आरोप्य पितुस्तुग्रस्य समीपं त्रिभिरहोरात्रैः प्रापयामासतुरिति। अयमर्थः इदमादिकेन तृचेन प्रति-पाद्यते। हशब्दः प्रसिद्धौ। तुग्रः खलु पूर्वं शत्रुभिः पीडितः सन् तज्जयार्थम् उदमेघे। उदकैर्मिह्यते सिच्यते इति उदमेघः समुद्रः तस्मिन् भुज्युम् एतत्संज्ञं प्रियं पुत्रम् अवाहाः। नावा गन्तुं पर्यत्याक्षीत्। तत्र दृष्टान्तः। ममृवान् म्रियमाणः सन् धनलोभी कश्चित् मनुष्यः रयिं न यथा धनं परित्यजति तद्वत्। हे अश्विनौ तं च भुज्युं मध्येसमुद्रं निमग्नं नौभिः पितृसमीपम् ऊहथुः युवां प्रापितवन्तौ। कीदृशीभिः। आत्मन्वतीभिः आत्मीयाभिः युवयोः स्वभूताभिरित्यर्थः। यद्वा। धृतिरात्मा धारणवतीभिरित्यर्थः। अन्तरिक्षप्रुद्भिः अतिस्वच्छ-त्वादन्तरिक्षे जलस्य उपरिष्टादेव गन्त्रीभिः अपोदकाभिः सुश्लिष्टत्वात् अपगतोदकाभिः अप्रविष्टोदकाभिरित्यर्थः॥ उदमेघे। 'मिह सेचने'। कर्मणि घञ्। 'न्यङ्क्वादीनां च' (पा०सू० ७.३.५३) इति कुत्वम्। 'उदकस्योदः संज्ञायाम्' (पा० सू० ६.३.५७) थाथादिना उत्तरपदान्तोदात्तत्वम। ममृवान्। 'मृङ् प्राणत्वयागे'। लिटः क्वसुः। क्रमादि-नियमात् प्राप्तस्य इटः 'वस्वेकाजाद्धसाम्' इति नियमात् अभावः। अहाः। 'ओहाक् त्यागे'। लुङि तिपि च्लेः सिच्। आगमानुशासनस्यानित्यत्वात् सगिटौ न क्रियेते। 'बहुलं छन्दसि' इति इडभावः। 'हल्ङ्याब्भ्यः' इति तिलोपः। रुत्वविसर्गौ। यद्वा। 'मन्त्रे घस०' इति च्लेर्लुक्। च्लेर्लुप्तत्वात् इण् न क्रियते। नौभिः। 'सावेकाचः०' इति विभक्तेरुदात्तत्वम्। आतमन्वतीभि। आत्मनो मतुप्। 'मादुपधायाः'

इति वत्वम् । 'अनो नुट्' (पा०सू० ८.२.१६) इति नुट् । नलोपः । 'ह्रस्वनुड्भ्यां मतुप्' इति मतुप उदात्तत्वम् । अन्तरिक्षप्रुद्भिः । 'प्रुङ् गतौ' । 'क्विप् च' इति क्विप् ॥

**अन्वय**— अश्विना, कश्चित् ममृतवान् रयिं न तुग्रः भुज्युम् उदमेघे अहाः, तम् आत्मन्वतीभिः अन्तरिक्षप्रुद्भिः अपोदकाभिः नौभिः ऊहथुः ।

**पदार्थ**—अश्विना = हे दोनों अश्विनो ! कश्चित् = कोई । ममृतवान् = मरने वाला । रयिं न = धन के समान । तुग्रः = तुग्र (नामक राजर्षि) ने । भुज्युम् = भुज्यु (नामक अपने पुत्र) को । उदमेघे = समुद्र में । अहाः = छोड़ दिया । तम् = उस (भुज्यु) को । आत्मन्वतीभिः = प्राण वाली । अन्तरिक्षप्रुद्भिः = समुद्र के ऊपर चलने (तैरने) वाली । अपोदकाभिः = अन्दर जल न जाने वाली । नौभिः = नौकाओं से । ऊहथुः = तुम दोनों ले आये ।

**अनुवाद**— हे दोनों अश्विनों, जिस प्रकार (कोई) मरने वाला धन को (छोड़ देता है) उसी प्रकार तुग्र (नामक राजर्षि) ने भुज्यु (नामक पुत्र) को समुद्र में छोड़ दिया । उस (भुज्यु) को तुम दोनों प्राण वाली, समुद्र पर चलने (तैरने) वाली और अन्दर जल न जाने वाली नौकाओं से (घर) ले आये ।

**व्याकरण**—

१. ममृतवान् – √मृ + क्वसु, प्रथमा एकवचन ।

२. अहाः – √हा + लुङ् प्रथमपुरुष एकवचन, वैदिकरूप ।

३. ऊहथुः– √वह् + लिट्, मध्यमपुरुष द्विवचन ।

४. आत्मन्वतीभिः – आत्मन् + मतुप्, तृतीया बहुवचन ।

५. अन्तरिक्षप्रुद्भिः – अन्तरिक्षप्रुत् का तृतीया बहुवचन । प्रुत् = √प्रु + क्विप् ।

**तिस्रः क्षपस्त्रिरहातिव्रजद्भि-**
**र्नासत्या भुज्युमूहथुः पतङ्गैः ।**
**समुद्रस्य धन्वन्नार्द्रस्य पारे**
**त्रिभी रथैः शतपद्भिः षळश्वैः ॥४॥**

पदपाठ— तिस्रः । क्षपः । त्रिः । अहा । अतिव्रजत्ऽभिः । नासत्या । भुज्युम् । ऊहथुः । पतङ्गैः ॥ समुद्रस्य । धन्वन् । आर्द्रस्य । पारे । त्रिऽभिः । रथैः । शतपत्ऽभिः । षट्ऽअश्वैः ॥४॥

**सा० भा०**— हे नासत्यौ सेनया सह उदके निमग्नं भुज्युं तिस्रः क्षपः त्रिसङ्ख्याका रात्रीः त्रिरहा त्रिवारमावृत्तान्यहानि च अतिव्रजद्भिः अतिक्रम्य गच्छद्भिरेतावन्तं काल-मतिव्याप्य वर्तमानैः पतङ्गैः पतद्भिः त्रिभिः त्रिसङ्ख्याकैः रथैः ऊहथुः युवामूढवन्तौ । क्वेति चेत् उच्यते । समुद्रस्य अम्बुराशेर्मध्ये धन्वन् धन्वनि जलवर्जिते प्रदेशे आर्द्रस्य उदकेनार्द्रीभूतस्य समुद्रस्य पारे तीरदेशे कथंभूतै रथैः । शतपद्भिः शतसङ्ख्याकैश्चक्रलक्षणैः पादैरुपेतैः षळश्वैः षड्भिरश्वैर्युक्तैः ॥ तिस्रः । 'त्रिचतुरोः स्त्रियाम्' इति तिस्रा-देशः । स चान्तोदात्तः । 'अचि र ऋतः' इति रेफादेशे 'उदात्तयणो हल्पूर्वात्' इति विभक्तेरुदात्तत्वम् । क्षपः । विभक्त्यन्तस्य छान्दसं ह्रस्वत्वम् । यद्वा । शति 'आतः' इति योगविभागादधातोरपि आकारलोपः। अहा । 'शेश्छन्दसि बहुलम्' इति शेर्लोपः । पतङ्गैः 'पत्लृ गतौ' । 'पतेरङ्गच्०' (उ०सू० १.११६)। धन्वन् । 'धविर्गत्यर्थः' । इदित्त्वात् नुम् । 'कनिन्युवृषि०' इत्यादिना कनिन् । 'सुपां सुलुक्०' इति सप्तम्या लुक् । शतपद्भिः । शतं पादा येषाम् । 'सङ्ख्यासुपूर्वस्य' इति पादशब्दस्यान्त्यलोपः समासान्तः। अयस्मयादित्वेन भत्वात् 'पादः 'पत्' इति पद्भावः । यद्वा । पादसमानार्थः पच्छब्दः प्रकृत्यन्तरं द्रष्टव्यम् ॥

**अन्वय**— नासत्या, तिस्रः क्षपः त्रिः अहा अतिव्रजद्भिः शतपद्भिः षळश्वैः पतङ्गैः त्रिभिः रथैः भुज्युम् आर्द्रस्य समुद्रस्य पारे धन्वन् ऊहथुः ।

**पदार्थ**— नासत्या = हे दोनों अश्विनो ! तिस्रः = तीन । क्षपः = रात्रियों । त्रिः = तीन । अहा = दिनों । अतिव्रजद्भिः = लगातार चलने वाले । शतपद्भिः = सौ पैरों वाले । षडश्वैः = छः अश्वों से युक्त । पतङ्गैः = उड़ने वाले । त्रिभिः = तीन । रथैः = रथों से । भुज्यम् = (तुग्र के पुत्र) भुज्यु को । आर्द्रस्य = जल वाले । समुद्रस्य = समुद्र के । पारे = पार में । धन्वन् = सूखे स्थल पर । ऊहथुः = ले आये ।

**अनुवाद**— हे दोनों अश्विनों, तीन रात्रियों (और) तीन दिनों तक लगातार चलने वाले, सौ पैरों वाले, (तथा) छः अश्वों से युक्त उड़ने वाले तीन रथों से (तुग्र के पुत्र) भुज्यु को जल वाले समुद्र के पार सूखे स्थल पर ले आये ।

**व्याकरण**—

१. धन्वन् – धन्वन् का सप्तमी एकवचन, वैदिक रूप, लौकिक संस्कृत में धन्वनि । धन्वन् = √धौ + कनिन् ।

२. शतपद्भिः – शतं पदाः येषां तैः (बहुव्रीहि) ।

**अनारम्भणे तदवीरयेथा-**
**मनास्थाने अग्रभणे समुद्रे ।**
**यदश्विना ऊहथुर्भुज्युमस्तं**
**शतारित्रां नावमातस्थिवांसम् ॥५॥**

**पदपाठ**— **अनारम्भणे । तत् । अवीरयेथाम् ।** अनास्थाने । **अग्रभणे । समुद्रे ॥ यत् । अश्विनौ । भुज्युम् । ऊहथुः । अस्तम् । शतऽअरित्राम् ।** नावम् । **आतस्थिऽवांसम् ॥५॥**

**सा०भा०**— हे अश्विनौ अनारम्भणे आलम्बनरहिते समुद्रे तत् कर्म अवीरये-थाम् । विक्रान्तं कृतवन्तौ युवाम् । अनारम्भणत्वमेव स्पष्टीकरोति । अनास्थाने । आस्थीयते अस्मिन् इति आस्थानो भूप्रदेशः । तद्रहिते स्थातुमशक्ये जले इत्यर्थः । अग्रभणे अग्रहणे । हस्तेन ग्राह्यं शाखादिकमपि यत्र नास्ति तस्मिन् इत्यर्थः । किं पुनस्तत्कर्म । भुर्ज्यु समुद्रे मग्नं शतारित्रां बह्वरित्राम् । यैः काष्ठैः पार्श्वतो बद्धैर्जलालोडन सति नौः शीघ्रं गच्छति तानि अरित्राणि । ईदृशीं नावम् आतस्थिवांसम् । आस्थित-वन्तमारूढवन्तं कृत्वा । अस्तम् । गृहनामेतत् । पितुस्तुग्रस्य गृहं प्रति यत् ऊहथुः । तत्प्रापणमन्यैर्दुःशकं युवां समुद्रमध्ये कृतवन्तावित्यर्थः ॥ अनारम्भणे । आर-भ्यते इत्यारम्भणम् । 'कृत्यल्युटो बहुलम्' इति कर्मणि ल्युट् । 'नञ्सुभ्याम्' इत्युत्तर-पदान्तोदात्तत्वम् । अवीरयेथाम् । 'शूर वीर विक्रान्तौ' । चुरादिरात्मनेपदी। अनास्थाग्रभणयोः पूर्ववत् ल्युट्स्वरौ । अयं तु विशेषः । 'हृग्रहोर्भः०' इति भत्वम् । अस्तम् । अस्यते अस्मिन् सर्वमित्यस्तं गृहम् । 'असिहसि०' इत्यादिना तन्प्रत्ययः । शतारित्राम् । 'ऋगतौ' । 'अर्तिलूघूसू०' (पा०सू० ३.२.१८४) इति करणे इत्रप्रत्ययः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

**अन्वय**— अश्विनौ, यत् शतारित्रां नावं आतस्थिवासं भुज्युम् अस्तम् ऊहथुः । अनारम्भणे अनास्थाने अग्रभणे समुद्रे तत् अवीरयेथाम् ।

**पदार्थ**— अश्विनौ = हे दोनों अश्विनों ! यत् = जो । शतारित्राम् = सौ डाड़ों वाली । नावम् = नाव पर । आतस्थिवासं = बैठाये हुए, बैठाकर । भुज्युं = भुज्यु को । अस्तम् = घर को । ऊहथुः = ले आये । अनारम्भणे = आलम्बन (आश्रय) से रहित । अनास्थाने = (खड़े होने के) स्थान से रहित । अग्रभणे = किसी पकड़ने के आश्रय से विहीन । समुद्रे = समुद्र में । तत् = वह । अवीरयेथाम् = वीरता (बहादुरों) का कार्य किया ।

**अनुवाद**— हे दोनों अश्विनों, तुम दोनों जो सौ डाड़ों वाले नाव पर बैठाकर भुज्यु को घर को ले

आये, वह तुम दोनों ने आलम्बन (आश्रय) से रहित, खड़े होने के स्थान से रहित और किसी पकड़ने के माध्यम से रहित समुद्र में वीरता (बहादुरी) का काम किया।

**व्याकरण—**

१. अनारम्भणे – नञ् + आ + √रम् + ल्युट्, सप्तमी, एकवचन।

२. अवीरयेथाम् – √वीर् (वीरता) आत्मनेपद लङ्, मध्यमपुरुष, द्विवचन।

३. अग्रभणे – नञ् + ग्रम् (पकड़ना) +ल्युट् सप्तमी, एकवचन।

४. शतारित्राम् – शत अरित्रः यस्मिन् तत् बहुव्रीहि। अरित्रः = √ऋ (जाना) + इत्र।

५. आतस्थिवांसम् – आ √स्था + क्वसु, द्वितीया, एकवचन।

**यम॑श्विना द॒दथुः॑ श्वे॒तमश्वं॑-**
**म॒घाश्वा॑य॒ शश्व॒दित्स्व॒स्ति।**
**तद्वां॑ दा॒त्रं महि॑ की॒र्तेन्यं॑ भू-**
**त्पै॒द्वो वा॒जी सद॒मिद्धव्यो॑ अ॒र्यः ॥६॥**

**पदपाठ—** यम्। अ॒श्वि॒ना। द॒दथुः॑। श्वे॒तम्। अश्व॑म्। अ॒घऽअ॑श्वाय। शश्व॑त्। इत्। स्व॒स्ति॥ तत्। वा॒म्। दा॒त्रम्। महि॑। की॒र्तेन्य॑म्। भू॒त्। पै॒द्वः। वा॒जी। सद॑म्। इत्। हव्यः॑। अ॒र्यः॥६॥

**सा० भा०—** अत्रेदमाख्यायते। पेदुर्नाम कश्चित् स चाश्विनौ तुष्टाव। तस्मै प्रीतौ कश्चिच्छ्वेतवर्णमश्वं दत्तवन्तौ। स चाश्वस्तस्य प्रौढं जयं चकारेति। एतदत्र प्रतिपाद्यते। हे अश्विनौ युवाम् अघाश्वाय अहन्तव्याश्वाय। पेदुनाम्ने राजर्षये यं श्वेतवर्णम् अश्वं ददथुः दत्तवन्तौ सोऽश्वस्तस्मै स्वस्ति जयलक्षणं मङ्गलं शश्वत् इत् नित्यमेव चकार। वां युवयोः तत् दात्रं दानं महि महदतिगम्भीरम् अत एव कीर्तेन्यं सर्वैः कीर्तनीयं प्रशस्यं भूत् अभूत। तस्मात् पैद्वः पेदोः सम्बन्धी पतनशीलः शीघ्रगामी वा अर्यः शत्रूणां प्रेरयिता युद्धेषु प्रेरयितव्यो वा वाजी वेजनवान् सोऽश्वः सदमित् सदैव हव्यः अरगाभिरप्याह्वातव्यः॥ दात्रम्। ददातेर्भावे औणादिकः त्रप्रत्ययः। महि। 'मह पूजायाम्'। 'इत्सर्वधातुभ्यः' इति इन्। कीर्तेन्यम्। 'कृत संशब्दने'। 'कृत्यार्थे तवैकेन्केन्यत्वनः' इति केन्यप्रत्ययः। 'ऋद्धातोः' इति इत्वम्। भूत्। 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः। पैद्वः। पेदोः सम्बन्धी। 'तस्येदम्' इति अण्। छान्दसो वर्ण-लोपः। हव्यः ह्वयतेः 'अचो यत्' इति यत्। 'बहुलं छन्दसि' इति सम्प्रसारणम्। गुणः। 'धातोस्तन्निमित्तस्यैव' इति अवादेशः। अर्यः। 'ऋ गतौ'। 'अघ्न्यादयश्च' (उ०सू० ४.५५१) इति औणादिको यत्। व्यत्ययेनान्तोदात्तत्वम्॥

**अन्वय—** अश्विना, अघाश्वाय यं श्वेतम् अश्वम् ददथुः तत् शश्वत् इत् स्वस्ति। वां तत् महि दात्रं कीर्तेन्यं भूत्, पैद्वः वाजी अर्यः इत् सदम् हव्यः (भूत्)।

**पदार्थ—** अश्विना = हे दोनों अश्विनो! अघाश्वाय = दुष्ट (नीच) अश्व वाले के लिए। यं = जिस। श्वेतम् = श्वेत वर्ण वाले। अश्वम् = अश्व को। ददथुः = तुम दोनों ने दिया। तत् = वह। शश्वत् = नित्य, सदा के लिए। इत् = निश्चित रूप से। स्वस्ति = मङ्गलकारक हो गया। वां = तुम दोनों का। तत् = वह। महि = महान्। दात्रम् = दान। किर्तेन्यम् = कीर्ति (यश, प्रशंसा) के योग्य। भूत् = हुआ। पैद्वः = पेदु का। बाजी = (वह) अश्व। अर्यः = स्वामी (मालिक) के लिए। इत् = निश्चित रूप से। सदम् = सदा के लिए। हव्यः = स्तुत्य, प्रशंसनीय।

**अनुवाद—** हे दोनों अश्विनों, दुष्ट (नीच) अश्व वाले के लिए जिस श्वेत वर्ण अश्व को तुम दोनों ने दिया, वह (अश्व) सदा के लिए निश्चित रूप से मङ्गलकारक हो गया। तुम दोनों का ~~वह~~ महान् दान

कीर्ति (यश या प्रशंसा) के योग्य हो गया, पेदु का (वह) अश्व स्वामी के लिए निश्चितरूप से सदा के लिए प्रशंसनीय (स्तुत्य) (हो गया)।

**व्याकरण**—

१. ददथुः – √दा (देना) + लिट्, मध्यमपुरुष द्विवचन।

२. अघाश्वाय – अघ अश्वः यस्य तस्मै (बहुव्रीहि)।

३. भूत् – √भू + लुङ्, प्रथमपुरुष एकवचन।

४. हव्यः – हव + यत्।

५. अर्यः – √ऋ (जाना) + यत्।

**युवं नरा स्तुवते पंज्रियाय**
**कक्षीवते अरदतं पुरंधिम्।**
**कारोतराच्छफादश्वस्य वृष्णः**
**शतं कुम्भाँ असिञ्चतं सुरायाः ॥७॥**

**पदपाठ**— युवम्। नरा। स्तुवते। पज्रियाय। कक्षीवते। अरदतम्। पुरम्ऽधिम्। कारोतरात्। शफात्। अश्वस्य। वृष्णः। शतम्। कुम्भान्। असिञ्चतम्। सुरायाः ॥७॥

**सा० भा०**— अत्रेयमाख्यायिका। कक्षीवानृषिः पुरा तमसा तिरोहितज्ञानः सन् ज्ञातार्थमश्विनौ तुष्टाव। तस्मै अश्विनौ प्रभूतां धियं दत्तवन्ताविति। तदाह। हे नरा नेतारावश्विनो युवं युवां पज्रियाय। पज्रा इत्यङ्गिरसाम् आख्या 'पज्रा वा अङ्गिरस' इत्याम्नातत्वात्। तेषां कुले जाताय कक्षीवते। कक्ष्या रज्जुरश्वस्य। तद्वते तत्संज्ञाय स्तुवते युवयोः स्तुतिं कुर्वते मह्यं पुरन्धिं प्रभूतां धियं बुद्धिम् अरदतं व्यलिखतम्। यथा सर्वार्थगोचरा भवति तथा कृतवन्तावित्यर्थः। अपि च कारोतरात् कारोतरो नाम वैदलश्चर्मवेष्टितो भाजनविशेषो यस्मिन् सुरायाः स्त्रावणं क्रियते। लुप्तोपममेतत्। कारोत् यथा सुरायाः सम्पादकाः तां स्त्रावयन्ति एवमेव युवां वृष्णः सेचनसमर्थस्य युष्मदीयस्य अश्वस्य शफात् खुरात् सुरायाः शतं कुम्भान् असङ्ख्यातान् सुराघटान् असिञ्चतम् अक्षा-रयतम्। यद्वा। सिञ्चति पूरणार्थः। कारोतरस्थानीयात् युष्मदीयाश्वखुरात् या सुरा प्रवहति तया असङ्ख्यातान् घटान् असिञ्चतम् अपूरयतम्। ये जनाः सौत्रामण्यादिकर्मणि युष्मद्यागाय सुरां याचन्ते तेषामित्यर्थः॥ स्तुवते स्तौतेर्लटः शतृ। अदादित्वात् शपो लुक्। 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम्। पज्रियाय। पज्रशब्दात् शैषिको घच्। कक्षीवते। 'आसन्दीवदष्ठीवच्चक्रिवत्कक्षीवत्०' इति निपातनात् कक्ष्याशब्दस्य सम्प्र-सारणं वत्वं च। अरदतम्। 'रद विलेखने'। पुरन्धिम्। पुरन्धिर्बहुधीः' (निरु० ६.१३) इति यास्कः। पृषोदरादित्वात् पुरन्धिभावः। यद्वा। पुरं पूरयितव्यं सर्वविषयजातमस्यां धीयते अवस्थाप्यते इति 'पुरन्धिर्बुद्धिः'। 'कर्मण्यधिकरणे च' इति दधातेः किप्रत्ययः। 'तत्पुरुषे कृति बहुलम्' इति बहुलवचनात् अलुक्। इदं तु व्युत्पत्तिमात्रं वस्तुतः पृषोदरादिरेव। असिञ्चतम्। 'षिचिर् क्षरणे' तौदादिकः। 'शे मुचादीनाम्' इति नुम्॥

**अन्वय**— नरा, युवम् स्तुवते पज्रियाय कक्षीवते पुरन्धिम् अरदतम्। वृष्णः अश्वस्य कारोत्तरात् शफात् सुरायाः शतं कुम्भान् असिञ्चतम्।

**पदार्थ**— नरा = हे नेता (दोनों अश्विनो)। युवम् = तुम दोनों ने। स्तुवते = स्तुति करने वाले, पज्रियाय = पज्रि वंश में उत्पन्न। कक्षीवते = कक्षीवान् के लिए। पुरन्धिम् = ज्ञान को, सौभाग्य को। अरदतम् = प्रदान किया। वृष्णः = बलसम्पन्न, बलवान्। अश्वस्य = अश्व के। कारोत्तरात् = बाँस के बने सुरापात्र से। शफात् = खुरों से। सुरायाः = सुरा के। शतं = सैकड़ों। कुम्भान् = घड़ों को। असिञ्चतम् = भर दिया, सींच दिया।

**अनुवाद**— हे नेता (दोनों अश्विनो), तुम दोनों ने स्तुति करने वाले (स्तोता) तथा पज्रिवंश में उत्पन्न कक्षीवान् के लिए (पर्याप्त) ज्ञान (सौभाग्य) को प्रदान किया। बलसम्पन्न अश्व के खुर से, (जो) मानों बाँस का बना सुरापात्र हो, सैकड़ों सुरा के घड़ों को भर दिया।

**व्याकरण—**

१. नरा – नर शब्द सम्बोधन द्विवचन का वैदिकरूप, लौकिक संस्कृत में नरौ रूप बनता है।

२. युवम् – युष्मद् शब्द के प्रथमा द्विवचन का वैदिकरूप, लौकिक संस्कृत में 'युवाम्' बनता है।

३. स्तुवते – (स्तुति करना) + शतृ, चतुर्थी, एकवचन।

४. अरदतम् – √रद् + लङ्, मध्यमपुरुष, द्विवचन।

५. पुरन्धिम् – पुरम् + √धा + कि, द्वितीया, एकवचन।

६. असिञ्चतम् – √सिच् + लङ् मध्यमपुरुष, द्विवचन।

**हिमेनाग्निं घ्रंसमवारयेथां**
**पितुमतीमूर्जमस्मा अधत्तम्।**
**ऋबीसे अत्रिमश्विनावनीत-**
**मुन्निन्यथुः सर्वगणं स्वस्ति ॥८॥**

**पदपाठ— हिमे । अग्निम् । घ्रंसम् । अवारयेथाम् । पितुऽमतीम् । ऊर्जम् । अस्मै । अधत्तम् ॥ ऋबीसे । अत्रिम् । अश्विना । अवऽनीतम् । उत् । निन्यथुः । सर्वऽगणम् । स्वस्ति ॥८॥**

**सा० भा०—** अत्रेदमाख्यानम्। अत्रिम् ऋषिम् असुराः शतद्वारे पीडायन्त्रगृहे प्रवेश्य तुषाग्निना अबाधिषत। तदानीं तेन ऋषिणा स्तुतावश्विनौ अग्निमुदकेनोपशमय्य तस्मात् पीडागृहात् अविकलेन्द्रियवर्गं सन्तं निरगमयतामिति। तदेतत् प्रतिपाद्यते। हे अश्विनौ हिमेन हिमवच्छीतेनोदकेन घ्रंसं दीप्यमानम् अत्रेर्बाधिनार्थमसुरैः प्रक्षिप्तं तुषाग्निम् अवा-रयेथां युवां निवारितवन्तौ शीतीकृतवन्तावित्यर्थः। अपि च अस्मै असुरपीडया कार्श्यं प्राप्ताय अत्रये पितुमतीम्। पितुरित्यन्ननाम। अन्नयुक्तम् ऊर्जं रसात्मकं क्षीरादिकम् अधत्तं पुष्ट्यर्थं प्रायच्छतम्। ऋबीसे अपगतप्रकाशे पीडायन्त्रगृहे अवनीतम् अवाङ्मुखतया असुरैः प्रापितम् अत्रिं सर्वगणम्। गणः समूहः। सर्वेषामिन्द्रियाणां पुत्रादीनां वा गणे-नोपेतं स्वस्ति अविनाशी यथा भवति तथा अन्निन्यथुः तस्माद्ग्रहादुद्गमय्य युवां स्वगृहं प्रापितवन्तौ। यद्वा। हिमेन शीतेन वृष्ट्युदकेन अग्निम् अग्निवत्तीक्ष्णं घ्रंसम्। अहर्ना-मैतत्। सामर्थ्यात् निदाघकालीनम् अहः अवारयेथाम्। तस्याह्नस्तैक्ष्ण्यं निवारितवन्तौ। अपि च अग्नये पितुमतीं चरुपुरोडाशादिलक्षणान्नोपेतमूर्जं बलकरं रसात्मकम् उपस्तर-णाभिधारणात्मकं घृतमधत्तम्। वृष्ट्युत्पादनेनाग्नेर्यागार्थं हवींषि निष्पादितवन्तावित्यर्थः। ऋबीसे अपगततेजस्के पृथिवीद्रव्ये अवनीतमोषधीनामुत्पादनाय अवस्तान्नीतम्। पार्थिवा-ग्निना परिपक्वाः उदकेन क्लिन्नाः ह्योषधिवनस्पतयो विरोहन्ति। अत्रिं हविषामत्तार-मोषधिवनस्पत्यादीनां वा एवंविधमग्निं सर्वगणं व्रीह्याद्योषधिगणोपेतं हे अश्विनौ युवां स्वस्ति अविनाशः यथा भवति तथा उन्निन्यथुः। व्रीह्याद्योषधिवनस्पतिरूपेण भूमेरुप-रिष्टान्नीतवन्तौ। कारणात्मना पार्थिवाग्नौ वर्तमानं सर्वमोषधिवनस्पत्यादिकमश्विनौ प्र-वर्षणेन व्यक्तीकृतवन्तावित्यर्थः। अयं पक्षो यास्केन 'हिमेनोदकेन' (निरु० ६.३६) इत्यादिना उक्तः॥ पितुमतीम्। 'ह्रस्वनुड्भ्यां मतुप्' इति मतुप उदात्तत्वम्। ऋबीसे। अत्र यास्कः। 'ऋबीसमपगतभासमपचितमपहतभासं गतभासं वा' (निरु० ६.३५) इति। पृषोदरादित्वादभिमतरूपस्वरसिद्धिः। अत्रिम्। 'अद भक्षणे'। 'अदेस्त्रिनि च' इति शब्दात् त्रिः। अवनीतम्। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वसरत्वम्। स्वस्ति। 'अस भुवि'। भावे क्तिन्। 'छन्दस्युयथा' इति सार्वधातुकत्वात् अस्तेर्भूभावाभावः।

**अन्वय—** हिमेन घ्रंसम् अग्निम् अवारयेथाम्, अस्मै ऊर्जं पितुमतीम् अधत्तम्। अश्विना, ऋबीसे अवनीतं सर्वगणम् अत्रिं स्वस्ति उत् निन्यथुः।

**पदार्थ—** हिमेन = हिम से, ठण्डे जल से। घ्रंसम् = जलते हुए। अग्निम् = अग्नि को। अवारयेथाम् = नियन्त्रित किया, बुझाया। तस्मै = उसके लिए। ऊर्जं = बल देने वाला। पितुमतीम् = अन्न को। अधत्तम् = धारण किया, प्रदान किया। अश्विना– हे दोनों अश्विनो! ऋबीसे = अन्धेरी गुफा में। अवनीतम् = नीचे पड़े हुए। सर्वगणम् = सभी अनुयायियों सहित। अत्रिम् = अत्रि को। स्वस्ति

= कल्याण के मार्ग पर । उन्निन्यथुः = ऊपर ले आये ।

**अनुवाद**— ठण्डे जल से जलती हुई अग्नि को बुझाया । उसके लिए बल देने वाला अन्न प्रदान किया । हे दोनों अश्विनो, तुम दोनों अन्धेरी गुफा में नीचे पड़े हुए (और) सभी अनुयायियों सहित अत्रि को कल्याण के मार्ग पर ऊपर ले आये ।

**व्याकरण**—

१. अवारयेयाम् – √वृ (आवृत करना) आत्मनेपद, लङ् मध्यमपुरुष, द्विवचन ।

२. पितुमतीम् – √पि + तु + मतुप् + ङीप् ।

३. अधत्तम् – √धा (रखना) + लङ् मध्यमपुरुष, द्विवचन ।

४. अश्विना – अश्विन् का सम्बोधन द्विवचन वैदिकरूप, लौकिक संस्कृत में अश्विनौ रूप होगा ।

५. अवनीतम् – अव + नी + क्त ।

**परावतं नासत्यानुदेथा-**
**मुच्चाबुध्नं चक्रथुर्जिह्मबारम् ।**
**क्षरन्नापो न पायनाय राये**
**सहस्राय तृष्यते गोतमस्य ॥९॥**

**पदपाठ**— परा । अवतम् । नासत्या । अनुदेथाम् । उच्चाऽबुध्नम् । चक्रथुः । जिह्मऽबारम् ॥ क्षरन् । आपः । न । पायनाय । राये । सहस्राय । तृष्यते । गोतमस्य ॥९॥

**सा॰भा॰**— अत्रेदमाख्यानम् । कदाचिन्मरुभूमौ वर्तमानस्य स्तोतुः गोतमस्य ऋषेः समीपं देशान्तरे वर्तमानं कूपमुत्खायाश्विनौ प्रापयेताम् । प्रापय्य च तं कूपं स्नानपानादिसौकर्याय उपरिमूलमधोबिलमवास्थापयतामिति । तदेतादाह । हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ नासिकाप्रभवौ वा एतत्संज्ञावश्विनौ युवाम् अवतम् । कूप-नामैतत् । अवस्तात्तं कूपं परा अनुदेथां गोतमस्य ऋषेः समीपे प्रैरिषाथाम् । तदनन्तरं तं कूपम् उच्चाबुध्नम् उच्चैरुपरिष्टात् बुध्ने मूलं यस्य स तथोक्तः । जिह्मबारं जिह्मध-स्ताद्वर्तमानतया वक्रं बारं द्वारं यस्य स तथोक्तः । एवंगुणविशिष्टं चक्रथुः युवामकृ-षाथाम् । तस्मात् कूपात् तृष्यते पिपासतः गोतमस्य पायनाय पानार्थम् आपो न आपश्च । अयं नशब्दश्चार्थे । क्षरन् प्रवाहरूपेण निरगमन् । कीदृशस्य । राये हवींषि दत्तवतः सह-स्राय सहनशीलाय । यद्वा । सहस्रसङ्ख्याकाय राये धनाय एतत्सङ्ख्यधनलाभार्थं च अक्षरन्।। अनुदेथाम्। 'णु प्रेरणे' । तौदादिकः । जिह्मबारम् । द्वारशब्दस्य पृषोदरात्वित् बारादेशः । क्षरन् । 'क्षर सञ्चालने' । 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः । शपः पित्त्वादनुदात्तत्वम् । तिङो लसार्वधातुकस्वरेण धातुस्वरः । पायनाय । हेतुमिति णिच् । 'शाच्छासाह्वा॰' इति युक् । भावे ल्युट् । 'रा दाने' । राति ददातीति राः । 'रातेर्डैः' (उ॰सू॰ २.२२४) । 'ऊडिदम्॰' इति विभक्तेरुदात्तत्वम् । तृष्यते । 'ञितृषा पिपासायाम्' । श्यन् । लटः शतृ । श्यनो नित्त्वादाद्युदात्तत्वम् । 'षष्ठ्यर्थे चतुर्थी वक्तव्या' (पा॰म॰ २.३.६२.१) इति चतुर्थी ।

**अन्वय**— नासत्या, अवतं परा अनुदेथाम्, उच्चाबुध्नं जिह्मबारं चक्रथुः, सहस्राय राये तृष्यते गोतमस्य पायनाय आपः न क्षरन् ।

**पदार्थ**— नासत्या = हे दोनों अश्विनों । अवतं = (धन के) कुएँ (कूप) को । परा = समीप में । अनुदेथाम् = तुम दोनों ने ऊपर उठाया । जिह्मबारं = तिरछे मुह वाला । चक्रथुः = किया । हजार (संख्या वाले) । राये = धन के । तृष्यते = प्यासे । गोतमस्य = गोतम के । पायनाय = पीने के लिए । आपः न = जल के समान । क्षरन् =बरसाया, चुवाया ।

**अनुवाद**— हे दोनों अश्विनो, तुम दोनों ने (धन के) कुएँ (कूप) को समीप में (नीचे से) ऊपर उठाया । इसके पेदी को नीचे तथा मुख को ऊपर की ओर तिरछा किया । हजार (संख्या वाले) धन के प्यासे गोतम के लिए (धन को) जल के समान बरसाया ।

**व्याकरण**—

१. नासत्या – सम्बोधन द्विवचन का वैदिक रूप, लौकिक संस्कृत में नासत्यौ रूप होता है।

२. अनुदेथाम् – √नुद् + आत्मनेपद, लङ् मध्यमपुरुष, द्विवचन।

३. चक्रथुः – √कृ + लिट् मध्यमपुरुष, द्विवचन।

४. क्षरन् – √क्षर् + लङ्, प्रथमपुरुष बहुवचन, वैदिक रूप, लौकिक संस्कृत में अक्षरन् रूप बनता है।

५. पायनाय – √पा (पीना) + युक् + ल्युट्, चतुर्थी, एकवचन।

६. गोतमस्य – गोतम + षष्ठी, एकवचन, चतुर्थी के अर्थ में षष्ठी का प्रयोग।

**जुजुरुषो नासत्योत वव्रिं**
**प्रामुञ्चतं द्रापिमिव च्यवानात्।**
**प्रातिरतं जहितस्यायुर्दस्रा-**
**दित्पतिमकृणुतं कनीनाम् ॥१०॥**

**पदपाठ**— जुजुरुषः। नासत्या। उत। वव्रिम्। अमुञ्चतम्। द्रापिम्-ऽइव। च्यवानात्॥ प्र। अतिरतम्। जहितस्य। आयुः। दस्रा। आत्। इत्। पतिम्। अकृणुतम्। कनीनाम् ॥१०॥

**सा० भा०**— अत्रेदमाख्यानम्। वलीपलितादिभिरुपेतो जीर्णाङ्गः पुत्रादिभिः परित्यक्तश्च्यवनाख्यः ऋषिरश्विनौ तुष्टाव। स्तुतावश्विनौ तस्मै ऋषये जरामपगमय्य पुनर्यौ-वनमकुरुतामिति। तदेतदाह। हे नासत्या अश्विनौ जुजुरुषः जीर्णात् च्यवानात् च्यवना-ख्यादृषेः सकाशात् वव्रिं शरीरमावृत्यावस्थितां जरां प्रामुञ्चतं प्रकर्षेणामोचयतम्। तत्र दृष्टान्तः। द्रापिमिव। द्रापिरिति कवचस्याख्या। यथा कश्चित् कृत्स्नशरीरव्यापकं धृत्वा पश्चात् शरीरात् पृथक्करोति तद्वत्। उत अपि च हे दस्रा एतत्संज्ञौ दर्शनीयौ वा अश्विनौ जहितस्य पुत्रादिभिः परित्यक्तस्य ऋषेः आयुः जीवनं प्रातिरतं प्रावर्धयतम्। प्रपूर्वस्ति-रतिर्वर्धनार्थः। आत् इत् अनन्तरमेव युवानं सन्तं कनीनां कन्यानां पतिं भर्तारम् अकृ-णुतम् अकुरुतम्॥ जुजुरुषः। 'जॄष् वयोहानौ'। लिटः क्वसुः। 'बहुलं छन्दसि' इति उत्वम्। द्विर्भावः। पञ्चम्येकवचने 'वसोः सम्प्रसारणम्' इति सम्प्रसारणम्। 'शासिव-सिघसीनां च' इति षत्वम्। वव्रिम्। 'वृञ् वरणे'। 'आदृगमहन०' इति किप्रत्ययः। जहितस्य। 'ओहाक् त्यागे'। कर्मणि निष्ठा। तस्य 'छन्दस्युभयथा' इति सार्वधातुक-त्वात् यक्। तस्य 'बहुलं छन्दसि' इति श्लुः। 'जहातेश्च' (पा०सू० ६.४.११६) इति इत्वम्। कनीनाम्। 'रयेर्मतौ बहुलम्' इति बहुलवचनात् कन्याशब्दस्य अत्र सम्प्रसारणम्॥

**अन्वय**— नासत्या, जुजुरुषः च्यवानात् द्रापिम् इव वव्रिम् अमुञ्चतम् उत दस्रा जहितस्य आयुः प्रातिरतम् आत् इत् कनीनां पतिम् अकृणुतम्।

**पदार्थ**— नासत्या = हे दोनों नासत्यो। जुजुरुषः = वृद्ध। च्यवनात् = च्यवन (के शरीर) से। द्रापिम् इव = कवच के समान। वव्रिम् = बाहरी रूप को। अमुञ्चतम् = अलग कर दिया। उत = और। जहितस्य = छोड़ दिये गये (ऋषि) की। आयुः = आयु को। प्रातिरतम् = बढ़ा दिया। आत् = इसके पश्चात्। इत् = निश्चित रूप से। कनीनाम् = सुन्दर युवतियों का। पतिम् = पति। अकृणतम् = किया, बनाया।

**अनुवाद**— हे दोनों नासत्यों, तुम दोनों ने वृद्ध च्यवन (के शरीर) से कवच के समान बाहरी रूप को अलग कर दिया और (पुत्रादिकों द्वारा) छोड़ दिये गये (ऋषि) की आयु को बढ़ा दिया, इसके पश्चात् निश्चितरूप से (उनको) सुन्दर युवतियों का पति बनाया।

**व्याकरण**—

१. नासत्या – सम्बोधन द्विवचन में नासत्यौ का वैदिकरूप।

२. जुजुरुषः – जुजुर्वस् का पञ्चमी एववचन, जुजुर्वस् = √जॄ (वृद्ध होना) + क्वसु।

३. अमुञ्चतम् – √मुच् + लङ्, मध्यमपुरुष द्विवचन।

४. प्रतिरतम् – प्र + √तृ (बढाना) + लङ् मध्यपुरुष, द्विवचन।
५. जहितः – √हा + क्त।
६. अकृतम् – √कृ + लङ् मध्यमपुरुष, द्विवचन, अकुरुतम् का वैदिकरूप।



**तद्वां नरा शंस्यं राध्यं**
**चाभिष्टिमन्नासत्या वरूथम्।**
**यद्विद्वांसा निधिमिवापगूळ्ह-**
**मुद्दर्शतादूपथुर्वन्दनाय ॥११॥**

**पदपाठ**— तत्। वाम्। नरा। शंस्यम्। राध्यम्। च। अभिष्टिऽमत्। नासत्या। वरूथम् ॥ यत्। विद्वांसा। निधिम्ऽइव। अपऽगूळ्हम्। उत्। दर्शतात्। ऊपथुः। वन्दनाय ॥११॥

**सा०भा०**— अत्रेदमाख्यानम्। वन्दनो नाम कश्चिदृषिः स चासुरैः कूपे निखातः उत्तरीतुमशक्नुवन्नश्विनावस्तौत्। तमश्विनौ कूपादुन्निन्यतुरिति। तदाह। नरा आरोग्यस्य नेतारौ हे नासत्यौ अश्विनौ वां युवयोः सम्बन्धि अभिष्टिमत् अभ्येषणयुक्तमाभिमुख्येन प्राप्तव्यं तथा वरूथं वरणीयं कामयितव्यं तत् कर्म शंस्यम् अस्माभिः प्रशंसनीयं राध्यम् आराधनीयं च। किं पुनस्तत्कर्म। विद्वांसा जानन्तौ युवां निधिमिव निक्षिप्तं धनमिव अपगूळ्हम् अरण्ये निर्जने देशे कूपमध्ये असुरैः निगूढं वन्दनाय वन्दनमृषिं दर्शतात् अध्वगैः पिपासुभिर्द्रष्टव्यात् उत् ऊपथुः उदहार्ष्टम्। एवं यत् एतत् कूपादुद्धरणं तदि-त्यर्थः ॥ शंस्यम् 'शंसु स्तुतौ'। अस्मात् ण्यन्तात् 'अचो यत्' इति यत्। 'यतोऽनावः' इत्याद्युदात्तत्वम्। अभिष्टितम्। अभिपूर्वात् 'इष गतौ' इत्यस्माद्भावे क्तिन्। 'मन्त्रे वृष' इति क्तिन उदात्तत्वम्। कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते। शकन्ध्वादित्वात् पररूपत्वम्। 'तादौ च' इति तु गतिस्वरस्य सर्वविधीनां छन्दसि विकल्पितत्वाप्रवृत्तिः। ततो मतुप्। अन्तोदात्तादुत्तरस्य तस्य 'ह्रस्वनुड्भ्याम्' वरूथम्। 'जॄवृञ्भ्यामूथम्'। विद्वांसा। 'सुपां सुलुक्०' इति विभक्तेराकारः। अपगूळ्हम्। 'गुहू संवरणे'। कर्मणि निष्ठा। 'यस्य विभाषा' इति इट्प्रतिषेधः। ढत्वधत्वष्टुत्वढ्लोपदीर्घाः। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। दर्शतात्। 'भृमृदृशि' इत्यादिना अतच्। ऊपथुः। 'डुवप् बीजतन्तुसंताने'। लिटि अथुसि यजादित्वात् सम्प्रसारणम्। द्विर्वचनादि। वन्दनाय। 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः सम्प्रदानत्वाच्चतुर्थी ॥

**अन्वय**— नरा, वां तत् अभिष्टिमत् वरूथं शस्यं राध्यं च। यत् विद्वांसा वन्दनाय अपगू ळ्हं निधिम् इव दर्शतात् उत् ऊपथुः।

**पदार्थ**— नरा = हे नेता (अश्विनो)। वां = तुम दोनों की। तत् = वह। अभिष्टिमत् = सहायतात्मक। वरुथम् = सुरक्षा। शंस्यम् = प्रशंसनीय। राध्यं च = और स्तुत्य (पूजनीय)। यत् = जो। विद्वान्सा = विद्वान् (ज्ञानी) (तुम) दोनों ने। वन्दनाय = वन्दन को। अपगूह्ळम् = छिपी हुए। निधिम् इव = धन के समान। दर्शतात् = कुएँ से। उत् = बाहर। ऊपथुः = निकाला।

**अनुवाद**— हे नेता (दोनों नासत्यों) तुम दोनों की वह सहायतात्मक सुरक्षा प्रशंसनीय और स्तुत्य है जो ज्ञानी (तुम) दोनों ने वन्दन को छिपे हुए धन के समान कुएँ से ऊपर (बाहर) निकाला।

**व्याकरण**—

१. शंस्यम् – √शंस् + यत्।
२. राध्यम् – √राध् + यत्।
३. अभिष्टिमत् – अभि + √इष् या √अस् + मतुप्।
४. विद्वांसा – विद्वान् के प्रथमा द्विवचन में विद्वांसौ का वैदिकरूप।
५. अपगूह्ळम् – अप + √गुह् + क्त। दो स्वरों के मध्य में ढकार का ळ्हकार।
६. ऊपथुः = उत् + √वप् (लाना) + लिट् मध्यमपुरुष, द्विवचन।

**तद्वां नरा सनये दंसं उग्र-**
**माविष्कृणोमि तन्यतुर्न वृष्टिम् ।**
**दध्यङ् ह यन्मध्वाथर्वणो वा-**
**मश्वस्य शीर्ष्णा प्र यदीमुवाच ॥१२॥**

**पदपाठ—** तत् । वाम् । नरा । सनये । दंसः । उग्रम् । आविः । कृणोमि । तन्यतुः । न । वृष्टिम् ॥ दध्यङ् । ह । यत् । मधु । आथर्वणः । वाम् । अश्वस्य । शीर्ष्णा । प्र । यत् । ईम् । उवाच ॥

**सा० भा०—** अत्रेयमाख्यायिका । इन्द्रो दधीचे प्रवर्ग्यविद्यां मधुविद्यां चोपदिश्य यदि इमाम् अन्यस्मै वक्ष्यसि शिरस्ते छेत्स्यामीत्युवाच । ततोऽश्विनौ अश्वस्य शिरश्छि-त्वा दधीचः शिरः प्रच्छिद्यान्यत्र निधाय तत्राश्व्यं शिरः प्रत्यधत्ताम् । तेन च दध्यङ् ऋचः सामानि यजूंषि च प्रवर्ग्यविषयाणि मधुविद्याप्रतिपादकं ब्राह्मणं चाश्विनावध्यापयामास । तदिन्द्रो ज्ञात्वा वज्रेण तच्छिरोऽच्छिनत् । अथाश्विनौ तस्य स्वकीयं मानुषं शिरः प्रत्य-धत्तामिति शाट्यायनवाजसनेययोः प्रपञ्चेनोक्तम् । तदेतत्प्रतिपाद्यते । हे नरा नरौ अश्विनौ वां युवयोः सम्बन्धि उग्रम् उद्गूर्णमन्यैर्दुःशकं दंसः । कर्मनामैतत् । युवाभ्यां पुरा कृतं तत् कर्म सनये धनलाभार्थम् आविष्कृणोमि प्रकटीकरोमि । तत्र दृष्टान्तः । तन्यतुः न यथा मेघस्थशब्दः वृष्टिं मेघान्तर्वर्तमानमुदकं प्रवर्षणेन सर्वत्र प्रकटयति तद्वत् । किं तत्कर्म । अथर्वणः पुत्रः दध्यङ् एतत्सञ्ज्ञः ऋषिः अश्वस्य शीर्ष्णा युष्मत्सामर्थ्येन प्रति-हितेन शिरसा वां युवाभ्याम् ईम् इमां मधुविद्यां यत् ह यदा खलु प्र उवाच प्रोक्तवान् । तदानीमश्वस्य शिरसः सन्धानलक्षणं च यत् भवदीयं कर्म तत् आविष्कृणोमीत्यर्थः ॥ सनये । 'षणु दाने' । 'खनिकषिकस्यज्ञसिवसिध्वनिस्तनिवनिसनिग्रन्थिचरिभ्यश्च' (उ०सू० ४.५७९) इति इप्रत्ययः । तन्यतुः । 'तनु विस्तारे' । 'ऋतन्यञ्जि०' (उ०सू० ४.४४२) इत्यादिना यतुच् । यद्वा । 'स्तन शब्दे' । बाहुलकात् यतुच् । छान्दसः सलोपः । वृष्टिम् । वृष्यते सिच्यते अनेनेति वृष्टिः । 'मन्त्रे वृष' इत्यादिना क्तिन उदात्तत्वम् । आथर्वणः । अपत्यार्थे अणि 'अन्' (पा०सू० ६.४.१६७) इति प्रकृतिभावात् टिलोपाभावः । शीर्ष्णा । 'शीर्षश्छन्दसि' (पा०सू० ६.१.६०) इति शिरःशब्दपर्यायः शीर्षन्शब्दोऽन्तोदात्तो नि-पात्यते । अल्लोपे सति उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् ॥

**अन्वय—** नरा, सनये वां तत् उग्रं दंसः तन्यतुः वृष्टिं न अविष्कृणोमि, यत् आथर्वणः दध्यङ् वाम् अश्वस्य शीर्ष्णा यत् मधु ईम् प्र उवाच ।

**पदार्थ—** नरा = हे दोनों नेताओं । सनये = धन के लिए । वां = तुम दोनों के । तत् = उस । उग्रम् = शक्तिशाली । दंसः = आश्चर्यजनक कार्य को । तन्यतुः = गर्जन । वृष्टिं न = वर्षा के समान । अविष्कृणोमि = प्रकट करता हूँ, प्रस्तुत करता हूँ । यत् = आथर्वणः = अथर्वण के पुत्र । दध्यङ् = दध्यङ् ने । वाम् = तुम दोनों को । अश्वस्य = अश्व के । शीर्ष्णा = सिर से । यत् = जिस । मधु = मधु (विद्या के रहस्य) को । ईम् = निश्चित रूप से । प्र उवाच = कहा था (बताया था) ।

**अनुवाद—** हे दोनों नेताओं (अश्विनो), धन के लिए तुम दोनों के उस शक्ति-शाली आश्चर्यजनक कार्य को उसी प्रकार मैं प्रकट करता हूँ जिस प्रकार गर्जन वर्षा को (प्रकट करता है) जो अथर्वण के पुत्र दध्यङ् ने तुम दोनों को अश्व के सिर (मुख से जिस मधु (विद्या के रहस्य) को निश्चित रूप से कहा (बताया) था ।

**व्याकरण—**

१. आविष्कृणोमि – आविः + √कृ + लट्, उत्तमपुरुष, एकवचन, आविष्करोमि का वैदिकरूप ।
२. तन्यतुः – √तन् या √स्तन् + यतुच् ।
३. उवाच – √वच् + लिट् प्रथमपुरुष, एकवचन ।

**अजोहवीन्नासत्या करा वां**
**महे यामन्पुरुभुजा पुरंधिः ।**

श्रुतं तच्छासुरिव वध्रिमत्या
हिरण्यहस्तमश्विनावदत्तम् ॥१३॥

पदपाठ— अजोहवीत् । नासत्या । करा । वाम् । महे । यामन् । पुरुऽभुजा । पुरम्ऽधिः ॥ श्रुतम् । तत् । शासुःऽइव । वध्रिऽमत्याः । हिरण्यऽहस्तम् । अश्विनौ । अदत्तम् ॥१३॥

सा० भा०— वध्रिमती नाम कस्यचिद्राजर्षेः पुत्री नपुंसकभर्तृका । सा पुत्रलाभार्थ-मश्विनावाजुहाव । तदाह्वानं श्रुत्वाश्विनावागत्य तस्यै हिरण्यहस्ताख्यं पुत्रं ददतुः तदेत-दाह । पुरुभुजा बहूनां पालकौ प्रभूतहस्तौ वां हे नासत्यावश्विनौ महे महनीये यामन् यामनि । याति गच्छतीति याम स्तोत्रम् । तस्मिन्नसति करा अभिमतफलस्य कर्तारौ वां युवां पुरंधिः बहुधीः वध्रिमती । वध्रिः पुत्रोत्पादनाशक्तः षण्डकः । तद्वती एतत्संज्ञा राजपुत्री अजोहवीत् । पुनः पुनः स्तुत्या पुत्रलाभार्थम् आहूतवती । युवां च वध्रिमत्याः तत् आह्वानं श्रुतम् अशृणुतम् । तत्र दृष्टान्तः । शासुरिव । यथा शासुः आचार्यस्य वचनं शिष्योऽवहितः सन् एकाग्र्येण शृणोति तद्वत् । श्रुत्वा च हे अश्विनौ तस्यै हिरण्यहस्तं सुवर्णमयपाणिं हितरमणीयपाणिं वा एतत्संज्ञं पुत्रं अदत्तं प्रायच्छतम् ॥ अजोहवीत् । ह्वयतेर्यङ्लुगन्तात् लङ् । 'यङो वा' इति तिप ईडागमः । करा । करोतेः पचाद्यच् । 'सुपां सुलुक्०' इति विभक्तेः आकारः । यामन् । 'आतो मनिन्क्वनिब्वनिपश्च' इति मनिन् । 'सुपां सुलुक्०' इति सप्तम्या लुक् । श्रुतम् । लङि 'बहुलं छन्दसि' इति विकरणस्य लुक् । 'बहुलं छन्दस्यमाङ्योगेऽपि' इति शासुः । शास्तुः । अडभावः । 'शासु अनु-शिष्टौ ।' 'शंसिशसिशासि०' (उ०सू० २.२५०) इत्यादिना संज्ञायां तृन् । इडभावः । छान्दसस्तलोपः ॥

**अन्वय**— पुरुभुजा नासत्या, पुरन्धिः महे यामन् करा वाम् अजोहवीत् वध्रि-मत्याः तत् शासुः इव श्रुतम्, अश्विनौ, हिरण्यहस्तं अदत्तम् ।

**पदार्थ**— पुरुभुजा = हे अनेक (शक्तियों) का आनन्द लेने वाले । नासत्या = हे दोनों नासत्यों । पुरन्धिः = बुद्धिमती (स्त्री) ने । महे = श्रेष्ठ । यामन् = स्तुति में, प्रर्थना में । करा = (अभीष्ट) कार्य करने वाले । वाम् = तुम दोनों को । अजोहवीत् = आह्वान किया, बुलाया । वध्रिमत्याः = उस (आह्वान) को । शासुः इव = (गुरु के) वचन (आदेश) के समान । श्रुतम् = तुम दोनों ने सुना । अश्विनौ = हे दोनों अश्विनों । हिरण्यहस्तम् = सुवर्णमय हाथ वाले (पुत्र) को । अदत्तम् = प्रदान किया ।

**अनुवाद**— हे अनेक (शक्तियों) का आनन्द लेने वाले दोनों नासत्यो, बुद्धिमती (नपुंसक की पत्नी) ने (अपनी) श्रेष्ठ स्तुति में अभीष्ट कार्य करने वाले तुम दोनों को बुलाया (और) (उस) नपुंसक की पत्नी के उस (आह्वान) को तुम दोनों ने (गुरु के) आदेश के समान सुना । हे दोनों अश्विनों, (उसके लिए) तुम दोनो ने सुवर्णमय हाथ वाले (पुत्र) को प्रदान किया ।

**व्याकरण**—

१. अजोहवीत् – √हू (बुलाना) लङ् प्रथमपुरुष एकवचन ।
२. करा – कर्तृक प्रथमा द्विवचन का वैदिकरूप, लौकिक संस्कृत में कर्त्तारौ रूप बनता है ।
३. यामन् – यामन् के सप्तमी एकवचन में वैदिकरूप, लौकिक संस्कृत में यामनि रूप बनेगा ।
४. पुरुभुजा – पुरुभुज का सम्बोधन द्विवचन में वैदिकरूप, लौकिकसंस्कृत में पुरुभुजौ रूप बनेगा ।
५. श्रुतम् – √श्रु (सुनना) लुङ् मध्यमपुरुष, द्विवचन ।
६. अदत्तम् – √दा (देना) + लङ् मध्यमपुरुष, द्विवचन ।

आस्नो वृकस्य वर्तिकामभीके
युवं नरा नासत्यामुमुक्तम् ।
उतो कविं पुरुभुजा युवं ह
कृपमाणमकृणुतं विचक्षे ॥१४॥

पदपाठ— आस्नः । वृकस्य । वर्तिकाम् । अभीके । युवम् । नरा । नासत्या । अमुमुक्तम् ॥

**उतो इति । कविम् । पुरुऽभुजा । युवम् । ह । कृपमाणम् । अकृणुतम् । विऽचक्षे ॥**

**सा० भा०**— वर्तिका चटकसदृशस्य पक्षिण: स्त्री । तामरण्ये वर्तमानो शुना ग्रस्तां पुरा किल अश्विनौ अमोचयताम् । तदेतदाह नरा नेतारौ नासत्यावश्विनौ युवं युवाम् अभीके अभिगते वृकवर्तिकयो: संग्रामे वृकस्य विकर्तकस्य शुन: आस्न: आ-स्यात् वर्तिकां चटकसदृशीम् अमुमुक्तम् अमोचयतम् । यास्कस्त्वाह । पुन: पुनर्वर्तते प्रतिदिवसमावर्तते इति वर्तिका उषा: । तां वृकेण आवरकेण सर्वजगत्प्रकाशेनाच्छा-दयित्रा सूर्येण ग्रस्तां तदीयमुखादश्विनावमुञ्चतामिति । उतो अपि च पुरुभुजा महाबाहू प्रभूतहस्तौ वा युवं ह युवां खलु कृपमाणं स्तुवन्तं कविम् एतत्संज्ञमन्धमृषिं विचक्षे विशेषेण द्रष्टुं समर्थम् अकृणुतम् अकुरुतम् ॥ आस्न: । 'पद्दन्०' इत्यादिना आस्यस्य आसन्नादेश: । 'अल्लोपोऽन:' इति अकारलोपे उदात्तनिवृत्तिस्वरेण 'ऊडिदम्०' इति विभक्तेरुदात्तत्वम् । अमुमुक्तम् । मुचेरन्तर्भावितण्यर्थात् लङि 'बहुलं छन्दसि' इति विकरणस्य श्लु: । कृपमाणम् । कृपि: स्तुतिकर्मा तुदादिषु द्रष्टव्य: । विकरणस्वरे प्राप्ते 'वृषादीनां च' इत्याद्युत्तत्वम् । विचक्षे । 'तुमर्थे सेसेन्०' इति सेन्प्रत्यय: । 'स्को: संयो-गाद्यो:०' इति सलोप: ॥

**अन्वय**— नरा नासत्या, अभीके युवम् वर्तिकाम् वृकस्य आस्न: अमुमुक्तम्, उतो पुरुभुजा, युवं कृपमाणं कविं ह विचक्षे अकृणुतम् ।

**पदार्थ**— नरा नासत्या = हे नेता नासत्यो । अभीके = युद्ध में । युवम् = तुम दोनों ने । वर्तिकाम् = वर्तिका (नामक पक्षी) को । वृकस्य = भेड़िये के । आस्न: = मुख से । अमुमुक्तम् = मुक्त कराया, बचाया । उतो = और । पुरुभुजा = हे अनेक (शक्तियों) का आनन्द लेने वाले । युवम् = तुम दोनों ने । कृपमाणम् = स्तुति करते हुए (स्तोता) । कविम् = कवि को, क्रान्तद्रष्टा (ऋषि) को । ह = निश्चित रूप से । विचक्षे = देखने के लिए । अकृणुतम् = किया ।

**अनुवाद**— हे नेता दोनों नासत्यो, युद्ध में तुम दोनों ने वर्तिका (नामक पक्षी) को भेड़िये के मुख से मुक्त कराया (छुड़ाया) और हे अनेक (शक्तियों) का आनन्द लेने वाले (अश्विनो), तुम दोनों ने स्तुति करने वाले (अन्धे) क्रान्तद्रष्टा (ऋषि) को देखने के लिए (समर्थ) किया ।

**व्याकरण**—

१. आस्न: – आस्य का पञ्चमी एकवचन का वैदिकरूप ।

२. अमुमुक्तम् – √मुच् + लिट्, मध्यमपुरुष, द्विवचन ।

३. कृपमाणम् – √कृप् + मतुप् ।

४. अकृणुतम् – √कृ + लङ् मध्यमपुरुष, द्विवचन, अकुरुतम् का वैदिकरूप ।

**चरित्रं हि वेरिवाच्छेदि पर्ण-**
**माजा खेलस्य परितक्म्यायाम् ।**
**सद्यो जङ्घामायसीं विश्पलायै**
**धने हिते सर्तवे प्रत्यधत्तम् ॥१५॥**

**पदपाठ**— **चरित्रम् । हि ।** वे:ऽईव । **अच्छेदि । पर्णम् । आजा । खेलस्य । परिऽतक्म्यायाम् ॥ सद्य: ।** जङ्घाम् । आयसीम् । **विश्पलायै । धने । हिते । सर्तवे । प्रति । अधत्तम् ॥१५॥**

**सा० भा०**— अगस्त्यपुरोहित: खेलो नाम राजा । तस्य सम्बन्धिनी विश्पला नाम स्त्री सङ्ग्रामे शत्रुभिश्छिन्नपादा आसीत् । पुराहितेनागस्त्येन स्तुतावश्विनौ रात्रा-वागत्य अयोमयं पादं समधत्ताम् । तदेतदाह । आजा आजौ सङ्ग्रामे अगस्त्यपुरो-हितस्य खेलस्य सम्बन्धिन्या: विश्पलाख्याया: चरित्रं चरणं वेरिव वे: पक्षिण: पर्णं पतत्रमिव अच्छेदि हि पुरा छिन्नमभूत् खलु । हे अश्विनौ युवामगस्त्येन स्तुतौ सन्तौ परितक्म्यायाम् । परितक्म्या रात्रि: । 'परित एनां तकति' (निरु० ११.२५) इति यास्क: । एनामुभयत: सूर्यो गच्छतीति तस्यार्थ: । रात्रावागत्य सद्य: तदानीमेव हिते शत्रुषु निहिते धने जेतव्ये विषयभूते सति

सर्तवे सर्तुं गन्तुं विश्पलायै आयसीम् अयोमयीं जङ्घां जङ्घोपलक्षितं पादं प्रत्यधत्तम्। सन्धानमेकीकरणं कृतवन्तावित्यर्थः ॥ चरित्रम् 'अर्ति-लूधूखनसहर इत्रः' इति करणे इत्रः। आजा। 'सुपां सुलुक्०' इति विभक्तेर्डादेशः। आयसीम्। अयःशब्दाद्विकारार्थे 'प्राणिरजतादिभ्योऽञ्' (पा०सू० ४.३.१४५) 'टिड्ढा-णञ्०' इति ङीप् ॥

**अन्वय**— परितक्म्यायाम् खेलस्य आजा चरित्रं वेः पर्णम् इव अच्छेदि। सद्यः विश्पलायै हिते धने सर्तवे आयसीं जङ्घाम् प्रति अधत्तम्।

**पदार्थ**— परितक्म्यायाम् = रात्रि में। खेलस्य = खेल (नामक राजा) को। आजा = युद्ध में। चरित्रम् = पैर। वेः = पक्षी के। पर्णम् इव = पङ्ख के समान। अच्छेदि = कट गया था। सद्यः = शीघ्र ही। विश्पलायै = विश्पला के लिए। हिते = गड़े (छिपे) धन के लिए। सर्तवे प्रति = दौड़ने के लिए। आयसीम् = लोहनिर्मित, लोहे के। जङ्घाम् = जङ्घों को, पैर को। प्रति अधत्तम् = तुम दोनों ने प्रदान किया।

**अनुवाद**— रात्रि में खेल (नामक राजा) के युद्ध में (उसकी पत्नी विश्पला का) पैर पक्षी के पङ्ख के समान कट गया था। शीघ्र ही विश्पला को (उसके) गड़े, (छिपे) धन के लिए तुम दोनों ने लौहनिर्मित पैर को प्रदान किया।

**व्याकरण**—

१. अच्छेदि – √छिद् (काटना) लुङ् + प्रथमपुरुष, एकवचन।

२. हिते – √धा + क्त चतुर्थी एकवचन।

३. सर्तवे – √सृ + तुमर्थक तवे प्रत्यय।

४. अधत्तम् – √धा + लङ् मध्यमपुरुष, द्विवचन।

५. नरा, नासत्या, पुरुभुजा– सम्बोधन द्विवचन। क्रमशः नरौ, नासत्यौ, पुरुभुजौ का वैदिकरूप।

**शतं मेषान्वृक्ये चक्षदान-**
**मृज्राश्वं तं पितान्धं चकार।**
**तस्मा अक्षी नासत्या विचक्ष**
**आधत्तं दस्रा भिषजावनर्वन् ॥१६॥**

**पदपाठ**— शतम्। मेषान्। वृक्ये। चक्षदानम्। ऋज्रऽअश्वम्। तम्। पिता। अन्धम्। चकार ॥ तस्मै। अक्षी इति। नासत्या। विऽचक्षे। आ। अधत्तम्। दस्रा। भिषजौ। अनर्वन् ॥१६॥

**सा०भा०**— वृषागिरः पुत्रः ऋज्राश्वो नाम राजर्षिः। तस्य समीपे अश्विनो-र्वाहनभूतो रासभो वृकीभूत्वावतस्थे। स च तस्या आहारार्थमेकोत्तरशतसङ्ख्याकान् पौर-जनानां स्वभूतान्मेषान्शकलीकृत्य प्रददौ। 'ऋज्राश्वः शतमेकं च मेषान्' (ऋ०सं० १.११७.१७) इति मन्त्रान्तरे दर्शनात्। एवं पौराणामहिते प्रवृत्तं पिता शापेन नेत्रहीन-मकरोत्। तेन स्तूयमानावश्विनौ अस्मद्वाहननिमित्तम् अस्य आन्ध्यं जातमिति जानन्तौ तस्मै अक्षिणी प्रायच्छतामिति। तदेतदाह। अत्र तच्छब्दश्रुतेर्यच्छब्दाध्याहारः। यः ऋज्राश्वः शतं शतसङ्ख्याकान् मेषान् वृक्ये आत्मना पोषितायै वृकस्त्रियै शकलीकृत्य प्रादात् तं चक्षदानम्। क्षदतिः अत्तिकर्मा अत्र शकलीकरणार्थः। शकलीकृत्य दत्तवन्तम् ऋज्राश्वं पिता शापेन अन्धं दृष्टिहीनं चकार कृतवान्। हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ वा भिषजौ देवानां वैद्यभूतौ। 'अश्विनौ वै देवानां भिषजौ' (ऐ०ब्रा० १.१८; तै०सं० २.३.११) इति श्रुतेः। दस्रा दर्शनीयौ एतत्संज्ञौ वा हे अश्विनौ अनर्वन् अनर्वणी द्रष्टव्यं प्रति पितृशापात् गमनरहिते। अक्षी चक्षुषी। विचक्षे विविधं द्रष्टुं समर्थे तस्मै ऋज्राश्वाय आधत्तम् व्यधत्तम् अकुरुतम् ॥ वृक्ये। वृकोऽरण्यश्वा। तस्य स्त्री वृकी। 'जातेरस्त्रीविष-यात्०' (पा०सू० ४.१.६३) इति ङीष्। 'जसादिषु च्छन्दसि वावचनम्' इति चतुर्थ्येक-वचनस्य आडभावे यणादेशे 'उदात्तस्वरितयोर्यणः०'

इति परस्यानुदात्तस्य स्वरितत्वम्। चक्षदानम्। क्षदेर्लिटः कानच्। चित्स्वरः। अक्षी। 'ई च द्विवचने' (पा०सू० ७.१.७७) इति परत्वात् अक्षशब्दस्य ईकारान्तादेशः। स चोदात्तः। तस्मिन्कृते 'सकृद्गतौ विप्रति-षेधे' (परिभा० ४०) इति परिभाषया पुनः नुम् न भवति। विचक्षे। चक्षेः सम्पदादि-लक्षणो भावे क्विप्। अनर्वन्। 'ऋ गतौ'। अस्मात् 'अन्येभ्योऽपि दृश्यन्ते' इति दृशिग्रहणस्य विध्यन्तरोपसङ्ग्रहार्थत्वात् भावे वनिप्। अर्व गमनं विषयं प्रति एनयोः नास्तीति बहुव्रीहौ नञ्सुभ्याम् इत्युत्तरपदान्तोदात्तत्वम्। 'सुपां सुलुक्०' इति द्विवचनस्य लुक्। छान्दसो नलोपाभावः।

**अन्वय—** वृक्ये शतं मेषान् चक्षदानं तम् ऋज्राश्वं पिता अन्धं चकार। दस्रा भिषजौ नासत्या, तस्मै विचक्षे अनर्वन् अक्षी अधत्तम्।

**पदार्थ—** वृक्ये = वृकी के लिए। शतं = सौ। मेषान् = भेड़ों को। चक्षदानम् = देने वाले, बलिदान करने वाले। तम् = उस (प्रसिद्ध)। ऋज्राश्वम् = ऋज्राश्व को। पिता = पिता ने। अन्धं = अन्धा। चकार = कर दिया, बना दिया। दस्रा = हे आश्चर्यजनक कार्य करने वाले। भिषजौ = हे वैद्य। नासत्या = दोनों नासत्यो। तस्मै विचक्षे = उस (ऋज्राश्व) को देखने के लिए। अनर्वन् = अनुपम। अक्षी = दो आँखों को। अधत्तम् = तुम दोनों ने धारण (प्रदान) किया।

**अनुवाद—** वृकी के लिए सौ भेड़ों को देने (बलिदान करने) वाले उस (प्रसिद्ध) ऋज्राश्व को (उसके) पिता ने अन्धा बना दिया। हे आश्चर्यजनक कार्य करने वाले दोनों वैद्य नासत्यो, तुम दोनों ने उस (ऋज्राश्व) को देखने के लिए अनुपम दो आखों को प्रदान किया।

**व्याकरण—**

१. अक्षी – द्वितीया द्विवचन, पदान्त ईकार प्रगृह्य है।

२. अनर्वन् – √ऋ + वनिप्।

३. नासत्या – सम्बोधन द्विवचन नासत्यौ का वैदिकरूप।

**आ वां रथं दुहिता सूर्यस्य**
**कार्ष्मेवातिष्ठदर्वता जयन्ती।**
**विश्वे देवा अन्वमन्यन्त हृद्भिः**
**समु श्रिया नासत्या सचेथे ॥१७॥**

**पदपाठ—** आ। वाम्। रथम्। दुहिता। सूर्यस्य। कार्ष्मऽइव। अतिष्ठत्। अर्वता। जयन्ती॥ विश्वे। देवाः। अनु। अमन्यन्त। हृत्ऽभिः। सम्। ऊँ इति। श्रिया। नासत्या। सचेथे इति ॥१७॥

**सा० भा०—** सविता स्वदुहितरं सूर्याख्यां सोमाय राज्ञे प्रदातुमैच्छत्। तां सूर्यां सर्वे देवा वरयामासुः। ते अन्योन्यमूचुः आदित्यमवधिं कृत्वा आर्जि धावाम। योऽस्माकं मध्ये उज्जेष्यति तस्येयं भविष्यतीति। तत्राश्विनावुदजयताम्। सा च सूर्या जितवतो-स्तयोः रथमारुरोह। अत्र 'प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत्' (ऐ०ब्रा ४.७) इत्यादिकं ब्राह्मणमनुसन्धेयम्। इदं चाख्यानं सूर्याविवाहस्य स्तावकेन 'सत्येनोत्तभिता भूमिः' (ऋ०सं० १०.८५.१) इति सूक्तेन विस्पष्टयिष्यते। अश्विनौ वां युवयोः रथं कार्ष्मेव। कार्ष्मशब्दः काष्ठवाची। यथा काष्ठम् आजिधावानस्य अवधितया निर्दिष्टं लक्ष्यम् आशुगामी कश्चित् सर्वेभ्यो धावद्भ्यः पूर्वं प्राप्नोति एवमेव सर्वेभ्यो देवेभ्यः पूर्वम् अर्वता शीघ्रमवधिं प्राप्नुवता युष्मदीयेनाश्वेन करणभूतेन युवाभ्यां जीयमाना सूर्यस्य सवितुः दुहिता आ अतिष्ठत् आरूढवती। विश्वे सर्वे इतरे देवा। एतत् आरोहणस्थानं हृद्भिः हृदयैः अन्वमन्यन्त अन्वजानन्। तदानीं हे नासत्यावश्विनौ श्रिया ऋक्सहस्र-लाभरूपया सम्पदा कान्त्या वा युवां सं सचेथे सङ्गच्छेथे॥ जयन्ती व्यत्ययेन कर्मणि शतृप्रत्ययः। हृद्भिः। 'पद्दन्०' इत्यादिना हृदयशब्दस्य हृद्भावः। सचेथे। 'षच सम-वाये'। स्वरितेत्त्वादात्मनेपदम्॥

**अन्वय—** सूर्यस्य दुहिता जयन्ती वाम् रथं अर्वता कार्ष्मेव अतिष्ठत्, विश्वेदेवाः हृद्भिः अन्वमन्यन्त। नासत्या संसचेथे उ।

**पदार्थ**— सूर्यस्य = सूर्य की। दुहिता = पुत्री। जयन्ती = विजय प्राप्त करती हुई। वाम् = तुम दोनों के। रथं = रथ पर। अर्वता = तेज दौड़ने वाले द्वारा। कार्ष्मेव = विजयसीमा सूचक रेखा के समान। अतिष्ठत् = बैठ गयी। विश्वेदेवा: = सभी देवताओं ने। हृद्भि: = हृदय से, अन्त:करण से। अन्वमन्यन्त = अनुमोदन किया, समर्थन किया। नासत्या = हे दोनों नासत्यो। संसचेथे उ = निश्चितरूप से तुम दोनों गौरवान्वित हुए।

**अनुवाद**— सूर्य की पुत्री (सूर्या) विजय प्राप्त करती हुई तुम दोनों के रथ पर तेज दौड़ने वाले द्वारा (प्राप्त) विजय सीमा-रेखा के समान बैठ गयी। सभी देवताओं ने अन्त:करण से (इसका) अनुमोदन किया। हे दोनों नासत्यो, (उस समय) निश्चित रूप से तुम दोनों गौरवान्वित हुए।

**व्याकरण**—

१. जयन्ती – √जि (जीतना) + शतृ + ङीप्, प्रथमा, एकवचन।

२. अन्वमन्यन्त – अनु + √मन् + आत्मनेपद लङ् प्रथमपुरुष, बहुवचन, वैदिकरूप; लौकिक संस्कृत में अन्वमन्यन्ते रूप बनेगा।

३. संसचेथे – सम् + √सच् + आत्मनेपद लट् मध्यमपुरुष, द्विवचन। पदान्त एकार प्रगृह्य है।

**यदयातं दिवोदासाय वर्ति-**
**र्भरद्वाजायाश्विना हयन्ता।**
**रेवदुवाह सचनो रथो वां**
**वृषभश्च शिंशुमारश्च युक्ता ॥१८॥**

**पदपाठ**— यत्। अयातम्। दिवःऽदासाय। वर्तिः। भरत्ऽवाजाय। अश्विना। **हयन्ता ॥ रेवत्। उवाह। सचनः। रथः। वाम्। वृषभः। च। शिंशुमारः। च। युक्ता ॥**

**सा० भा०**— हे अश्विनौ हयन्ता स्तुतिभिराहूयमानौ युवां भरद्वाजाय संभ्रिय-माणहविर्लक्षणान्नाय यजमानाय दिवोदासाय एतत्संज्ञाय राजर्षये अभीष्टं फलं दातुं वर्तिः तदीयं गृहं यत् यदा अयातम् तदानीं रेवत् धनयुक्तम् अन्नं वां युवयोः सचनः सेवनः रथः उवाह। तस्मै दिवोदासाय प्रापयामास। अपि च तस्मिन् रथे वृषभः अनड्वान् शिंशुमारः ग्राहः च परस्परविरुद्धावपि स्वसामर्थ्यप्रकटनाय युक्ता वाहनतया संयुक्तावास्ताम्॥ दिवोदासाय। दिवश्च दासे षष्ठ्या अलुग्वक्तव्यः' (का० ६.३.२१.५) इत्यलुक्। 'दिवोदासादीनां छन्दस्युपसङ्ख्यानम्' इति पूर्वपदाद्युदात्तत्वम्। भरद्वाजाय। 'भृञ् भरणे'। अस्माद्व्यत्ययेन कर्मणि शतृप्रत्ययः। शतुः 'छन्दस्युभयथा' इति आर्ध-धातुकत्वेन लसार्वधातुकानुदात्तत्वाभावात् प्रत्ययाद्युदात्तत्वम्। बहुव्रीहौ पूर्वपदप्रकृति-स्वरत्वम्। हयन्ता। ह्वेञः कर्मणि लटो व्यत्ययेन। 'बहुलं छन्दसि' इति सम्प्रसारणम्। शपि गुणे छान्दसः अयादेशः। रेवत्। रयिशब्दात् मतुप्। 'रयेर्मतौ बहुलम्' इति सम्प्रसारणम्। 'छन्दसीरः' इति मतुपो वत्वम्। 'रयिशब्दाच्च' (का० ६.१.१७६.१) इति मतुप उदात्तत्वम्। सचनः। 'षच सेवने'। 'अनुदात्तेतश्च हलादेः' इति युच्। युक्ता। 'सुपां सुलुक्०' इति विभक्तेः आकारः॥

**अन्वय**— अश्विना, हयन्ता भरद्वाजाय दिवोदासाय यत् वर्तिः अयातम्, वाम् रेवत् सचनः रथः उवाह, वृषभः च शिंशुमारः च युक्ता।

**पदार्थ**— अश्विना = हे दोनों अश्विनो। हयन्ता = बुलाये गये (आह्वान किये गये) तुम दोनों। भरद्वाजाय = पवित्र यजमान। दिवोदासाय = दिवोदास के लिए। यत् = जब। वर्तिः = (उसके) घर को। अयातम् = आये। वाम् = तुम दोनों को। रेवत् = धनयुक्त। सचनः = सहायक। रथः = रथ। उवाह = ले आया। वृषभः = बैल। शिंशुमारः च = और घड़ियाल। युक्ता = जोड़े (जोते) गये थे।

**अनुवाद**— हे दोनों अश्विनो, बुलाये गये तुम दोनों पवित्र यजमान दिवोदास के लिए जब (उसके) घर आये (उस समय) तुम दोनों को धनयुक्त सहायक रथ ले आया (जिसमें), बैल और घड़ियाल जुड़े (जुते) थे।

**व्याकरण—**

१. अयातम् – √या लङ्, मध्यमपुरुष द्विवचन।

२. हयन्ता – √हू + शतृ प्रथमा, द्विवचन, हयन्तौ का वैदिकरूप।

३. रेवत् – रयि + वतुप्।

४. युक्ता – √युज् + क्त। प्रथमा, द्विवचन, युक्तौ का वैदिकरूप।

५. अश्विना – सम्बोधन द्विवचन, अश्विनौ का वैदिकरूप।

**रयिं सुक्षत्रं स्वपत्यमायुः**
**सुवीर्यं नासत्या वहन्ता।**
**आ जह्नावीं समनसोप वाजै-**
**स्त्रिरह्नो भागं दधतीमयातम् ॥१९॥**

**पदपाठ—** रयिम्। सुऽक्षत्रम्। सुऽअपत्यम्। आयुः। सुऽवीर्यम्। नासत्या। वहन्ता ॥ आ। जह्नावीम्। सऽमनसा। उप। वाजैः। त्रिः। अह्नः। भागम्। दधतीम्। अयातम् ॥१९॥

**सा॰भा॰—** हे नासत्यावश्विनौ सुक्षत्रं शोभनबलं रयिं धनं स्वपत्यं शोभनैः पुत्रादिभिरुपेतं सुवीर्यं शोभनवीर्योपेतम् आयुः। अन्ननामैतम्। एवंगुणविशिष्टमन्नं च वहन्ता धारयन्तौ युवां समनसा समानमनस्कौ सन्तौ जह्नावीं जह्नोर्महर्षेः सम्बन्धिनीं प्रजाम् आ अयातम् आभिमुख्येनागच्छतम्। कीदृशीं वाजैः हविर्लक्षणैरन्नैरुपेताम्। अह्नः। अत्र अहःशब्देन तत्रानुष्ठेयः सोमयागो लक्ष्यते। तस्य प्रातः सवनादिरूपेण त्रिः त्रिधा विभक्तं भागम् अंशं दधतीं बिभ्रतीम्। अनुसवनं हविर्भिर्यजमानामित्यर्थः ॥ सुक्षत्रम्। बहुव्रीहौ 'नञ्सुभ्याम्' इति उत्तरपदान्तोदात्तत्वम्। सुवीर्यम्। 'वीरवीर्यौ च' इति बहु-व्रीहौ उत्तरपदाद्युदात्तत्वम्। जह्नावीम्। जह्नशब्दात् 'तस्येदम्' इत्यर्थे अण्। 'टिड्ढाणञ्०' इति ङीप्। जाह्नवी। ह्रस्वदीर्घयोर्विनिमयः पृषोदरादित्वात्। उक्तं च— 'वर्णागमो वर्णविपर्ययश्च' (का० ६.३.१०९) इति। अत एव मध्योदात्तत्वम् ॥

**अन्वय—** नासत्या, सुक्षत्रं स्वपत्यं रयिं सुवीर्यम् आयुः वहन्ता समनसा अह्नः त्रिः भागं दधतीं जह्नावीम् उप आ अयातम्।

**पदार्थ—** नासत्या = हे दोनों नासत्यो। सुक्षत्रं = सुन्दर शक्तिसम्पन्न। स्व-पत्यम् = सुन्दर सन्तान युक्त। रयिम् = धन को। सुवीर्यम् = सुन्दर पराक्रम वाली। आयुः = आयु को। वहन्ता = वहन करते हुए, लाते हुए, देते हुए। समनसा = समान मन वाले। अह्नः = दिन में। त्रिः = तीन बार। भागम् = हिस्सा, अंश। दधतीम् = देती हुई। जह्नावीम् = जह्नु की सन्तान को (के)। उप = समीप। आ अयातम् = तुम दोनों आये।

**अनुवाद—** हे दोनों नासत्यो, सुन्दर शक्तिसम्पन्न (और) सुन्दर सन्तानयुक्त धन को (तथा) सुन्दर पराक्रम वाली आयु को देते हुए समान मन वाले तुम दोनों दिन में तीन बार (तुम्हारा) भाग (अंश) देती हुई जह्नु की सन्तान के समीप आये।

**व्याकरण—**

१. सुक्षत्रम्, स्वपत्यम्, सुवीर्यम् – सुष्ठु क्षत्रं यस्मिन् तादृशम्, सुष्ठु अपत्यं यस्मिन् तादृशम्, सुष्ठु वीर्यं यस्मिन् तादृशम् (बहुव्रीहि)।

२. वहन्ता – √वह् + शतृ, प्रथमा द्विवचन वहन्तौ का वैदिकरूप।

३. समनसा – सम मनः ययोः तादृशौ (बहुव्रीहि) समनसौ का वैदिकरूप।

४. जह्नावीम् – जह्नु + अण् + ङीप्, द्वितीया, एकवचन।

५. दधतीम् – √धा + शतृ + ङीप्, द्वितीया, एकवचन।

परिविष्टं जाहुषं विश्वतः सीं
सुगेभिर्नक्तमूहथू रजोभिः ।
विभिन्दुना नासत्या रथेन
वि पर्वताँ अजरयू अयातम् ॥२०॥

**पदपाठ—** परिऽविष्टम् । जाहुषम् । विश्वतः । सीम् । सुऽगेभिः । नक्तम् । ऊहथुः । रजःऽभिः ॥ विऽभिन्दुना । नासत्या । रथेन । वि । पर्वतान् । अजरयू इति । अयातम् ॥२०॥

**सा० भा०—** जाहुषो नाम कश्चिद्राजा । विश्वतः सर्वतः परिविष्टं शत्रुभिः परिवृतं तं राजानं हे नासत्यावश्विनौ अजरयू जरारहितौ नित्यतरुणौ युवां विभिन्दुना विशेषेण सर्वस्य भेदकेनात्मीयेन रथेन नक्तं रात्रौ सुगेभिः सुष्ठु गन्तुं शक्यैः रजोभिः रञ्जकैर्मार्गैः ऊहथुः तस्मात् शत्रुसमूहान्निरगमयतम् । सीम् इत्येतत् पादपूरणम् । निर्गतेन तेन सह पर्वतान् शत्रुभिरारोढुमशक्यान् शिलोच्चयान् वि अयातं विशेषेणागच्छतम् ॥ परिविष्टम् । 'विश प्रवेशने' । कर्मणि निष्ठा । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । सुगेभिः । 'सुदुरोरधिकरणे' इति गमेर्डः । विभिन्दुना । 'भिदिर् विदारणे' । औणादिक उप्रत्ययो नुमागमश्च । अजरयू । न जरा अजरा तामात्मन इच्छतः । 'सुप आत्मनः क्यच्' । 'न च्छन्दस्यपुत्रस्य' इति इत्वदीर्घयोर्निषेधः । 'क्याच्छन्दसि' इति उप्रत्ययः ॥

**अन्वय—** विश्वतः परिविष्टं जाहुषं नक्तं सुगेभिः रजोभिः ऊहथुः । अजरयू नासत्या, विभिन्दुना रथेन पर्वतान् वि अयातम् ।

**पदार्थ—** विश्वतः = चारो ओर से । परिविष्टम् = घिरे हुए । जाहुषम् = जाहुष को । नक्तम् = रात्रि में । सुगेभिः = सुगम, चलने में आसान । रजोभिः = आकाश मार्ग से । ऊहथुः = ले आये । अजरयू = हे कभी वृद्ध न होने वाले । नासत्या = हे दोनों नासत्यो । विभिन्दुना = शत्रुओं का भेदन करने वाले । रथेन = रथ से । पर्वतान् = पर्वतों को । वि अयातम् = विशेषरूप से पार किया ।

**अनुवाद—** चारों ओर से (शत्रुओं द्वारा) घिरे हुए जाहुष को रात्रि में सुगम आकाश मार्ग से ले आये । हे कभी वृद्ध न होने वाले दोनों नासत्यों, शत्रुओं को भेदन (विनष्ट) करने वाले रथ से पर्वतों को पार किया ।

**व्याकरण—**

१. परिविष्टम् – परि + विष् + क्त द्वितीया, एकवचन ।
२. सीम् – पादपूरणार्थकनिपात ।
३. सुगेभिः – तृतीया बहुवचन, सुगैः का वैदिकरूप ।
४. विभिन्दुना – √भिद् + उ । तृतीया, एकवचन ।
५. अजरयू – नञ् + √जॄ + क्यच् + उ । पदान्त अकार प्रगृह्य है ।
६. अयातम् – √या + लङ् मध्यमपुरुष, द्विवचन ।

एकस्या वस्तोरावतं रणाय
वशमश्विना सनये सहस्रा ।
निरहतं दुच्छुना इन्द्रवन्ता
पृथुश्रवसो वृषणावरातीः ॥२१॥

**पदपाठ—** एकस्याः । वस्तोः । आवतम् । रणाय । वशम् । अश्विना । सनये । सहस्रा ॥ निः । अहतम् । दुच्छुनाः । इन्द्रऽवन्ता । पृथुऽश्रवसः । वृषणौ । अरातीः ॥२१॥

**सा० भा०**— हे अश्विनौ वशम् एतत्संज्ञमृषिम् एकस्याः वस्तोः एकस्याह्नः रणाय रमणीयाय सहस्रा सहस्रसङ्ख्याकाय सनये घनलाभाय आवतम् अरक्षतम् । स ऋषिः प्रत्यहं यथा सहस्रसङ्ख्यं धनं लभते तथा रक्षितवन्तावित्यर्थः । अपि च हे वृषणौ कामानां वर्षितारावश्विनौ इन्द्रवन्ता इन्द्रेण संयुक्तौ युवां दुच्छुनाः दुष्टसुखान् दुःखस्य कर्तॄन् पृथुश्रवसः विस्तीर्णयशसः अरातीः शत्रून् निरहतं निःशेषेणावधिष्टम् । यद्वा । कानीनस्य पृथुश्रवःसंज्ञस्य राज्ञः शत्रूनिति योज्यम् ।। सहस्रा । 'सुपां सुलुक्०' इति चतुर्थ्या डादेशः । अहतम् । लङि थसस्तम् । 'अनुदात्तोपदेश०' इत्यादिना अनुनासिक-लोपः । दुच्छुनाः शुनमिति सुखनाम । दुष्टं सुखं यासां तास्तथोक्ताः । 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वम् ।।

**अन्वय**— अश्विना, वशम् एकस्याः वस्तोः सहस्रा रणाय सनये आवतम् । वृषणौ, इन्द्रवन्ता पृथुश्रवसः दुच्छुनाः अरातीः निरहतम् ।

**पदार्थ**— अश्विना = हे दोनों अश्विनो ! वशम् = वश को । एकस्याः = एक ही । वस्तोः = दिन में । सहस्रा = हजारो । रणाय = रमणीय, सुन्दर । सनये = धन की प्राप्ति के लिए । आवतम् = तुम दोनों ने रक्षा की । वृषणौ = हे कामनाओं (अभिलाषों) की वर्षा (पूर्ति) करने वाले । इन्द्रवन्ता = इन्द्र से युक्त, इन्द्र के साथ । पृथुश्रवसः = पृथुश्रवस् के । दुच्छुना = कष्ट देने वाले, दुष्ट । अरातीः = शत्रुओं को । निरहतम् = तुम दोनों ने मार डाला (विनष्ट कर दिया) ।

**अनुवाद**— हे दोनों अश्विनो, वश की एक ही दिन में हजारों सुन्दर धन की प्राप्ति के लिए तुम दोनों ने रक्षा की । हे कामनाओं (अभिलाषाओं) की वर्षा (पूर्ति) करने वाले (दोनों अश्विनो), इन्द्र के साथ तुम दोनों ने पृथुश्रवस् के कष्ट देने वाले (दुष्ट) शत्रुओं को मार डाला ।

**व्याकरण**—

१. आवतम् – आ + √अव् +लङ् मध्यमपुरुष, द्विवचन ।

२. सनये – √सन् + तुमर्थक अये प्रत्यय ।

३. अहतम् – √हन् + लङ् मध्यमपुरुष, द्विवचन ।

४. दुच्छुना – दुष्टं सुखं यासां तथोक्ताः (बहुव्रीहि) ।

**शरस्य चिदार्चत्कस्यावतादा**
**नीचादुच्चा चक्रथुः पातवे वाः ।**
**शयवे चिन्नासत्या शचीभि-**
**र्जसुरये स्तर्यं पिप्यथुर्गाम् ॥२२॥**

**पदपाठ**— **शरस्य । चित् । आर्चत्ऽकस्य । अवतात् । आ । नीचात् । उच्चा । चक्रथुः । पातवे । वारिति वाः ॥ शयवे । चित् । नासत्या । शचीभिः । जसुरये । स्तर्यम् । पिप्यथुः । गाम् ॥२२॥**

**सा० भा०**— आर्चत्कस्य ऋचत्कपुत्रस्य शरस्य एतत्संज्ञस्यापि स्तोतुः पिपा-सितस्य पातवे पानार्थं नीचात् नीचानात् अवतात् कूपात् उच्चा उच्चैरुपरिष्टात् वाः उदकं हे अश्विनौ युवाम् आ चक्रथुः आभिमुख्येन कृतवन्तौ । तथा हे नासत्यावश्विनौ शचीभिः युष्मदीयैः कर्मभिः परिचरणैः जसुरये श्रान्ताय शयवे चित् शयुनाम्ने ऋषये निवृत्तप्रसवां गाम् अग्निहोत्रार्थस्य पयसो दोग्ध्रीं पिप्यथुः पयसा युवामापूरितवन्तौ ।। पातवे । 'पा पाने' । 'तुमर्थे सेसेन्०' इति तवेन्प्रत्ययः । जसुरये । 'जसु हिंसायाम् ।' 'जसिसहोरुरिन्' (उ०सू० २.२३१) । स्तर्यम् । स्तीर्यते आच्छाद्यते प्रसवसामर्थ्या-भावेन इति स्तरीः । 'अवितृस्तृतन्त्रिभ्यः ईः' (उ०सू० ३.४३८) इति ईकारप्रत्ययः । 'वाच्छन्दसि' इति अमि पूर्वत्वस्य विकल्पितत्वात् अभावे यणादेशः । 'उदात्तस्वरित-योर्यणः०' इति परस्यानुदात्तस्य स्वरितत्वम् । पिप्यथुः । 'प्यायी वृद्धौ' लिटि व्यत्ययेन परस्मैपदम् । 'लिड्यङोश्च' (पा०सू० ६.१.२९) इति पीभावः ।।

**अन्वय**— आर्चत्कस्य शरस्य चित् पातवे नीचात् अवतात् वाः उच्चा आ चक्रथुः । नासत्या,

जसुरये शयवे चित् शचीभिः स्तर्यं गां पिप्यथुः ।



**पदार्थ**— आर्चत्कस्य = ऋचत्क के पुत्र । शरस्य = शर (नामक स्तुति करने वाले) को । चित् = आदरार्थक निपात । पातवे = पीने के लिए । नीचात् = नीचे । अवतात् = कुएँ से । वाः = जल को । उच्चा = ऊँचा, ऊपर । आ चक्रथुः = तुम दोनों ने किया । नासत्या = हे दोनों नासत्यो । जसुरये = थके हुए । शयवे = शयु के लिए । चित् = आदरार्थक निपात । शचीभिः = शक्ति से । स्तर्यम् = वन्ध्या । गाम् = गाय को । पिप्यथुः = दूध देने योग्य किया (बनाया) ।

**अनुवाद**— तुम दोनों ने ऋचत्क के पुत्र शर (नामक स्तुति करने वाले ) के लिए नीचे कुएँ से जल को ऊँचा (ऊपर) किया । हे दोनों नासत्यो, थके हुए शयु के लिए (अपनी) शक्ति से वन्ध्या गाय को दूध देने योग्य बनाया ।

**व्याकरण**—

१. पातवे – √पा + तुमर्थक वैदिक तवे प्रत्यय ।

२. वाः – वार् का द्वितीया, एकवचन ।

३. जसुरये – जसुरि का चतुर्थी, एकवचन । जसुरि = √जस् + उरिन् ।

४. पिप्यथुः – √पि + लिट्, मध्यमपुरुष, द्विवचन ।

**अवस्यते स्तुवते कृष्णियाय**
**ऋजूयते नासत्या शचीभिः ।**
**पशुं न नष्टमिव दर्शनाय**
**विष्णाप्वं ददथुर्विश्वकाय ॥२३॥**

**पदपाठ**— **अवस्यते । स्तुवते । कृष्णियाय । ऋजुऽयते । नासत्या । शचीभिः ॥ पशुम् । न । नष्टम्ऽइव । दर्शनाय । विष्णाप्वम् । ददथुः । विश्वकाय ॥२३॥**

**सा० भा०** — अवस्यते अवनं रक्षणमात्मन इच्छते । स्तुवते स्तुतिं कुर्वते कृष्णि-याय । कृष्णो नाम कश्चित् । तस्य पुत्राय । ऋजूयते आर्जवमिच्छते विश्वकाय एतत्-संज्ञाय ऋषये हे नासत्यौ युवां शचीभिः आत्मीयैः कर्मभिः विष्णाप्वं नाम विनष्टं पुत्रं दर्शनाय दर्शनार्थं ददथुः दत्तवन्तौ । तत्र दृष्टान्तः । पशुं न नष्टमिव । एक उपमार्थीयः पूरकः । यथा कश्चिद्विनष्टं पशुं स्वामिनो दृष्टिपथं प्रापयति तद्वत् ॥ अवस्यते । अवः शब्दात् 'सुप आत्मनः क्यच्' । 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम् । कृष्णियाय । कृष्णशब्दादपत्यार्थे छान्दसो घच् ॥

**अन्वय**— नासत्या, अवस्यते स्तुवते ऋजूयते कृष्णियाय विश्वकाय शचीभिः दर्शनाय नष्टं पशुं न विष्णाप्वम् ददथुः ।

**पदार्थ**— नासत्या = हे दोनों नासत्यो । अवस्यते = सहायता के इच्छुक । स्तुवते = स्तुति करने वाले । ऋजूयते = सरल जीवन यापन करने वाले । कृष्णियाय = कृष्ण के पुत्र । विश्वकाय = विश्वक के लिए । शचीभिः = शक्ति से । दर्शनाय = दर्शन के लिए । नष्टं = नष्ट हुए । पशुं न = पशु के समान । विष्णाप्वम् = विष्णापु को । ददथुः = प्रदान किया ।

**अनुवाद**— हे दोनों नासत्यो, सहायता के इच्छुक, स्तुति करने वाले (स्तोता), सरल जीवन यापन करने वाले, कृष्ण के पुत्र विश्वक के लिए तुम दोनों ने उसी प्रकार विष्णापु को दिया जिस प्रकार विनष्ट हुआ पशु (मालिक के पास) दर्शन (देखने) के लिए (आ जाय) ।

**व्याकरण**—

१. अवस्यते – अवस्यत् का पुल्लिङ्ग चतुर्थी एकवचन । अवस्यत् = अवस् + क्यच् ।

२. स्तुवते – स्तुवत् का पुल्लिङ्ग चतुर्थी एकवचन । स्तुवत् = √स्तु + शतृ ।

३. ऋजूयते – ऋजूयत् का पुल्लिङ्ग चतुर्थी एकवचन। ऋजूयत् = √ऋजूय् + शतृ।

**दश रात्रीरशिवेना नव द्यू-**
**नवनद्धं श्नथितमप्स्वन्तः।**
**विप्रुतं रेभमुदनि प्रवृक्त-**
**मुन्निन्यथुः सोममिव स्रुवेण ॥२४॥**

**पदपाठ**— **दश। रात्रीः। अशिवेन। नव। द्यून्। अवऽनद्धम्। श्नथितम्। अप्ऽसु। अन्तरिति ॥ विऽप्रुतम्। रेभम्। उदनि। प्रऽवृक्तम्। उत्। निन्यथुः। सोमम्ऽइव। स्रुवेण ॥२४॥**

**सा० भा०**— पुरा खलु रेभमृषिं पाशैर्बध्वा असुराः कूपे कस्यचिद्दिवसस्य सायं-काले प्रचिक्षिपुः। स च अश्विनौ स्तुवन् दश रात्रीः नवाहानि च कूपमध्ये तथैवावतस्थे। दशमेऽहनि प्रातः अश्विनौ तं कूपात् उदतारयतामिति। तदाह। अप्सु कूपान्तर्वर्तमानासु अन्तः मध्ये असुरैः पातितम् अशिवेन दुःखहेतुना दाम्ना अवनद्धं बद्धं श्नथितं शत्रु-भिर्हिंसितं दश रात्रीः दशसङ्ख्याका निशाः नव द्यून् नवसङ्ख्याकान्यहानि च। अत्यन्त-संयोगे द्वितीया। एतावन्तं कालं तत्रैव कूपेऽवस्थितम् अत एव उदनि उदके विप्रुतं विप्लुतं व्याक्षिप्तसर्वाङ्गं प्रवृक्तम्। लुप्तोपममेतत्। प्रवृञ्जनेन सन्तप्तं घर्ममिव व्यथया सन्तप्यमानम् एवंभूतं रेभं हे अश्विनौ युवाम् उन्निन्यथुः तस्मात्कूपात् उन्नीतम् उत्तीर्णं कृतवन्तौ। तत्र दृष्टान्तः। सोममिव यथा अग्निहोत्रहोमार्थम् अभिषुतं सोमरसं कूपसदृशे अग्निहोत्रस्थालीमध्ये वर्तमानं स्रुवेण अध्वर्युः उन्नयति नयति तद्वत्॥ अवनद्धम्। 'णह बन्धने'। कर्मणि निष्ठा। 'नहो धः' (पा०सू० ८.२.३४)। 'झषस्तथोर्धोऽधः' इति निष्ठातकारस्य धत्वम्। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। श्नथितम्। 'श्नथ हिंसार्थः'। निष्ठा। विप्रुतम्। 'प्रुङ् गतौ'। अवनद्धवत् प्रत्ययस्वरौ। कपिल-कादित्वात् लत्वविकल्पः। उदनि। 'पद्दन्०' इत्यादिना उदकशब्दस्य उदन्भावः॥

**अन्वय**— दश रात्री नव द्यून् स्नथितम् अशिवेन अवनद्धम् अप्सु अन्तः विप्रुतम् उदनि प्रवृक्तं रेभं स्रुवेण सोमम् इव अन्निन्यथुः।

**पदार्थ**— दश = दस। रात्री = रात्रि। नव द्यून् = नव दिनों तक। स्नथितम् = पीटे हुए। अशिवेन = कष्टकारी रस्सी से। अनवद्धम् = बँधे हुए। अप्सु अन्तः = जल के मध्य में। विप्रुतम् = फेके गये। उदनि = जल में। प्रवृत्तम् = कष्ट सहते हुए। रेभम् = रेभ को। स्रुव्रेण = स्रुवा से। सोमम् इव = सोम के समान। उन्निन्यथुः = तुम दोनों ने बाहर निकाला।

**अनुवाद**— (हे दोनों अश्विनो), तुम दोनों ने दस रात्रि (और) नव दिनों तक पीटे हुए, कष्टकारी रस्सी से बाँधे हुए, जल के मध्य में फेके गये तथा जल में कष्ट सहते हुए रेभ को स्रुवा द्वारा सोम के समान बाहर निकाला।

**व्याकरण**—

१. अनवद्धम् – अव + √नह् + क्त, द्वितीया, एकवचन।
२. श्नथितम् – √स्नथ् + क्त, द्वितीया, एकवचन।
३. विप्रुतम् – वि + √प्रु + क्त, द्वितीया, एकवचन।
४. प्रवृक्तम् – प्र + वृज् + क्त, द्वितीया, एकवचन।

**प्र वां दंसांस्यश्विनाववोच-**
**मस्य पतिः स्यां सुगवः सुवीरः।**
**उत पश्यन्नश्नुवन्दीर्घमायु-**
**रस्तमिवेज्जरिमाणं जगम्याम् ॥२५॥**

पदपाठ— प्र । वाम् । दंसांसि । अश्विनौ । अवोचम् । अस्य । पतिः । स्याम् । सुऽगवः । सुऽवीरः ॥ उत । पश्यन् । अश्नुवन् । दीर्घम् । आयुः । अस्तम्ऽइव । इत् । जरिमाणम् । जगम्याम् ॥२५॥

**सा० भा०**— एवमनेन सूक्तेन अश्विनोर्महिमानं प्रशस्य अधुना मन्त्रद्रष्टा स्वा-भीष्टं प्रार्थयते । हे अश्विनौ वां युवयोः दंसांसि पुरा कृतानि कर्माणि प्र अवोचम् इत्थम् उक्तवानस्मि । सोऽहं सुगवः शोभनगोयुक्तः सुवीरः शोभनवीरश्च भूत्वा अस्य राष्ट्रस्य पतिः अधिपतिः स्यां भवेयम् । उत अपि च पश्यन् अक्षिभ्यां पश्यन् । उपलक्षण-मेतत् । सर्वैरिन्द्रियैः स्वस्वविषयदर्शनसमर्थैः दीर्घं वर्षशतरूपेण आयतम् आयुः जीवितं च अश्नुवन् प्राप्नुवन्नहम् अस्तमिव यथा गृहं गृहस्वामी निष्कण्टकं प्रविशति एवं जरि- माणं जरां जगम्यां कण्टकराहित्येन प्राप्नुयाम् । वृद्धः सन् चिरकालं निवसेयमित्यर्थः । स्याम् । अस्तेः प्रार्थनायां लिङ् । यासुट् । 'श्नसोरल्लोपः' इत्यकारलोपः । अश्नुवन् । 'अशू व्याप्तौ' । व्यत्ययेन शतृ । जरिमाणम् । 'जृष् वयोहानौ' । अस्मादौणादिकः इम-निच् । जगम्याम् । गमेः प्रार्थनायां लिङि 'बहुलं छन्दसि' इति विकरणस्य श्लुः ॥

**अन्वय**— अश्विनौ, दंसांसि प्रवोचम्, सुगवः सुवीरः अस्य पतिः स्याम् । उत पश्यन् दीर्घम् आयुः अश्नुवन् अस्तम् इव जरिमाणं जगम्याम् ।

**पदार्थ**— अश्विनौ = हे दोनों अश्विनो ! दंसांसि = पराक्रमयुक्त कार्यों को । प्रवोचम् = मैंने कह दिया (वर्णन कर दिया) । सुगवः = सुन्दर गायों वाला । सुवीरः = सुन्दर सन्तानों वाला । अस्य = इस (राष्ट्र) का । पतिः = स्वामी । स्याम् = मैं होऊँ । उत = और । पश्यन् = देखता हुआ । दीर्घम् = दीर्घ । आयुः = आयु को । अश्नन् = प्राप्त करता हुआ । अस्तम् इव = घर के समान । जरिमाणम् = वृद्धावस्था को । जगम्याम् = जाऊँ, प्राप्त करूँ ।

**अनुवाद**— हे दोनों अश्विनो, मैंने (तुम्हारे) पराक्रमयुक्त कार्यों को कह दिया (वर्णन कर दिया) । सुन्दर गायों वाला सुन्दर सन्तानों से युक्त मैं इस (राष्ट्र) का स्वामी होऊँ (और) देखता हुआ, दीर्घ आयु को प्राप्त करता हुआ मैं उसी प्रकार वृद्धावस्था को जाऊँ (प्राप्त करूँ) जैसे (लोग) घर को जाते हैं ।

**व्याकरण**—

१. अवोचम् – √वच् (कहना) + लुङ् उत्तमपुरुष, एकवचन ।

२. सुवीरः, सुगवः – सुष्ठु वीरः यस्य तादृशः, सुष्ठु गौ यस्य तादृशः (बहुव्रीहि) ।

३. अश्नुवन् – √अश् + शतृ, पुल्लिङ्ग प्रथमा, एकवचन ।

४. पश्यन् – √दृश् + शतृ, पुल्लिङ्ग प्रथमा, एकवचन ।

५. जरिमाणम् – √जीर् + इमिनिच् ।

६. जगम्याम् – √गम् + लिट् उत्तमपुरुष, एकवचन ।

**अभ्यास**—

(१) निम्नलिखित मन्त्रों का हिन्दी में अनुवाद कीजिए—

(क) नासत्याभ्यां बर्हिरिव..................१

(ख) तुग्रो ह भुज्युमश्विनोदमेघे..............३

(ग) युवं नरा स्तुवते पज्रियाय...............७

(घ) तद्वां नरा सनये दंस..........१२

(ङ) शतं मेषान्वृक्ये.............१६

(२) निम्नलिखित पर व्याकरणात्मक टिप्पणी लिखिए—

(क) आशुहेमभिः ।

(ख) अश्विना ।

(ग) विद्वांसा ।

(घ) अपगूहम्।

(ङ) सर्तवे।

## ५.१ विश्वामित्र-नदी-संवाद

**वेद–ऋग्वेद** मण्डल संख्या–३ **सूक्त संख्या–३३**

**ऋषि-१-५,७,९,११ विश्वामित्र** देवता-इन्द्र छन्द-त्रिष्टुप्,

४,६,८,१० नदी ११ अनुष्टुप्

**प्र पर्व॑तानामुश॒ती उ॒पस्था॑-**
**दश्वे॑इव॒ विषि॑ते॒ हास॑माने ।**
**गावे॑व शु॒भ्रे मा॒तरा॑ रिहा॒णे**
**विपा॑ट्छुतु॒द्री पय॑सा जवेते ॥१॥**

**पदपाठ**— **प्र । पर्व॑तानाम् । उ॒श॒ती इति॑ । उ॒पऽस्था॑त् । अश्वे॑ इ॒वेत्यश्वे॑ऽइव । विसि॑ते॒ इति॑ विऽसि॑ते । हास॑माने॒ इति॑ ॥** गावा॑ऽइव । शु॒भ्रे इति॑ । मा॒तरा॑ । रि॒हा॒णे इति॑ । विऽपा॑ट् । शु॒तु॒द्री । पय॑सा । ज॒वे॒ते॒ इति॑ ॥

**सा० भा०**— पर्वतानां गिरीणां शैलानाम् उपस्थात् उत्सङ्गान्निर्गत्य उशती समुद्र-गमनं कामयमाने। गमने दृष्टान्तः। अश्वेइव। यथा विसिते मन्दुरातो विमुक्ते हासमाने अन्योन्यजवेन स्पर्धमाने। यद्वा हृष्यन्त्यावश्वे इव बडवे इव त्वरया गच्छन्त्यौ परस्परं हृष्यन्त्यौ। तथा गावेव शुभ्रे। यथा द्वौ गावौ शोभमानौ वर्तेते तद्वच्छुभ्रे शोभमाने। किञ्च मातरा। यथा मातरौ धेनू रिहाणे। अन्तर्णीतत्सन्नर्थो लिहिः। वत्सं जिह्वया लेढुमिच्छन्त्यौ शीघ्रं गच्छतस्तद्वत् समुद्रं गन्तुं जवात् गच्छन्त्यौ पयसा संयुक्ते विपाट्। कूलविपाटनात् विपाशनाद्वा विमोचनाद्वा विपाट्। शुतुद्री। शु क्षिप्रं तु तुन्ना द्रवति गच्छतीति शुतुद्री। एतन्नामके नद्यौ प्र जवेते समुद्रं प्रति शीघ्रं गच्छतः। अत्र निरुक्तं 'पर्वतानामुपस्थादुपस्थानादुशत्यौ कामयमाने अश्वे इव विमुक्ते इति वा विषण्णे इति वा हासमाने हासतिः स्पर्धायां हर्षमाणे वा गावाविव शुभ्रे शोभने मातरौ संरिहाणे विपाट्छुतुद्र्यौ पयसा प्रजवेते' (निरु० ९.३९) इति॥ उशती। 'वश कान्तौ'। अस्य शतुर्ङित्त्वात् 'ग्रहिज्यावयि' इत्यादिना संप्रसारणम्। विषिते। 'षिञ् बन्धने' इत्यस्य कर्मणि निष्ठा। संहितायां 'परिनिविभ्यः सेवसितसयसिवुसह०' इत्यादिना षत्वम्। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरः। हासमाने। हासतिः स्पर्धाकर्मा हसे हसने वा। शानच्। तस्य लसार्वधातुकस्वरे कृते धातुस्वरः। रिहाणे। 'लिह आस्वादने'। स्वरितत्त्वादुभयपदी। शानच्। अदादित्वाच्छपो लुक्। लकारस्य रेफश्छान्दसः। रेफमवलम्ब्य णत्वम्। चित्वादन्तोदात्तः। विपाट्। 'पट गतौ' 'पश बाधनस्पर्शयोः' इति वा ण्यन्तावेतौ विपूर्वौ। शकारस्य व्रश्चादिना षत्वम्। शुतुद्री। छान्दसी रूपसिद्धिः। जवेते। 'जुङ् गतौ' भौवादिः। ङित्त्वादात्मनेपदम्। 'आतो ङितः' इति इयादेशः। निघातः॥

**अन्वय**— पर्वतानाम् उपस्थात् उशती, विषिते हासमाने अश्वे इव, मातरा रिहाणे शुभ्रे गावा इव, विपाट्शुतुद्री पयसा प्र जवेते।

**पदार्थ**— पर्वतानाम् = पर्वतों की। उपस्थात् = गोद से। उशती = इच्छा करती हुई, कामना करती हुई। विषिते = खुले लगाम वाली, खोली गयी। हासमाने = परस्पर स्पर्धा से दौड़ती हुई अथवा हिनहिनाती हुयी। अश्वे इव = दो घोड़ियों के समान। मातरा = माताएँ। रिहाणे = चाटती हुई। शुभ्रे = सफेद रंग की, शोभायमान होते हुए। गावा इव = दो गायों के समान। विपाट् = विपाट् (नाम वाली सिन्धु की सहायक एक नदी)। शुतुद्री = शुतुद्री (नाम वाली सिन्धु की एक सहायक नदी)। पयसा = जल के प्रवाह से। प्र जवेते = तेजी से बह रही हैं।

**अनुवाद**— पर्वतों की गोद से (निकलकर) समुद्र की ओर जाने की) इच्छा करती हुई, (परस्पर)

स्पर्धा से दौड़ती हुई, खुले लगाम वाली दो घोड़ियों के समान, (बछड़े को) चाटती हुई दो सफेद माता गायों के समान, विपाट् और शुतुद्री (अपने) जल के प्रवाह से तेजी से बह रही हैं।

**व्याकरण—**

१. उशती – √वश् कान्तौ + शतृ (अत्) ङीप् + (ई)। 'ग्रहिज्या०' सूत्र से सम्प्रसारण होकर = उशती।

२. उपस्थात् – उपस्थीयते अत्र। उप + √स्था + क (अ) = उपस्थ। पञ्चमी विभक्ति का एकवचन।

३. विषिते – वि + √षिञ् (बन्धने) + क्त = विषित। स्त्रीलिङ्ग, प्रथमा, द्विवचन।

४. हासमाने – √हास (स्पर्धायां हर्षमाणे वा) + शानच् + हासमान, स्त्रीलिङ्ग, प्रथमा, द्विवचन।

५. शुभ्रे – √शुभ् (कान्तौ) शुभ् + र = शुभ्र स्त्रीलिङ्ग प्रथमा द्विवचन।

६. रिहाणे – √लिह् (आस्वादने) + शानच् (आन) 'ल को छान्दस र आदेश' 'न' को 'ण' होकर = रिहाण, स्त्रीलिङ्ग, प्रथमा द्विवचन।

७. विपाट् – वि + √पट् (गतौ) अथवा वि + √पश् (बन्धनस्पर्शयोः) + णिच् + क्विप्।

८. जवेते – √जुङ् (गतौ)। आत्मनेपद, लट्, प्रथमपुरुष, द्विवचन।

**विशेष—**

१. प्रस्तुत सूक्त के विषय में यह आख्यान प्रसिद्ध है कि विश्वामित्र ऋषि सुदास नामक राजा के पुरोहित थे। पौरोहित्य से उनको प्रभूत धन प्राप्त हुआ। उस धन को लेकर वे अपने अनुयायियों के साथ विपाट् और शुतुद्री (व्यास और सतलज) नदियों के संगम पर पहुँचे। उन्होंने नदियों के पार जाने की इच्छा की। परन्तु नदियों के अगाध जल को देखकर उन्होंने उनकी स्तुति किया।

२. सायण ने 'उशती' की निष्पत्ति 'वश कान्तौ' से करके इनका अर्थ 'कामना करती हुई' किया है। पीटर्सन ने भी इसी प्रकार निष्पत्ति मानी है। परन्तु उसका अर्थ है— कान्ति से सम्भृत। विषित = वि + सि To let loose। लुई रेनो ने उशती का अर्थ 'Joyful ones' किया है। सायण ने हास धातु के दो अर्थ यास्क का अनुकरण करते हुए बताया हैं— स्पर्धा करना और प्रसन्न होना। परन्तु पाश्चात्य विद्वान् इसका अर्थ दौड़ में दौड़ना भी करते हैं। पीटर्सन के अनुसार ऋग्वेद में 'हासमान' पद का प्रयोग तीन स्थानों पर हुआ है और इसका भाव है— Running। लुई रेनो यहाँ हसासमाने का अर्थ 'Who rush in to the arena' किया है।

**इन्द्रे॑षिते प्रस॒वं भिक्ष॑माणे॒**
**अच्छा॑ समु॒द्रं र॒थ्ये॑व याथः।**
**स॒मा॒रा॒णे ऊ॒र्मिभि॒ः पिन्व॑माने**
**अ॒न्या वा॑म॒न्याम॒प्ये॑ति शु॒भ्रे ॥२॥**

**पदपाठ**— इन्द्रे॑षिते॒ इतीन्द्र॑ऽइषिते। प्र॒ऽस॒वम्। भिक्ष॑माणे॒ इति॑। अच्छ॑। स॒मु॒द्रम्। र॒थ्या॑ऽइव। या॒थः॥ स॒मा॒रा॒णे इति॑ स॒म्ऽआ॒रा॒णे। ऊ॒र्मिऽभिः। पिन्व॑माने॒ इति॑। अ॒न्या। वा॒म्। अ॒न्याम्। अपि॑। ए॒ति॒। शु॒भ्रे इति॑॥

**सा० भा०**— हे नद्यौ इन्द्रेषिते प्रेषिते प्रसवं तस्येन्द्रस्यानुज्ञां भिक्षमाणे प्रार्थयमाने युवां समुद्रम् अच्छ आभिमुख्येन याथः गच्छथः। तत्र दृष्टान्तः। रथ्येव इति। यथा रथिनौ लक्ष्यं देशमभिगच्छतस्तद्वत्। किं कुर्वत्यौ। समाराणे परस्परं सङ्गच्छन्त्यौ ऊर्मिभिः तरङ्गैः पिन्वमाने परिसरप्रदेशं सन्तर्पयन्त्यौ शुभ्रे शोभमाने। युवां समुद्रं गच्छथ इति पूर्वेणान्वयः। तथा वां युवयोर्मध्ये अन्या एका अन्याम् अपरां नदीम् अप्येति अपि गच्छति। परस्परमैक्यमापद्यत इत्यर्थः॥ इन्द्रेषिते। 'इष गतौ' इत्यस्य कर्मणि निष्ठायाः 'तीषसह०' इत्यादिना इडागमः। तृतीया कर्मणि' इति पूर्वपदस्वरः। प्रसवम्। 'षू प्रेरणे' इत्यस्य अप्। याथादिस्वरः। भिक्षमाणे। 'भिक्ष याच्ञायाम्'। आत्मनेपदी। शानचो लसार्वधातुकस्वरेणानुदात्तत्वे धातुस्वरः। रथ्येव।

रथस्येमौ । तस्येदम् इत्यर्थे 'रथाद्यत्' इति यत्प्रत्ययः । तित्स्वरितः । इवेन विभक्त्यलोपः इत्यादि । याथः । यातेर्लटि रूपम् । समाराणे । 'ऋ गतौ' इत्यस्य लिट् । सम्पूर्वस्यार्तेः 'समो गमि०' इत्यादिना आत्मनेपदत्वात् तस्य कानजादेशः । 'ऋच्छत्यृताम्' इति गुणः । पिन्वमाने । 'पिवि सेचने' । भूवादिः । लसार्वधातुकस्वरेण शानचोऽनुदात्तत्वे धातुस्वरः ॥

**अन्वय**— इन्द्रेषिते, प्रसवं भिक्षमाणे, समाराणे, ऊर्मिभिः पिन्वमाने, शुभ्रे समुद्रम् अच्छ रथ्या इव याथः । वाम् अन्या अन्यामपि एति ।

**पदार्थ**— इन्द्रेषिते = इन्द्र के द्वारा भेजी गयी । प्रसवम् = प्रवाहित होने के लिए । भिक्षमाणे = प्रार्थना करती हुई, याचना करती हुई । समाराणे = एक साथ जाती हुई । ऊर्मिभिः = तरङ्गों से, लहरों से । पिन्वमाने = उमड़ती हुई, तृप्त करती हुई । शुभ्रे = हे सफेद वर्ण वाली । समुद्रम् अच्छ = समुद्र की ओर । रथ्या इव = दो रथियों के समान । याथः =जा रही हो । वाम् = तुम दोनों में से । अन्या = एक । अन्याम् = दूसरे के पास । अपि = भी । एति = जा रही है ।

**अनुवाद**— (हे नदियो !) इन्द्र द्वारा भेजी गयी, बहने के लिए प्रार्थना करती हुई, दो रथियों के समान समुद्र की ओर जा रही हो । हे शुभ्रे ! एक साथ जाती हुई, लहरों से उमड़ती हुई, तुममें से प्रत्येक एक दूसरे की ओर जा रही हो ।

**व्याकरण**—

१. इन्द्रेषिते – इन्द्रेण इषिते, (तृतीया तत्पुरुष), √इष् (गतौ) + क्त, इट् का आगम = इषित ।

२. भिक्षमाणे – √भिक्ष् (याच्ञायाम्) + शानच् = भिक्षमाण ।

३. प्रसवम् – प्र + √सू (प्रेरणे) + अ (अप्) = प्रसव ।

४. रथ्या – रथ्यास्य इदम् । 'तस्येदम्' अर्थ में 'रथाधत्' सूत्र से 'यत्' प्रत्यय । रथ + य = रथ्य ।

५. याथः – √या (गतौ) लट् लकार, मध्यमपुरुष, द्विवचन ।

६. समाराणे – सम् + आ + √ऋ (गतौ) आन (कानच्) गुण होकर = अराण । सम् + आ + अराण = समाराण ।

७. पिन्वमाने – √पिवि (सेचने) + आन (शानच्) । नुम् और मुक् का आगम होकर पिन्वमान ।

**अच्छा सिन्धुं मातृतमामयासं**
**विपाशमुर्वी सुभगामगन्म ।**
**वत्समिव मातरा संरिहाणे**
**समानं योनिमनु सञ्चरन्ती ॥३॥**

**पदपाठ**— अच्छ । सिन्धुम् । मातृऽतमाम् । अयासम् । विऽपाशम् । उर्वीम् । सुऽभगाम् । अगन्म ॥ वत्सम्ऽइव । मातरा । संरिहाणे इति सम्ऽरिहाणे । समानम् । योनिम् । अनु । संचरन्ती इति सम्ऽचरन्ती ॥

**सा० भा०**— हे नद्यौ मातृतमाम् अतिशयेन मातरं सिन्धुं स्रवन्तीं शुतुद्रीं त्वाम् अच्छ आभिमुख्येन अयासं विश्वामित्रोऽहं प्राप्तोऽभूवम् । उर्वी महतीं सुभगां सौभाग्यवतीं विपाशं त्वाम् अगन्म वयं प्राप्ताः स्म । किं कुर्वत्यौ । मातरा मातरौ द्वे धेनू वत्समिव संरिहाणे अन्तर्णीतसन्नर्थो लिहिः । जिह्वया लेढुमिच्छन्त्यौ यथा वत्समनुगच्छतस्तद्वत् समानम् एकं योनिं स्थानं समुद्रम् अनु अभिलक्ष्य सञ्चरन्ती रन्त्यौ । युवामयासिषमिति पूर्वेणान्वयः ॥ अयासम् । 'या प्रापणे' इत्यस्य रूपम् । इडभावश्छान्दसः । अगन्म । गमेर्लङि 'बहुलं छन्दसि' इति शपो लुक् । 'म्वोश्च' इति मकारस्य नकारः । निघातः । सञ्चरन्ती । चरतिर्गत्यर्थः । तृतीयायुक्तत्वाभावात् आत्मनेपदाभावः । शतुर्लसार्वधातुक-स्वरेणानुदात्तत्वे कृते धातुस्वरः ॥

**अन्वय**— मातृतमाम् सिन्धुम् अच्छ अयासम् । उर्वीं, सुभगां विपाशम् अगन्म । मातरा वत्सम् इव

संरिहाणे समानं योनिम् अनुसञ्चरन्ती (अयासम्)।

**पदार्थ**— मातृतमाम् = सर्वश्रेष्ठ माता। सिन्धुम् = नदी। अच्छ = ओर, पास। अयासम् = आया हूँ, पहुँच गया हूँ। उर्वीम् = विशाल। सुभगाम् = सुन्दर, सौभाग्यशालिनी। विपाशम् = विपाशा (विपाट् की ओर)। अगन्म = आया हूँ, पहुँच गए हैं। मातरा इव = दो माता गायों के समान। वत्सम् = बछड़े। संरिहाणे = चाटने की इच्छा करती हुई। समानं योनिम् = एक ही स्थान। अनु = और। सञ्चरन्ती = साथ-साथ जाती है।

**अनुवाद**— श्रेष्ठ नदी माता (शुतुद्री) के पास आया हूँ, चौड़ी तथा सौभाग्य-शालिनी (सुन्दर) विपाट् के पास आया हूँ। बछड़ों को चाटती हुई दो माता (गायों) के समान, एक ही स्थान (समुद्र को लक्ष्य कर) बहती हुई (शुतुद्री और विपाट् के पासं आया हूँ)।

**व्याकरण**—

१. मातृतमाम् – अतिशयेन मातरम्। अतिशय अर्थ में तमप् प्रत्यय।
२. अयासम् – √या (प्राप्त करना), लुङ् लकार, उत्तमपुरुष, एकवचन।
३. सुभगाम् – शोभनः भगः यस्याः ताम् (बहुव्रीहि समास)।
४. संरिहाणे – सम् + √लिह् (आस्वादने) + शानच्, ल को र आदेश, नकार का णकार होकर रिहाण, स्त्रीलिङ्ग, प्रथमा, द्विवचन।
५. अगन्म – √गम् लुङ् उत्तमपुरुष बहुवचन।
६. सञ्चरन्ती – सम् + √चर् (विचरणे) + शतृ + ङीप् प्रथमा, द्विवचन, पदान्त ईकार प्रगृह्य।

**एना वयं पयसा पिन्वमाना**
**अनु योनिं देवकृतं चरन्तीः।**
**न वर्तवे प्रसवः सर्गतक्तः**
**किंयुर्विप्रो नद्यो जोहवीति ॥४॥**

**पदपाठ**— एना। वयम्। पयसा। पिन्वमानाः। अनु। योनिम्। देवऽकृतम्। चरन्तीः॥ न। वर्तवे। प्रऽसवः। सर्गऽतक्तः। किम्ऽयुः। विप्रः। नद्यः। जोहवीति॥

**सा० भा०**— एवं स्तुते नद्यौ विश्वामित्रं प्रत्यूचतुः। एना एनेन पयसा पिन्व-मानाः सन्तर्पयन्त्यः देवकृतं देवेनेन्द्रेण कृतं संदिष्टं योनिं स्थानं समुद्रम् अनु लक्षी- कृत्य चरन्तीः गच्छन्त्यः वयम् आस्महे। द्वयोर्बहुवचनं पूजार्थम्। तासामस्माकं सर्ग-तक्तः सर्गे गमने प्रवृत्तः प्रसवः उद्योगः न वर्तवे निवर्तनाय न भवति। किंयुः किमिच्छन् असौ विप्रः ब्राह्मणः नद्यः नदीः अस्मान् जोहवीति भृशमाह्वयति॥ एना। एतच्छब्दस्य तृतीयाया एनादेशः। 'सुपां सुलुक्' इति तृतीयाया आजादेशः। 'ऊडिदम्०' इति विभक्तेरुदात्तत्वम्। पिन्वमानाः। 'पिवि सेचने'। देवकृतम्। 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरः। कर्मणि' इति पूर्वपदप्रकृतिस्वरः। वर्तवे। 'वृतु वर्तने'। तुमर्थे तवेन्प्रत्ययः। नित्स्वरः। सर्गतक्तः। 'क्ते च' इति पूर्वपदप्रकृतिस्वरः। किंयुः। कि-मिच्छन्। 'क्यचि मान्ताव्ययप्रतिषेध' (पा०वा० ३.१.८.१) इति छान्दसत्वादत्र प्रति-षेधो न भवतीति क्यच्। 'क्याच्छन्दसि' इत्युप्रत्ययः। प्रत्ययस्वरः। नद्यः। छान्दसो यणादेशः। जोहवीति। ह्वेञः यङ्लुकि 'अभ्यस्तस्य च' इति सम्प्रसारणे कृते यङ्लुकोः' इत्यभ्यासस्य गुणः। 'यङो वा' इति इडागमः। गुणः। निघातः।

**अन्वय**— एना पयसा पिन्वमानाः वयं देवकृतं योनिम् अनुचरन्तीः। सर्गतक्तः प्रसवः वर्तवे न। किंयुः विप्रः नद्यः जोहवीति।

**पदार्थ**— एना = इस, ऐसी,। पयसा = जल से। पिन्वमानाः = संतृप्त करती हुई, उमड़ती हुई। वयम् = हम लोग। देवकृतम् = देव इन्द्र द्वारा बताये गये, देवताओं द्वारा निर्मित। योनिम् = स्थान

(की ओर)। अनुचरन्तीः = जाती हुई, विचरण करती हुई। सर्गतक्तः = बहने में प्रवृत्त होता हुआ, स्वाभाविक रूप से प्रवाहित। प्रसवः = प्रेरणा (उद्योग)। वर्तवे = रुकने के लिए। न = नहीं। किंयुः = क्या चाहता हुआ। विप्रः = ब्राह्मण (विश्वामित्र)। नद्यः = नदियों को। जोहवीति = बार-बार पुकारता है।

**अनुवाद**— विश्वामित्र द्वारा स्तुति की जाती हुई नदियाँ उत्तर देती हैं— इस जल से प्रान्तभूमियों को संतृप्त करती हुई हम देवराज इन्द्र द्वारा बताए स्थान समुद्र की ओर जा रही हैं। हमारा बहने में प्रवृत्त होता हुआ उद्योग (बहाव) रुकने के लिए नहीं है। क्या चाहता हुआ (किस इच्छा वाला) यह ब्राह्मण (विश्वामित्र) हम नदियों को बार-बार पुकार रहा है?

**व्याकरण**—

१. एना – इदम् शब्द। तृतीया विभक्ति के एकवचन में इदम् को 'एन' आदेश और विभक्ति को आ आदेश।
२. देवकृतम् – देवेन कृतम्। (तृतीया तत्पुरुष समास)। कृ + क्त = कृत।
३. वर्तवे – √वृ, तुमर्थक वैदिक तवेन् प्रत्यय। वृ + तवे = वर्तवे।
४. प्रसवः – प्र + √षू (प्रेरणे) + अ (अप्) = प्रसव।
५. सर्गतक्तः – सर्गे तक्तः। √सृज् + घञ् = सर्ग। तक् + क्त = तक्त।
६. किंयुः – 'किम् इच्छन्' अर्थ में 'क्यच्' प्रत्यय। किम् + य। 'क्यछन्दसि' सूत्र से उ प्रत्यय = किंयु।
७. जोहवीति – पुनः पुनः ह्वयते। यङ् प्रत्यय, यङ् का लोप, द्वित्व अभ्यास को 'ज' आदेश और गुण, सम्प्रसारण, इट् का आगम, गुण और अव आदेश होकर = जोहवीति।

**विशेष**—

१. 'पयसा पिन्वमानाः' का अर्थ पाश्चात्य विद्वानों ने 'Swelling with water' किया है और 'योनि' का अर्थ 'River Bed' किया है। इस स्थान पर बहने के लिए इन्द्र ने उन नदियों को निर्देश किया था। नदियाँ दो हैं, तथापि 'वयम्' में बहुवचन का प्रयोग आदर के लिए है। इस सूक्त में नदियाँ जब कुछ कहती हैं, तो अपने के लिए बहुवचन का प्रयोग करती हैं।

**रमध्वं मे वचसे सोम्याय**
**ऋतावरीरुप मुहूर्तमेवैः।**
**प्र सिन्धुमच्छा बृहती मनीषा-**
**वस्युरह्वे कुशिकस्य सूनुः ॥५॥**

**पदपाठ— रमध्वम्। मे। वचसे। सोम्याय। ऋतऽवरीः। उप। मुहुर्तम्। एवैः ॥ प्र। सिन्धुम्। अच्छ। बृहती। मनीषा। अवस्युः। अह्वे। कुशिकस्य। सूनुः ॥**

**सा० भा०**— विश्वामित्रो नदीः प्रति ब्रूते। ऋतावरीः। ऋतमुदकम् तद्वत्यो हे नद्यो यूयं मे विश्वामित्रस्य मम सोम्याय। उत्तीर्याहं सोमं संपादयामीत्येवं सोमसंपादिने वचसे तदर्थम् एवैः। पञ्चम्यर्थे तृतीया। शीघ्रगमनेभ्यः मुहूर्तं मुहूर्तमात्रम् उप रमध्वम्। उपपूर्वो रमिरुपसंहारे वर्तते। क्षणमात्रं शीघ्रगमनादुपरता भवत। सामान्येन नदीषूच्यमा-नासु समीहितं प्रयोजनमकुर्वतीषु पुरोवर्तिनीं शुतुद्रीं प्रति ब्रूते। कुशिकस्य राजर्षेः सूनुः विश्वामित्रोहऽहं बृहती महत्या मनीषा मनीषया स्तुत्या अवस्युः आत्मनो रक्षणमिच्छन् सन् सिन्धुं शुतुद्रीं त्वाम् अच्छ आभिमुख्येन प्र अह्वे प्रकर्षेणाह्वयामि। अत्र निरुक्तम्— 'उपरमध्वं मे वचसे सोम्याय सोमसम्पादिना ऋतावरीर्ऋतवस्य ऋतमित्युदकनाम प्रत्युतं भवति मुहूर्तमेवैरयनैरवनैर्वा। प्राभिह्वयामि सिन्धुं बृहत्या महत्या मनीषया मनस ईषया स्तुत्या प्रज्ञया वाननाय कुशिकस्य सूनुः। कुशिको राजा बृभूव (निरु० २.२५) इति ॥ रमध्वम्। 'रमु उपरमे'। उपपूर्वाद्रमतेः 'विभाषाकर्मकात्' (पा०सू० १.३.८५) इत्यात्मनेपदम्। ऋतावरीः ऋतशब्दान्मत्वर्थे 'छन्दसीवनिपौ' इति वनिप्। 'वनो र च' इति ङीप् रेफश्चान्तादेशः।

'वा छन्दसि' इति सवर्णदीर्घः। आमन्त्रितस्य पादादित्वात् षाष्ठिकमाद्युदात्तत्वम्। एवैः। 'इण् गतौ'। 'इण्शीङ्भ्यां वन्'। आर्धधातुकलक्षणो गुणः। नित्स्वरः। बृहती मनीषा। उभयत्र तृतीयायाः पूर्वसवर्णदीर्घः। अवस्युः। अवो रक्षणमिच्छन्। सुप आत्मनः क्यच्। 'नः क्ये' इति नकारान्तस्य पदसंज्ञाया नियमितत्वादत्र सकारस्य रुत्वं नभति। 'क्याच्छन्दसि' इत्युप्रत्ययः। अह्वे। ह्वयतेर्लुङि सिंचः 'आत्मनेपदेष्वन्यतरस्याम्' इत्यङादेशः। गुणः। निघातः॥

**अन्वय**— ऋतावरीः मे सोम्याय वचसे एवैः मुहूर्तम् उपरमध्वम्। कुशिकस्य सूनुः अवस्युः सिन्धुम् अच्छ बृहती मनीषा प्र अह्वे।

**पदार्थ**— ऋतावरीः = जल से भरी हुई। मे = मेरे। सोम्याय = सोम रस को सम्पादित करने के लिए। वचसे = कथन के निमित्त से। एवैः = अपनी गतियों से। मुर्हुतम् = क्षण भर के लिए। उपरमध्वम् = रुक जाओ। कुशिकस्य सूनुः = कुशिक नामक राजर्षि का पुत्र। अवस्युः = रक्षा प्राप्त करने की इच्छा करता हुआ। सिन्धुम् अच्छ = शुतुद्री नदी की ओर अभिमुख होकर। बृहती = महान्। मनीषा = स्तुति से। प्र अह्वे = जोर से पुकार रहा है।

**अनुवाद**— (नदियों के पूछने पर विश्वामित्र कहते हैं—) जल से भरी हुई हे नदियो ! मुझ विश्वामित्र के सोम को सम्पादित करने वाले कथन के निमित्त से ही तुम अपनी गति से क्षणभर के लिए रुक जाओ। (तदनन्तर विश्वामित्र शुतुद्री नदी की ओर उन्मुख होकर कहते हैं—) मैं कुशिक नामक राजर्षि का पुत्र (विश्वामित्र) रक्षा प्राप्त करने की इच्छा करता हुआ (तुम) शुतुद्री नदी की ओर अभिमुख होकर (अपनी) महान् स्तुति से (तुमको) जोर से पुकार रहा हूँ।

**व्याकरण**—

१. ऋतावरीः – 'ऋतम् यस्याः सा' अर्थ में ऋत शब्द से मतुप् के अर्थ में 'छन्दसीवनिपौ' सूत्र से वनिप् प्रत्यय। ऋत् + वन्। 'वनो र च' सूत्र से ङीप् और वन् के न को र आदेश 'वा छन्दसि' से दीर्घ होकर = ऋतावरी, सम्बोधन बहुवचन।

२. एवैः – √इण् (गतौ) 'इण्शीङ्भ्यां वन्' सूत्र से वन् प्रत्यय। इ + व। गुण होकर = एव। तृतीया का बहुवचन = एवैः। यहाँ पञ्चमी के अर्थ में तृतीया है।

३. मनीषा – मनसः ईषा = मनीषा। तृतीया के अर्थ में प्रथमा।

४. अवस्युः – 'अवः आत्मन इच्छति' अर्थ में 'सुप आमनः क्यच्' से क्यच् प्रत्यय। अवस् + य। 'क्याच्छन्दसि' सूत्र से उ प्रत्यय = अवस्युः।

**विशेष**—

१. यहाँ सायण ने 'ऋत' का अर्थ 'उदक करके' ऋतावरी का अर्थ 'जल से भरी हुई' किया है। सायण ने अपने अर्थ की पुष्टि यास्क के निरुक्त से की है— 'ऋतमित्युदकनाम'। पीटर्सन ने ऋत का अर्थ 'आदरणीय पवित्र' मानकर 'ऋतावरी' का अर्थ 'holy one' किया है। लुई रेनो ने इस शब्द का अर्थ Rite obsesvers किया है। उसके अनुसार ऋत का अर्थ 'वैदिक यज्ञ' है।

२. सायण ने 'सोम्याय' पद से यह अभिप्राय लेते हैं कि ऋषि को नदी के पार जाकर सोम का सम्पादन करना है, अतः उनका वचन 'सोम्य' है। यास्क ने भी 'सोम्याय' का अर्थ 'सोमसम्पादिने' किया है। पीटर्सन इससे यह अभिप्राय लेते है कि विश्वामित्र ऋषि अपने कथन के सोम भी प्रदान कर रहे हैं (My words that have accompanieal)। लुई रेनो सोम्याय में उपमा मानते है। विश्वामित्र के वचन सोम के समान मधुर है (my spech sweet like the Soma)

३. सायण ने 'मनीषा' का अर्थ स्तुति किया है। पीटर्सन इसका अर्थ अभिलाषा (Longing) करते हैं। लुई रेनो ने इसका अर्थ विचार (Thought) किया है। यास्क के अनुसार 'मनीषा' का अर्थ 'स्तुति अथवा प्रज्ञा' है।

इन्द्रो अस्माँ अरदद्वज्रबाहु-
रपाहन्वृत्रं परिधिं नदीनाम्।

**दे॒वो॑ऽनयत्सवि॒ता सु॑पा॒णि-**

**स्तस्य॑ व॒यं प्र॑स॒वे या॑म उ॒र्वीः ॥६॥**

**पदपाठ—** इन्द्रः । अ॒स्मान् । अ॒र॒दत् । वज्र॑ऽबाहुः । अप॑ । अ॒ह॒न् । वृ॒त्रम् । प॒रि॒ऽधिम् । न॒दीना॑म् ॥ दे॒वः । अ॒न॒य॒त् । स॒वि॒ता । सु॒ऽपा॒णिः । तस्य॑ । व॒यम् । प्र॒ऽस॒वे । या॒मः । उ॒र्वीः ॥

**सा० भा०—** नद्यः प्रत्यूचुः । हे विश्वामित्र वज्रबाहुः वज्रयुक्तो बाहुर्यस्यासौ वज्र-बाहुः । तादृशो बलवान् इन्द्रः नदीः अस्मान् अरदत् । रदतिः खनतिकर्मा । अखनत् । कथमखनत् । उच्यते । नदीनां शब्दकारिणीनामपां परिधिं परितो निहितमुदकमन्तः कृत्वा परितो वर्तमानमित्यर्थः । तादृशं वृत्रम् । वृणोत्याकाशमिति वृत्रो मेघः । तं मेघम् अपाहन् जघान । तस्मिन् हते आपः पतिताः । ताभिर्गच्छन्तीभिर्वयं खाताः । एवं मेघहननद्वारेणा-खनत् । न केवलखनत् किं तर्हि सविता सर्वस्य जगतः प्रेरकः सुपाणिः शोभनहस्तः उत्पत्तिस्थितिकर्तृत्वात्तादृशः देवः द्योतमानः इन्द्रः अस्मान् अनयत् । मेघभेदनं कृत्वोदक-प्रेरणेन समुद्रमपूरयत् । तस्य तादृशसामर्थ्योपेतस्य इन्द्रस्य प्रसवे अभ्यनुज्ञायां वर्त-माना: उर्वीः उदकैः प्रभूताः वयं यामः गच्छामः । न तव वचनादुपरमामहे । उक्तार्थं यास्को ब्रवीति— 'इन्द्रो अस्मानरदद्वज्रबाहू रदतिः खनतिकर्मपाहन्वृत्रं परिधिं नदीना-मिति व्याख्यातम् । देवोऽनयत्सविता सुपाणिः कल्याणपाणिः पाणिः पणायतेः पूजा-कर्मणः प्रगृह्य पाणी देवान् पूजयन्ति । तस्य वयं प्रसवे याम उर्वीरुर्व्यः' (निरु० २.२६) इति ॥ अरदत् । रदतेर्लङि रूपम् । वज्रबाहुः बहुव्रीहौ पूर्वपदस्वरः । अहन् । हन्तेर्लङि रूपम् । निघातः । परिधिम् । डुधाञ् धारणपोषणयोः' इत्यस्यात् कर्मण्युपसर्गे 'घोः किः' इति किप्रत्ययः । आतो लोपः । कृदुत्तरपदस्वरः । अनयत् । नयतेर्लङि रूपम् । 'पण व्यवहारे स्तुतौ च' । 'अशिपणाय्यो रुडायलुकौ ' (उ०सू० ४.५७२) इतीण् । आयलुक् । बहुव्रीहौ 'नञ्सुभ्याम्' इति स्वरः । प्रसवे 'षू प्रेरणे' । 'ऋदोरप्' इति भावेऽप्प्रत्ययः । 'थाथघञ्क्ता' इत्युत्तरपदान्तोदात्तत्वम् । यामः । 'या प्रापणे' इत्यस्य लटि रूपम् । निघातः । उर्वीः । उरुशब्दात् 'वोतो गुणवचनात्' इति ङीष् । 'वा छन्दसि' इति सवर्णदीर्घः । प्रत्ययस्वरः ॥

**अन्वय—** वज्रबाहुः इन्द्रः अस्मान् अरदत् । नदीनां परिधिं वृत्रम् अपाहन् । सविता सुपाणिः देवः अनयत् । वयम् उर्वीः तस्य प्रसवे यामः ।

**पदार्थ—** वज्रबाहुः = भुजाओं में वज्र को धारण करने वाले । इन्द्रः = इन्द्र ने । अस्मान् = हमको । अरदत् = खोदा । नदीनाम् = नदियों की । परिधिम् = घेर कर रोकने वाले । वृत्रम् = वृत्र को । अपाहन् = मारा । सविता = प्रेरणा देने वाला । सुपाणिः = शोभन हाथों वाला । देवः = तेज से चमकता हुआ । अनयत् = ले गया । वयम् = हम । उर्वीः = विशाल । तस्य = उसके । प्रसवे = प्रेरणा से । यामः = जाती हैं ।

**अनुवाद—** (नदियाँ प्रत्युत्तर देती हैं— हे विश्वामित्र !) भुजाओं में वज्र को धारण करने वाले इन्द्र ने हमको खोदा । (अर्थात् उसने खोदकर हमारे लिए मार्ग बनाया) । नदियों को (अर्थात् जलों को) चारों ओर से घेर कर रोकने वाले वृत्र को (इन्द्र ने) मारा । सबको प्रेरणा देने वाले और शोभन हाथों वाले तेज से दीप्तिमान् (इन्द्र) हमें (इस मार्ग से) ले गये । हम विशाल जल से भरी नदियाँ उसकी प्रेरणा से जाती हैं (बहती) हैं ।

**व्याख्या—**

१. अस्माँ – स्वर बाद में होने पर वेद में पदान्त आकार से परवर्ती नकार का लोप और पूर्ववर्ती स्वर अनुनासिक ।

२. अरदत् – √रद्, लङ् प्रथमपुरुष, एकवचन ।

३. अनयत् – √नी, लङ् प्रथमपुरुष, एकवचन ।

४. यामः – √या, लट् उत्तमपुरुष, बहुवचन ।

**प्र॒वाच्यं॑ शश्व॒धा वी॒र्यं१॒॑त-**

**[illegible] यदहिं॑ वि॒वृश्चत् ।**

वि वज्रेण परिषदो जघाना-

यन्नापोऽयनमिच्छमानाः ॥७॥

**पदपाठ**— **प्रऽवाच्यम् । शश्वधा । वीर्यम् । तत् । इन्द्रस्य । कर्म । यत् । अहिम् । विऽवृश्चत्** ॥ वि । **वज्रेण । परिऽसदः** । जघान । आयन् । आपः । **अयनम् । इच्छमानाः** ॥

**सा० भा०**— योऽयमिन्द्रः अहिं मेघं विवृश्चत् उदकप्रेरणार्थं जघानेति यत् कर्म छेदनरूपं तत् इदम् तस्य इन्द्रस्य वीर्यं सामर्थ्यं शश्वधा सर्वदा प्रवाच्यं प्रकर्षेण वच-नीयम् । तथा स इन्द्रः परिषदः परितः सीदत आसीनान् प्रतिबन्धकारिणोऽसुरान् वज्रेण वि जघान । अथ अयनं स्थानम् इच्छमानाः इच्छन्त्यः आपः आयन् यान्ति ॥ प्रवाच्यम् । 'वच परिभाषणे' इत्यस्मात् 'ऋहलोर्ण्यत्' इति ण्यत् । णित्त्वादुपधावृद्धिः । 'वचोऽशब्दसंज्ञायाम्' (पा०सू० ७.३.६७) इति कुत्वाभावः । व्यत्ययेनाद्युदात्तत्वम् । यद्वा वाच-यतेः 'अचो यत्' । 'यतोऽनावः' इति स्वरः । शश्वधा । शश्वच्छब्दात् स्वार्थे धाप्रत्ययस्तकारलोपश्च द्रष्टव्यः । विवृश्चत् । 'ओव्रश्चू छेदने' । तुदादिः । लङि 'ग्रहिज्यावयि०' इत्यादिना सम्प्रसारणम् । 'सह सुपा' इत्यत्र सहेति योगविभागात् समासः । समास-स्वरः । परिषदः । क्विप् । संहितायां 'सदिरप्रतेः' इति षत्वम् । जघान हन्तेर्लिटि णलि रूपम् । निघातः । आयन् । 'अय गतौ' इत्यस्य लङि रूपम् । पादादित्वादनिघातः । इच्छमानाः । इषु इच्छायाम् इत्यस्मात् व्यत्ययेन शानच् । तस्य लसार्वधातुकस्वरे कृते प्रत्ययस्वरः ॥

**अन्वय**— इन्द्रस्य तत् वीर्यं कर्म यत् अहिं विवृश्चत् शश्वधा प्रवाच्यम्, वज्रेण परिसदः विजघान, आपः अयनम् इच्छमानाः आयन् ।

**पदार्थ**— इन्द्रस्य = इन्द्र का । तत् = वह । वीर्यम् = पराक्रमयुक्त । कर्म = कार्य । यत् = जो । अहिम् = अहि (नामक असुर) को । विवृश्चत् = काट डाला, मार डाला । शश्वधा = सर्वदा । प्रवाच्यम् = प्रकृष्ट रूप से कहने (प्रशंसा करने) योग्य । वज्रेण = वज्र से । परिसदः = प्रतिबन्धकों को । वि जघान = मार डाला । आपः = जल । अयनम् = मार्ग को । इच्छमानाः = इच्छा करता हुआ, खोजता हुआ । आयन् = प्रवाहित हुआ ।

**अनुवाद**— इन्द्र का वह पराक्रमयुक्त कार्य, जो (उसने) अहि (जल को रोकने वाले अहि नामक असुर) को मार डाला, (वह) सर्वदा प्रकृष्टरूप से प्रशंसनीय है । (उस इन्द्र ने) वज्र से प्रतिबन्धकों (जल के रोकने वालों) को मार डाला (और) जल (अपने) मार्ग को खोजता हुआ प्रवाहित हुआ ।

**व्याकरण**—

१. प्रवाच्यम् – प्र + √वच् + ण्यत् ।

२. वीर्यम् – √वीर् + यत् ।

३. विवृश्चत् – √व्रश्च् (कर्त्तने) + लङ् प्रथमपुरुष, एकवचन ।

४. परिषदः – परि + √सद् + क्विप् ।

५. जघान – √हन् + लिट्, प्रथमपुरुष, एकवचन ।

६. आयन् – √इ (गमने) + लङ् प्रथमपुरुष, बहुवचन ।

७. इच्छमानाः – √इष् (अभिलाषे) + शानच्, प्रथमा, बहुवचन ।

एतद्वचो जरितर्मापि मृष्ठा

आ यत्ते घोषानुत्तरा युगानि ।

उक्थेषु कारो प्रति नो जुषस्व

मा नो नि कः पुरुषत्रा नमस्ते ॥८॥

पदपाठ— एतत् । वचः । जरितः । मा । अपि । मृष्ठाः । आ । यत् । ते । घोषान् ।

**उत्ऽतरा । युगानि ॥ उक्थेषु । कारो इति । प्रति । नः । जुषस्व । मा । नः । नि । करिति कः । पुरुषऽत्रा । नमः । ते ॥**

**सा० भा०**— नद्यः प्रसङ्गादिन्द्रस्तोत्रं कृत्वा विश्वामित्रं प्रत्यूचुः । जरितः स्तोतः हे विश्वामित्र ते त्वदीयं यत् संवादात्मकं वचः त्वं नः अभीत्या घोषान् उद्घोषयन् वर्तसे तद्वचः मापि मृष्ठाः मा विस्मार्षीः । कि कारणम् । उत्तरा युगानि उत्तरेषु याज्ञिकेषु युगेषु अहःसु उक्थेषु कारो शास्त्राणां कर्तस्त्वं नः अस्मान् प्रति जुषस्व संवादात्मकेन तेन वाक्येन प्रतिसेवस्व । इदानीं नः अस्मान् पुरुषत्रा पुरुषेषु मा नि कः । उक्तिप्रत्युक्ति-रूपसंवादवाक्याध्यापनेन नितरां पुंवत् प्रागल्भ्यः मा कार्षीः । ते तुभ्यं नमः ॥ मृष्ठाः । 'मृजूष् शुद्धौ' इत्यस्य लङि व्यत्ययेन आत्मनेपदम् । अदादित्वाच्छपो लुक् । व्रश्चा- दिना षत्वम् । निघातः । घोषान् । 'घुषिर् संशब्दने' इत्यस्य शतरि सर्वविधीनां छन्दसि विकल्पितत्वात् 'अतो गुणे' इति पररूपत्वाभावः । सवर्णदीर्घः । शतुर्लसार्वधातुक- स्वरे कृते धातुस्वरः । युगानि । 'युजिर् योगे' । उञ्छादिषु घञन्तत्वेन निपातनादगुण-त्वम् । विशिष्टविषयं च निपातनमिष्यते । 'कालविशेषे रथाद्युपकरणे च' इति तत्र पाठादेवान्तोदात्तत्वम् । 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया । कारो । करोतेः 'कृवापा-जिमि०' इत्यादिना उण्प्रत्ययः । आमन्त्रितत्वान्निघातः । कः । करोतेर्लुङि च्लेः 'मन्त्रे घस०' इत्यादिना लुक् हल्ङ्यादिना सिचो लोपः । 'न माङ्योगे' इत्यडभावः । पुरुषत्रा । 'देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम्' इति सप्तम्यर्थे त्राप्रत्ययः । प्रत्ययस्वरः ॥

**अन्वय**— जरितः, एतत् वचः अपि मा मृष्ठाः यत् ते उत्तरा युगानि आ घोषान् । कारो, उक्थेषु नः प्रति जुषस्व । नः पुरुषत्रा मा नि कः, ते नमः ।

**पदार्थ**— जरितः = हे स्तोता, हे स्तुति करने वाले । एतत् = इस । वचः = वचन को । अपि = भी, कभी भी । मा = नहीं, मत । मृष्ठाः = भूलना । यत् = जिससे । ते = तुम्हारे । उत्तरा = उत्तरवर्ती, भावी । युगानि = युगों वाले लोग । आघोषान् = सुन सकें । कारो = हे क्रान्तद्रष्टा (कवि) । उक्थेषु = स्तुतियों में । नः = हमारे । प्रति जुषस्व = प्रति आदर करो (रखो) । नः = हम लोगों को । पुरुषत्रा = पुरुषों (की श्रेणी) में । मा = मत । नि कः = नीचे करो (रखो) । ते = तुमको । नमः = नमस्कार है ।

**अनुवाद**— हे स्तुति करने वाले (विश्वामित्र), इस वचन को कभी भी मत भूलना जिससे तुम्हारे (इस वचन को) भावी युगों के लोग सुन सकें । हे क्रान्तद्रष्टा (कवि), (अपनी) स्तुतियों में हमारे लिए आदर रखो । हम लोगों को पुरुष (की श्रेणी) में नीचे मत रखो । तुमको नमस्कार है ।

**व्याकरण—**

१. जरितः – √जृ + तृच् = जरितृ, सम्बोधन ।

२. मृष्ठाः – √मृष् + लुङ् मध्यमपुरुष एकवचन ।

३. घोषान् – √घुष् (श्रवणे), लट्, प्रथमपुरुष बहुवचन, वैदिकरूप ।

४. कारो – √कृ + उण्, सम्बोधन, एकवचन ।

५. जुषस्व – √जुष् आत्मनेपद, लोट् मध्यमपुरुष, एकवचन ।

६. कः – √कृ, लुङ् मध्यमपुरुष एकवचन, वैदिकरूप ।

७. पुरुषत्रा– पुरुष + सप्तम्यर्थ देवमनुष्यपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् (पा०सू० ६.२.४९) से त्रा प्रत्यय ।

**ओ षु स्वसारः कारवे शृणोत**
**ययौ वो दूरादनसा रथेन ।**
**नि षू नमध्वं भवता सुपारा**
**अधोअक्षाः सिन्धवः स्रोत्याभिः ॥९॥**

**पदपाठ**— ओ इति । सु । स्वसारः । कारवे । शृणोत । ययौ । वः । दूरात् । अनसा ।

**रथेन ॥ नि । सु । नमध्वम् । भवत । सुऽपाराः । अधःऽअक्षाः । सिन्धवः । स्रोत्याभिः ॥**

**सा० भा०**— विश्वामित्रो नदीः प्रत्युवाच । स्वसारः भगिन्यः सिन्धवः हे नद्यः कारवे स्तोत्रं कुर्वाणस्य मम वचनं सुष्ठु ओ शृणोत शृणुतैव । अनया शकटेन रथेन च सह दूरात् विप्रकृष्टाद्देशात् वः युष्मात् ययौ प्राप्तोऽस्मि । यूयं सु सुष्ठु नि नमध्वम् आत्मना स्वयं प्रह्वाः भवत । तथा सुपाराः रथादीनां तीरात् सुखेनावरोहणावरोहणे यथा स्यातां तथा शोभनरोधसश्च भवत । किञ्च यूयं स्रोत्याभिः स्रवणशीलाभिरद्भिः अधो-अक्षाः रथाङ्गस्याक्षस्याधस्ताद्भवत । यदापोऽक्षस्याधस्ताद्भवन्ति तदा रथादीनि नेतुं शक्यन्ते । तस्मात् तत्परिमाणोदकाः भवतेति अर्थाभिप्रायः ॥ ओ अति प्रगृह्यसंज्ञा । शृणोत । 'श्रु श्रवणे' इत्यस्य लोटि तप्रत्ययस्य 'तप्तनप्तनथनाश्च' इति तवादेशः । पित्त्वाद्गुणः । निघातः । ययौ । 'या प्रायणे' इत्यस्य भूतमात्रे लिट्युत्तमे णलि 'आत औ णलः' इत्यौकारः एकादेशस्वरः । वः । युष्मच्छब्दस्य द्वितीयायाः बहुवचनस्य वस्नसौ' इति वसादेशः । षू । 'निपातस्य' इति संहितायां दीर्घः । नमध्वम् । 'णमु प्रह्वत्वं शब्दे च' इत्यस्य कर्मकर्तरि 'न दुहस्नुगमां यक्चिणी' इति प्रतिषेधात् यगभावः । अधोअक्षाः अधरशब्दस्य 'पूर्वाधरावराणामसि पुरधवश्चैषाम्' इत्यसिप्रत्ययोऽधादेशश्च । अक्षशब्दः 'अशूव्याप्तौ' इत्यस्मात् 'अशेर्दवने' (उ०सू० ३.३४५) इति सप्रत्ययान्तः । कृदुत्तर-पदप्रकृतिस्वरः । सिन्धवः । आमन्त्रितत्वान्निघातः । स्रोत्याभिः स्रोतःशब्दात् 'स्रोतसो विभाषा ड्यड्ड्यौ' (पा सू० ४.४.११३) इति ड्वप्रत्ययः । डित्वात् टिलोपः । प्रत्ययस्वरः ॥

**अन्वय**— ओ सु स्वसारः, कारवे शृणोत, वः दूरात् अनसा रथेन ययौ । सु नि नमध्वम् । सिन्धवः, स्रोत्याभिः अधो अक्षाः सुपारा भवत ।

**पदार्थ**— ओ सु स्वसारः = हे सुन्दर बहनो । कारवे = कवि की बात को । शृणोत = सुनो । वः = तुम्हारे (समीप) । दूरात् = बहुत दूर से । अनसा = गाड़ी द्वारा । रथेन = रथ द्वारा । ययौ = आया हूँ । सु नि नमध्वम् = तुम लोग अच्छी प्रकार से नीचे झुक जाओ । सिन्धवः = हे नदियो । स्रोत्यामिः = (अपनी) जलधाराओं से । अधोअक्षाः = अक्ष (धूरी) से नीचे । सुपारा = सरलता से पार होने योग्य । भवत = हो जाओ ।

**अनुवाद**— हे सुन्दर बहनो, तुम लोग (मुझ) कवि की बात को सुनो, हम बहुत दूर से गाड़ी द्वारा (और) रथ द्वारा तुम्हारे समीप आये हैं । तुम लोग अच्छी प्रकार से नीचे झुक जाओ । हे नदियो, अपनी जलधाराओं से रथ के अक्ष (धूरी) के नीचे (बहती हुई) तुम लोग सरलतापूर्वक पार होने योग्य हो जाओ ।

**व्याकरण**—

१. ओ – सम्बोधन वाचक निपात, प्रगृह्य ।

२. शृणोत – √श्रु (श्रवणे) लोट् मध्यमपुरुष, बहुवचन ।

३. ययौ – √या (गमने) लिट् उत्तमपुरुष, एकवचन ।

४. नमध्वम् – √नम् आत्मनेपद लोट् मध्यमपुरुष, बहुवचन ।

५. भवत – √भू लोट् मध्यमपुरुष, एकवचन ।

**आ ते कारो शृणवामा वचांसि**
**ययाथ दूरादनसा रथेन ।**
**नि ते नंसै पीप्यानेव योषा**
**मर्यायेव कन्या शश्वचै ते ॥१०॥**

**पदपाठ**— **आ । ते । कारो इति । शृणवाम । वचांसि । ययाथ । दूरात् । अनसा । रथेन ॥ नि । ते । नंसै । पीप्यानाऽइव । योषा । मर्याऽइव । कन्या । शश्वचै । ते इति ते ॥**

**सा० भा०**— नद्यः पूर्वं विश्वामित्रं प्रत्याख्यायानयर्चा तस्य वाक्यमाशुश्रुवुः । कारो स्तोत्रं कुर्वाण हे विश्वामित्र ते तव वचांसि इमानि वाक्यानि आ शृणवाम शृणुमः । तव समीहितं प्रयोजनं कुर्म इत्यर्थः । अनसा शकटेन रथेन च सह यथाथ । यतो दूरात् आगतोऽसि । वयं त्वदर्थं नि नंसै नीचैर्नमाम ।

प्रत्येकविवक्षया अत्रैकवचनम्। रथेन गन्तुं गाधोदका भवामेत्यर्थ:। तत्र दृष्टान्त:। पीप्यानेव योषा। पीप्याना पुत्रं स्तनं पाय-यन्ती योषा माता यथा प्रह्वीभवति। दृष्टान्तान्तरम्। यथा कन्या युवति: मर्यायेव मनुष्याय पित्रे भ्रात्रे वा शश्वचै परिष्वजनाय नम्रीभवति तद्वत् ते त्वदर्थं प्रह्वीभवाम: ॥ ते इति पुनरुक्तिरादरार्थम्। एतामृचं यास्क एवं व्याचष्टे— 'आश्रणवाम ते कारो वचनानि याहि दूरादनसा च रथेन च निनमाम ते पाययमानेव योषा पुत्रं मर्यायेव कन्या परिष्वजनाय निनमा इति वा' (निरु० २.२७) इति ॥ कारो। 'संबुद्धौ शाकल्यस्येतौ०' (पा०सू० १.१.१६) इति प्रगृह्यसंज्ञा। शृणवाम। 'श्रु श्रवणे' इत्यस्य लोटि 'आडुत्तमस्य पिच्च' इत्याडागम:। पित्त्वात् गुण:। निघात:। ययाथ। 'या प्रापणे' इत्यस्य भूतमात्रे लिटि थलि 'एकाच उपदेशेऽनुदात्तात्' इतीट्प्रतिषेध:। लित्स्वर:। अनसा। सहार्थे तृतीया। नंसै। 'णमु प्रह्वत्वे' इत्यस्य लेट्युत्तमे लेटि सिब्बहुलमिति सिप्। 'वैतोऽन्यत्र' इत्यै-कारादेश:। निघात:। पीप्यानेव। 'पीङ् पाने' इत्यस्यान्तर्भावितण्यर्थस्य लिटि कानचि रूपम्। चित्स्वर:। योषा। 'यू मिश्रणे'। 'वृतृवदिहनि' (उ०सू० ३.३४२) इत्यादिना सप्रत्यय:। यौतीति योषा। वृषादित्वादाद्युदात्त:। शश्वचै। 'ष्वञ्ज परिष्वङ्गे' इत्यस्मात् सम्पदादिलक्षणो भावे क्विप्। पृषोदरादित्वादिष्टरूपसिद्धिरन्तोदात्तश्च ॥

**अन्वय—** कारो, ते वचांसि आशृणवाम, दूरात् अनसा रथेन ययाथ। योषा पीप्यानेव कन्या मर्यायेव शश्वचै: ते नि नंसै।

**शब्दार्थ—** कारो = हे प्रार्थना (स्तुति) करने वाले (विश्वामित्र)। ते = तुम्हारी। वचांसि = बातों को। आशृणवाम = हम सुन रहीं हैं। दूरात् = दूर से। अनसा = गाड़ी द्वारा। रथेन = रथ द्वारा। ययाथ = तुम लोग आये हो। योषा = स्त्री। पीप्यानेव = दूध भरे स्तन के समान। कन्या = युवती। मर्यायेव = प्रेमी के समान। शश्वचै: = आलिङ्गन के लिए। ते = तुम्हारे लिए। नि नंसै = नीच झुक रही हूँ।

**अनुवाद—** हे स्तुति करने वाले (विश्वामित्र), तुम्हारी बातों को हम सुन रही है कि दूर से गाड़ी द्वारा और रथ द्वारा तुम लोग आये हो, जिस प्रकार दूध भरे स्तन वाली स्त्री (अपने पुत्र के और) जैसे युवती अपने प्रेमी के आलिङ्गन के लिए झुकती है, उसी प्रकार मैं नीचे झुक रही हूँ।

**व्याकरण—**

१. शृणवाम – √शृ (श्रवणे) लट् उत्तमपुरुष, बहुवचन, वैदिकरूप।

२. ययाथ – √या (गमने) + लिट् मध्यमपुरुष, बहुवचन।

३. नंसै – √नम् आत्मनेपद, लुङ् उत्तमपुरुष, एकवचन।

४. शश्वचै: – √श्वच् + क्विप्।

**यदुङ्ग त्वा भरता: संतरेयु-**
**र्गव्यन्ग्राम इषित इन्द्रजूत:।**
**अर्षादह प्रसव: सर्गतक्त**
**आ वो वृणे सुमतिं यज्ञियानाम् ॥११॥**

**पदपाठ—** यत्। अङ्ग। त्वा। भरता:। सम्ऽतरेयु:। गव्यन्। ग्राम:। इषित:। इन्द्रऽजूत: ॥ अर्षात्। अह। प्रऽसव:। सर्गऽतक्त:। आ। व:। वृणे। सुऽमतिम्। यज्ञियानाम् ॥

**सा० भा०—** विश्वामित्रो नदी: प्रत्युवाच। अङ्ग इत्यामन्त्रणे। हे नद्य: यत् यस्मात् युष्माभिरुत्तितीर्षो: ममोत्तरणमभ्यनुज्ञातं तस्मात् भरता: भरतकुलजा मदीया: सर्वे त्वा परस्परमेकतामापन्नां नदीं त्वां संतरेयु: सम्यगुत्तीर्णा भवेयु:। तदेव विशिनष्टि। गव्यन् गा उदकानि तरीतुमिच्छन् इषित: त्वयाभ्यनुज्ञात: इन्द्रजूत: युष्माकं प्रवर्तकेनेन्द्रेण च प्रेरित: ग्राम: भरतानां सङ्घ: अर्षात् संतरेत्। यत: सर्गतक्त: गमनाय प्रवृत्त: प्रसव: तेषामुद्योग: अह पूर्वं युष्माभिरनुज्ञात:। अहं तु यज्ञियानां यज्ञार्हाणां व: युष्माकं सुमतिं शोभनां स्तुतिम् आ वृणे सर्वत: संभजे ॥ भरता:। भरतशब्दादुत्सादित्वादञ्। तस्य 'यञञोश्च' इति लुक्। अतच्प्रत्ययस्वर:। संतरेयु:। तरलेर्लिङि जुसि रूपम्। झेर्लसार्वधातुकस्वरे धातुस्वर:। 'तिङि चोदात्तवति' इति गतेर्निघात:। गव्यन्। गा आत्मन इच्छन्। सुप: क्यच्। एकादेशस्वर:। ग्राम:। 'ग्रसतेरा च' (उ०सू० १.१४०) इति

मन्प्रत्यय आकारादेशश्च । नित्स्वरः । इन्द्रजूतः । जू इति सौत्रो धातुर्गत्यर्थः । 'श्र्युकः किति' इति निष्ठायामिट्प्रतिषेधः । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरः । अर्षात् । 'ऋ गतौ' इत्यस्य लेटि तिपि 'सिब्बहुलम्' इति सिप् । लेट आडागमः । 'एकाचः' इतीट्प्रतिषेधः । गुणः । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । वृणे । 'वृङ् संभक्तौ' इत्यस्य लटि रूपम् । यज्ञियानाम् । 'यज्ञर्त्विग्भ्यां घखञौ' इति घप्रत्ययः । प्रत्ययस्वरः ॥

**अन्वय**— अङ्ग, यत् भरताः त्वा सन्तरेयुः, गव्यन् इषितः इन्द्रजूतः ग्रामः (सन्तरेयुः), वः प्रसवः सर्गतक्तः अर्षात्, यज्ञियानां सुमतिम् आवृणे ।

**पदार्थ**— अङ्ग = सम्बोधन वाचक निपात, हे (नदियों) । यत् = जो (तुम्हारी अनुमति मिल गयी है) । भरताः = भरतवंश वाले (हम) लोग । त्वा = तुमको । सन्तरेयुः = पार करें । गव्यन् = (पार करने की) इच्छा वाले । इषितः = (तुम्हारे द्वारा) अनुज्ञात (पार जाने के निर्देश को प्राप्त) । इन्द्रजूतः = इन्द्र द्वारा भेजा गया । ग्रामः = (यह) समूह । वः = तुम लोगों का । प्रसवः = जलप्रवाह । सर्गसक्तः = स्वाभाविक रूप से । अर्षात् = प्रवाहित रहे । यज्ञियानाम् = पवित्र (नदियों) की । सुमतिम् = सुन्दर मति, को समर्थन को । आवृणे = मैं चाहता हूँ ।

**अनुवाद**— हे (नदियो), जो (तुम्हारी अनुमति मिल गयी है) (इसलिए) भरत-वंश वाले (हम) लोग तुमको पार करें । (पार जाने की) इच्छा वाले (तुम्हारे द्वारा) अनुज्ञात (और) इन्द्र द्वारा भेजा गया (यह) समूह (तुमको पार करे) । तुम लोगों का जल-प्रवाह स्वाभाविक रूप से प्रवाहित रहे, पवित्र (नदियों) के समर्थन को मैं चाहता (स्वीकार करता) हूँ ।

**व्याकरण**—

१. सन्तरेयुः – सम् + √तृ (तरणे) विधिलिङ् प्रथमपुरुष बहुवचन ।

२. इन्द्रजूतः – इन्द्रेण जूतः (तृतीया तत्पुरुष) ।

३. गव्यन् – गो + क्यच् ।

४. अर्षात् – √ऋष् – लेट् प्रथमपुरुष, एकवचन ।

५. वृणे – √वृ (चयने) आत्मनेपद् लट् उत्तमपुरुष, एकवचन ।

**अतारिषुर्भरता गव्यवः स-**
**मभक्त विप्रः सुमतिं नदीनाम् ।**
**प्र पिन्वध्वमिषयन्तीः सुराधा**
**आ वक्षणाः पृणध्वं यात शीभम् ॥१२॥**

**पदपाठ**— अतारिषुः । भरताः । गव्यवः । सम् । अभक्त । विप्रः । सुऽमतिम् । नदीनाम् ॥ प्र । पिन्वध्वम् । इषयन्तीः । सुऽराधाः । आ । वक्षणाः । पृणध्वम् । यात । शीभम् ॥

**सा० भा०**— गव्यवः गा आत्मन इच्छन्तः भरताः भरतकुलजाः सर्वे अतारिषुः तां नदीं समतरन् विप्रः मेधावी विश्वामित्रः नदीनां सुमतिं शोभनां स्तुतिं समभक्त समभजत । यूयं तु यथापूर्वम् इषयन्तीः कुल्यादिद्वारा अन्नं कुर्वाणा अत एव सुराधाः शोभनधनोपेता यूयं वक्षणाः कृत्रिमसरितः कुल्याः प्र पिन्वध्वं प्रकर्षेण तर्पयत । आ पृणध्वं ताः सर्वतः पूरयत च । शीघ्रं यात गच्छत च ॥ अतारिषुः । 'तिप्लवनतरणयोः' इत्यस्य लुङि 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धिः । अडागमस्वरः । गव्यवः । सुपः क्यच् । 'क्याच्छन्दसि' इत्युप्रत्ययः । तस्य स्वरः । अभक्त । 'भज सेवायाम्' इत्यस्य लुङि सिचः 'झलो झलि' इति लोपः । [illegible]दित्वादनिघातः । पिन्वध्वम् । 'पिवि सेचने' इत्यस्य लोटि रूपम् । निघातः । इषयन्ताः । इषं कुर्वत्यः । 'तत्करोति' इति णिच् । 'णाविष्ठवत्प्रातिपदिकस्य' इति इष्ठवद्भावात् 'टे[illegible]' इति टिलोपः । 'वा छन्दसि' इति सवर्णदीर्घः । प्रत्ययस्वरः । पृणध्वम् । 'पृण प्रीणने' । लोटि रूपम् । व्यत्ययेनात्मने-पदम् । वाक्यभेदादनिघातः । यात । 'या प्रायणे' इत्यस्य लोटि रूपम् । अत्रापि न निघातः । शीभम् । 'शीभृ

कत्थने'। श्लाघ्यतेऽनेन तद्वानिति करणे घञ्। ञित्स्वर: ॥

**अन्वय**— गव्यव: भरता: अतारिषु:, विप्र: नदीनां सुमतिं समभक्त। सुराधा: इषयन्ती: वक्षणा: प्र पिन्वध्वम्। आपृणध्वं शीभं यात।

**पदार्थ**— गव्यव: = पार जाने की कामना वाले। भरता = भरतवंश वाले लोगों ने। अतारिषु: = पार कर लिया। विप्र: = विप्र (विश्वामित्र) ने। नदीनाम् = नदियों की। सुमतिम् = सुन्दर मति को, समर्थन को। समभक्त = प्राप्त कर लिया। सुराधा: = सुन्दर धन वाली (नदियाँ)। इषयन्ती: = धन लाती हुई। वक्षणा: = अपने स्थान पर। प्र पिन्वध्वम् = प्रकृष्ट रूप से प्रवाहित होवो। आ पृणध्वम् = पूर्णरूप से भर जाओ। शीभम् = शीघ्रता से। यात = बहो, प्रवाहित होवों।

**अनुवाद**— पार जाने की कामना वाले भरतवंश के लोगों ने पार कर लिया (और) विप्र (विश्वामित्र) ने नदियों का समर्थन प्राप्त कर लिया। सुन्दर धन वाली (नदियाँ) (तुम लोग) धन लाती हुई (अपने) स्थान पर (यथावत्) प्रकृष्टरूप से प्रवाहित होवों, पूर्णरूप से भर जाओ (और) शीघ्रता से बहो।

**व्याकरण**—

१. अतारिषु: – √तृ लुङ् प्रथमपुरुष, बहुवचन।

२. भक्त – √भज् अत्मनेपद लुङ् प्रथमपुरुष, एकवचन।

३. इषयन्ती: – √इष् + णिच्।

४. पिन्वध्वम् – √पिन्व आत्मनेपद लोट्, मध्यमपुरुष, बहुवचन।

५. पृणध्वम् -- √पृञ्, आत्मनेपद, लोट् मध्यमपुरुष, बहुवचन।

६. यात – √या (गमने) लोट् मध्यमपुरुष, बहुवचन।

उद्व॑ ऊ॒र्मिः शम्या॑ ह॒-<br>
न्त्वापो॒ योक्त्रा॑णि मुञ्चत।<br>
मादु॑ष्कृतौ व्ये॑नसा॒-<br>
घ्न्यौ शून॒मार॑ताम् ॥१३॥

**पदपाठ**— उत्। व॒:। ऊ॒र्मिः। शम्या॑:। ह॒न्तु॒। आप॑:। योक्त्रा॑णि। मु॒ञ्च॒त॒॥ मा। अदु॑:ऽकृतौ। विऽए॑नसा। अ॒घ्न्यौ। शू॒न॑म्। आ। अ॒र॒ता॒म्॥

**सा० भा०**— पूर्वमुत्तितीर्षुर्विश्वामित्रो नदीरुक्त्वा अधुना उत्तितीर्षु: पुनराह। हे नद्य: व: युष्माकम् ऊर्मि: तरङ्ग: शम्या: युग्मकण्ठपार्श्वादिसंलग्ना रज्जव: उत् ऊर्ध्वं यथा भवन्ति तथा हन्तु गच्छतु। स तरङ्गो रज्जूनामधो गच्छत्वित्यभिप्राय:। तथा हे आप: यूयं येक्त्राणि ता रज्जू: मुञ्चत। यथा न स्पृशन्ति तथा यान्त्वित्यभिप्राय:। व्येनसा विगतपापे अत एव अदुष्कृतौ कल्याणकर्मकारिण्यौ अघ्न्ये न केनापि तिरस्करणीये विपाट्छुतुद्र्यौ शूनं समृद्धिं मा आरताम् आगच्छताम्। एवं विश्वामित्रो नदी: स्तुत्य ताभिरनुज्ञातोऽतरदिति ॥ ऊर्मि:। 'ऋ गतौ'। 'अर्तेरूच्च' इति मिप्रत्यय:। 'ऊ:' इत्ययमादेशो धातो:। ऋच्छतीत्यूर्मि:। प्रत्ययस्वर:। शम्या:। 'शमु उपशमे'। 'पोरदुपधात्' इति यत्प्रत्यय:। 'यतोऽनाव:' इत्याद्युदात्तत्वम्। हन्तु। 'हन हिंसागत्यो:' इत्यस्य लोटि रूपम्। निघात:। यौक्त्राणि। 'युजिर् योगे'। करणे 'दाम्नीशसयुयुज:०' इत्यादिना ष्ट्रन्प्रत्यय:। नित्स्वर:। मुञ्चत। मुच्लृ मोक्षणे'। निघात:। अदुष्कृतौ। 'इसुसो: सामर्थ्ये' इति विसर्जनीयस्य षत्वम्। व्येनसा। बहुव्रीहौ पूर्वपदस्वर:। सुपो डादेश:। अघ्न्यौ। 'हन हिंसागत्यो:' इत्यस्य नञ्पूर्वस्य 'अघ्न्यादयश्च' इति निपातनात् यक्। कित्त्वादुपधालोप:। 'हो हन्ते:' इति घत्वम्। सर्वविधीनां छन्दसि विकल्पितत्वादत्र औङ: शीभावाभाव:। एकादेशस्वर:। शूनम्। श्वयते: 'नपुंसके भावे क्त:' इति क्त:। यजादित्वात् सम्प्रसारणम्। 'हल:' इति दीर्घत्वम्। 'ओदितश्च' इति निष्ठानत्वम्। 'निष्टा च द्व्यजनात्' इत्या-द्युदात्त:। अरताम्। 'ऋ गतौ' इत्यस्य लुङि च्ले: 'सतिशास्त्यतिभ्यश्च'

इत्यङादेशः । 'ऋदृशोऽङि गुणः' । 'न माङ्योगे' इत्यडभावः । निघातः ॥

**अन्वय**— वः ऊर्मिः शम्याः उत् हन्तु, आपः योक्त्राणि मुञ्चत । अदुष्कृतौ व्येनसा अघ्न्यौ शूनं मा आ अरताम् ।

**पदार्थ**— वः = तुम्हारी । ऊर्मिः = तरङ्ग, धारा । शम्याः = जुए की कील को । उत् हन्तु = ऊपर से आघात करे । आपः = जल । योक्त्राणि = रस्सी को । मुञ्चत = छोड़ दे । अदुष्कृतौ = दुष्कृत्य न करने वाली, कल्याणकारी । व्येनसा = पापरहित । अघ्न्यौ = तिरस्कार न करने योग्य । शूनम् = वृद्धि को । मा = न । आ अरताम् = प्राप्त करें ।

**अनुवाद**— तुम्हारी तरङ्ग (धारा) जुए की कील को ऊपर से आघात करे (अर्थात् जुए की कील के नीचे से प्रवाहित होवे) (तुम्हारा) जल रस्सी को छोड़ दे । कल्याणकारी, पापरहित (तथा) तिरस्कार न करने योग्य दोनों (नदियाँ) वृद्धि को न प्राप्त करें ।

**व्याकरण**—

१. हन्तु – √हन्, लोट् प्रथमपुरुष एकवचन ।

२. मुञ्चत – √मुञ्च् लोट् प्रथमपुरुष बहुवहन ।

३. अरताम् – √ऋ (गमने) लुङ् प्रथमपुरुष द्विवचन ।

**अभ्यास**—

(१) निम्नलिखित मन्त्रों का हिन्दी में अनुवाद कीजिए—

(क) इन्द्रेषिते प्रसवं भिक्षमाणे.................२

(ख) एना वयं पयसा पिन्वमाना...............४

(ग) रमध्वं मे वचसे सोम्याय..................५

(घ) इन्द्रो अस्माँ अरदद् .......................६

(ङ) ओ षु स्वसारः.............................९

(२) निम्नलिखित शब्दों पर व्याकरणात्मक टिप्पणी लिखिए—

(क) रथ्या ।

(ख) यावः ।

(ग) वर्तवे ।

(घ) जोहवीति ।

(ङ) जघान ।

## ५.२ अग्निसूक्तम्

**वेद–ऋग्वेद** | **मण्डल संख्या–४** | **सूक्त संख्या–७**

**ऋषि-वामदेव** | देवता-अग्नि | छन्द- १ जगती, २–६ अनुष्टुप्, शेष– त्रिष्टुप् ।

**अयमिह प्रथमो धायि धातृभि-**
**र्होता यजिष्ठो अध्वरेष्वीड्यः ।**
**यमप्नवानो भृगवो विरुरुचु-**
**र्वनेषु चित्रं विभ्वं विशेविशे ॥१॥**

**पदपाठ— अयम् । इह । प्रथमः । धायि । धातृऽभिः । होता । यजिष्ठः । अध्वरेषु । ईड्यः ॥ यम् । अप्नवानः । भृगवः । विऽरुरुचुः । वनेषु । चित्रम् । विऽभ्वम् । विशेऽविशे ॥**

**सा० भा०**— धातृभिः अग्न्यर्थं कर्म कुर्वद्भिरध्वर्युभिः इह अस्मिन् यज्ञे होता देवानामाह्वाता यजिष्ठाः अतिशयेन यष्टा अध्वरेषु यागेषु ईड्यः ऋत्विग्भिः स्तूयमानः प्रथमः सर्वेषां देवानां मुख्यः अयम् आह–वनीयादिस्थानेषु प्रत्यक्षेणोपलभ्यमानोऽग्निः धायि अधायि निहितः ।। दधातेः कर्मणि लुङ् । 'बहुलं छन्दस्यमाङ्योगे' इत्यडभावः । 'तिङ्ङतिङः' इति निघातः ।। अयमग्निरित्युक्तम् । कोऽसावग्निरित्यत आह । अप्नवानः भृगुसंबन्धी कश्चिदृषिः । स चान्ये भृगवः च वनेषु अरण्येषु चित्रं दावाग्निरूपेण बहुधा विशेविशे । वीप्सया सर्वजनव्याप्तिर्गृह्यते । सर्वस्या विशः प्रजायाः विभुमीश्वरं यं देवानां हविर्वाहकत्वेन प्रसिद्धमग्निं विरुरुचुः दीप्तियुक्तं कुर्वन्ति स्म । यमिति यच्छब्दस्या-यमिति इदंशब्देन सम्बन्धः ।।

**अन्वय**— होता यजिष्ठः अध्वरेषु ईड्यः अयं धातृभिः इह प्रथमम् धायि । यम् आप्नवानः भृगवः विरुरुचुः, वनेषु चित्रं विशेविशे विभ्वम् (अस्ति) ।

**पदार्थ**— होता = होता (नामक ऋत्विक्) । यजिष्ठः = यज्ञकर्त्ताओं में श्रेष्ठ, श्रेष्ठ यज्ञकर्त्ता । अध्वरेषु = हिंसारहित यज्ञों में । ईड्यः = पूजनीय । अयम् = यह (अग्नि) । धातृभिः = यज्ञ कर्त्ताओं के द्वारा । इह = यहाँ, यज्ञवेदि पर । प्रथमम् = (सभी देवताओं से) पहिले । धायि = रखा गया है, स्थापित किया गया है । यम् = जिसको । अप्नवानः = अप्नवान (नामक ऋषियों) ने । भृगवः = भृगुवंशीय (ऋषियों) ने । विरुरुचुः = प्रज्ज्वलित किया है । वनेषु = वनों में । चित्रम् = चमकने वाला । विशेविशे = प्रत्येक घर में । विभ्वम् = व्याप्त रहने वाला ।

**अनुवाद**— होता, यज्ञकर्त्ताओं में श्रेष्ठ (और) हिंसाविहीन यज्ञों में पूजनीय यह अग्नि यज्ञकर्त्ताओं द्वारा यहाँ (यज्ञवेदि पर) सभी देवताओं से पहिले स्थापित किया गया है । जिस (अग्नि) को अप्नवान और भृगुवंशीय (ऋषियों) ने प्रज्ज्वलित किया है (और जो) वनों में (दावाग्नि के रूप में) चमकने वाला (तथा) प्रत्येक घर में व्याप्त रहने वाला है ।

**व्याकरण—**

१. धायि – √धा + लुङ्, प्रथमपुरुष, एकवचन ।

२. होता – √हू + तृन् ।

३. यजिष्ठ – √यज् + इष्ठन् ।

४. ईड्यः – √ईड् + ण्यत् ।

५. विरुरुचुः – वि + √रुच्, लिट् प्रथमपुरुष, बहुवचन ।

**अग्ने कुदा त आनुष-**
**ग्भुवद्देवस्य चेतनम् ।**
**अधा हि त्वा जगृभ्रिरे**
**मर्तासो विक्ष्वीड्यम् ॥२॥**

**पदपाठ— अग्ने । कुदा । ते । आनुषक् । भुवत् । देवस्य । चेतनम् ॥ अध । हि । त्वा । जगृभ्रिरे । मर्तासः । विक्षु । ईड्यम् ॥**

**सा० भा०**— 'अग्ने कदा ते' इति । प्रातरनुवाकाश्विनशस्त्रयोराग्नेये क्रतौ आनु-ष्टुभे छन्दसि 'अग्ने कदा ते' इत्याद्याः पञ्चर्चः । सूत्रितं च— 'अग्ने कदा त इति पञ्च' (आश्व०श्रौ० ४.१३) इति ।।

हे अग्ने अध अतः कारणात् देवस्य द्योतमानस्य ते तव सम्बन्धि चेतनं तेजः कदा आनुषक् अनुषक्तं भुवत् भवेत् ।। लेट्यडागमः । 'बहुलं छन्दसि' इति विकरणस्य लुक् । 'भूसुवोस्तिङि' इति गुणप्रतिषेधः । अतः कारणादित्युक्तम् । कस्माद्धेतोरित्यु-च्यते । हि यस्मात् कारणात् मर्तासः मनुष्याः विक्षु विड्भिः प्रजाभिः ईड्यं स्तुत्यं त्वा त्वां जगृभ्रिरे जगृहिरे गृह्णन्ति ।। ग्रहेर्धातोर्लिटि 'हृग्रहोर्भः०' इति भत्वम् । 'बहुल

छन्दसि' इति रुडागमः ॥

**अन्वय**— अग्ने, ते देवस्य चेतनम् आनुषक् कदा भुवत्, अध हि मर्त्तासः ईड्यः त्वा विक्षु जगृभिरे।

**पदार्थ**— अग्ने = हे अग्नि। ते देवतस्य = तुम देव का। चेतनम् = तेज। आनुषक् = निर्बाधरूप से। कदा = कब। भुवत् = प्रकट होगा। हि = क्योंकि। अध = इसी कारण से। मर्त्यासः = मनुष्य। इड्यः = पूजनीय। त्वा = तुमको। विक्षु = घरों में जगृभिरे = स्वीकार करते हैं।

**अनुवाद**— हे अग्नि, तुम देव का तेज निर्बाध रूप से कब प्रकट होगा क्योंकि इसी कारण से मनुष्य पूजनीय तुमको घरों में स्वीकार करते हैं।

**व्याकरण**—

१. भुवत् – √भू + लुङ्, प्रथमपुरुष, एकवचन।

२. जगृभ्रिरे – √ग्रभ् + आत्मनेपद, लिट् प्रथमपुरुष, बहुवचन।

**ऋतावानं विचेतसं**
**पश्यन्तो द्यामिव स्तृभिः।**
**विश्वेषामध्वराणां**
**हस्कर्तारं दमेदमे ॥३॥**

**पदपाठ**— ऋतऽवानम्। विऽचेतसम्। पश्यन्तः। द्याम्ऽइव। स्तृऽभिः॥ विश्वेषाम्। अध्वराणाम्। हस्कर्तारम्। दमेऽदमे॥

**सा० भा०**— ऋतावानम् अमायिनं विचेतसं विशिष्टज्ञानं स्तृभिः नक्षत्रैः परिवृतं द्यामिव विस्फुलिङ्गैः समेतं विश्वेषां सर्वेषाम् अध्वराणां ज्ञानां हस्कर्तारं प्रभासकं वृद्धेः कर्तारं वा अग्निं पश्यन्तः ऋत्विगादयः दमेदमे सर्वस्मिन् यज्ञगृहे। जगृभ्रिरे इति पूर्वेण सम्बन्धः॥

**अन्वय**— ऋतावानं विचेतसं स्तृभिः द्याम् इव विश्वेषाम् अध्वराणां हस्कर्त्तारं पश्यन्तः दमे दमे (जगृभिरे)।

**पदार्थ**— ऋतावानम् = सत्यवान्। विचेतसम् = विशिष्ट ज्ञानी। स्तृभिः = तारों से धिरे हुए। द्याम् इव = आकाश के समान। विश्वेसाम् = सम्पूर्ण। अध्वराणाम् = हिंसारहित यज्ञों के। हस्कर्त्तारम् = प्रकाशक को। पश्यन्तः = देखते हुए। दमे दमे = प्रत्येक घर में।

**अनुवाद**— सत्यवान् (सत्ययुक्त), विशिष्ट ज्ञानी (विशेष ज्ञान वाले), तारों से घिरे हुए आकाश के समान सम्पूर्ण हिंसारहित यज्ञों के प्रकाशक (अग्नि) को देखते हुए प्रत्येक घर में (मनुष्यों ने स्वीकार किया है)।

**व्याकरण**—

१. ऋतावानम् – ऋतावा + वतुप् द्वितीया, एकवचन।

२. पश्यन्तः – √दृश् + शतृ पुल्लिङ्ग, प्रथमा, बहुवचन।

**आशुं दूतं विवस्वतो**
**विश्वा यश्चर्षणीरभि।**
**आ जभ्रुः केतुमायवो**
**भृगवाणं विशेविशे ॥४॥**

**पदपाठ**— आशुम्। दूतम्। विवस्वतः। विश्वाः। यः। चर्षणीः। अभि॥ आ। अभ्रुः

। के॒तुम् । आ॒यवः॑ । भृग॑वाणम् । वि॒शेऽवि॑शे ॥

**सा० भा०**— यः अग्निः विश्वाः चर्षणीः सर्वाः प्रजाः अभि भवति आयव इति मनुष्यनाम 'आयवः यदवः' (निरु० २.३.१७) इति मनुष्यनामसु पाठात् । आशुं क्षिप्रगामिनं विवस्वतः मनुष्यस्य यजमानस्य दूतम् । विवस्वन्त इति मनुष्यनाम । केतुं प्रज्ञापकं भृगवाणं भृगुवदाचरन्तम् । दीप्यमानमित्यर्थः ।। 'सर्वप्रातिपदिकेभ्यः क्विब्ब-क्तव्यः' इति क्विप् । तदन्ताल्लटो व्यत्ययेन शानच् । अदुपदेशाल्लसार्वधातुकानु-दात्तत्वे प्राप्ते वृषादेराकृतिगणत्वात् आद्युदात्तत्वम् ।। तमग्निं विशेविशे सर्वस्यै प्रजायै आ जभ्रुः आजह्रः ।। 'हृग्रहोर्भः' इति भत्वम् ।।

**अन्वय**— यः विश्वाः चर्षणीः अभि आ जभ्रुः विवस्वतः आशुं दूतं केतुम्, भृगवाणं विशेविशे (जगृभिरे) ।

**पदार्थ**— यः = जो । विश्वाः = सम्पूर्ण । चर्षणीः = प्राणियों को । अभि आ जभ्रुः = अभिभूत करने वाला है । विवस्वतः = यजमान के । आशुम् = शीघ्रगामी, द्रुतगमन करने वाले । दूतम् = दूत को । केतुम् = यज्ञ के प्रज्ञापक । भृगवाणम् = भृगु के समान आचरण करने वाले (अर्थात् चमकने वाले) (अग्नि) को । विशे विशे = प्रत्येक घर में ।

**अनुवाद**— जो सम्पूर्ण प्राणियों को अभिभूत करने वाला है, यजमान के शीघ्रगामी दूत, यज्ञ के प्रज्ञापक और भृगु के समान आचरण करने वाले (अर्थात् चमकने वाले) (अग्नि) को प्रत्येक घर में (मनुष्यों ने स्वीकार किया है) ।

**व्याकरण**—

१. जभ्रुः – √भृ + लिट् प्रथमपुरुष, बहुवचन ।

२. भृगवाणम् – √वृज् + शानच् द्वितीया, एकवचन ।

**तमीं होता॑रमानु॒ष-**
**क्चिकि॒त्वांसं॒ नि षे॑दिरे ।**
**र॒ण्वं पा॑व॒कशो॑चिषं॒**
**यजि॑ष्ठं स॒प्त धाम॑भिः ॥५॥**

**पदपाठ**— तम् । ईम् । होता॑रम् । आ॒नु॒षक् । चि॒कि॒त्वांस॑म् । नि । से॒दि॒रे ॥ र॒ण्वम् । पा॒व॒कऽशो॑चिषम् । यजि॑ष्ठम् । स॒प्त । धाम॑ऽभिः ॥

**सा० भा०**— ऋत्विगादयो मनुष्याः आनुषक् आनुपूर्व्येण होतारं देवानामाह्वा-तारं चिकित्वांसं जानन्तम् ।। 'कित ज्ञाने' । लिटः क्वसुः । द्विर्भावहलादिशेषचुत्व-दीर्घाः । प्रत्ययस्वरः ।। तमीं तमिममग्निं निषेदिरे निषादयन्ति स्म । कीदृशम् रण्वं रम-णीयम् पावकशोचिषं शोधकदीप्तिं यजिष्ठं यष्टृतमं सप्त सप्तभिः तेजोभिर्युक्तम् ।।

**अन्वय**— होतारं चिकित्वांसं रण्वं पावकशोचिषं यजिष्ठं सप्तधामभिः तं आनुषक् ईम् निषेदिरे ।

**पदार्थ**— होतारम् = होता । चिकित्वांसम् = ज्ञाता, जानने वाले । रण्वम् = रमणीय । पावकशोचिषम् = पवित्र प्रकाश वाले । यजिष्ठम् = श्रेष्ठ यज्ञकर्त्ता । सप्त-धामभिः = सात प्रकार के तेजो से (युक्त) । तम् = उस (अग्नि) को । आनुषक् = निर्बाध रूप से । ईम् = निश्चयेन । निषेदिरे = बैठाया है ।

**अनुवाद**— होता, जानने वाले, रमणीय, पवित्र प्रकाश वाले, श्रेष्ठयज्ञकर्त्ता (और) सात प्रकार के तेजों से (सम्पन्न) उस (अग्नि) को (यज्ञकर्त्ता यजमानों ने) निर्बाध रूप से (अपने घरों में) निश्चयपूर्वक बैठाया (स्थापित किया) है ।

**व्याकरण**—

१. चिकित्वांसम् – √चित् + क्वसु = चिकित्वस्, पुलिंङ्ग, द्वितीया, एकवचन ।

२. निषेदिरे – नि + सद् (बैठना) + आत्मनेपद, लिट्, प्रथमपुरुष, बहुवचन ।

तं शश्व॑तीषु मा॒तृषु॒
वन॒ आ वी॒तमश्रि॑तम् ।
चि॒त्रं सन्तं॒ गुहा॑ हि॒तं
सु॒वेदं॑ कूचिद॒र्थिन॑म् ॥६॥

**पदपाठ**— तम् । शश्व॑तीषु । मा॒तृषु॑ । वने॑ । आ । वी॒तम् । अश्रि॑तम् ॥ चि॒त्रम् । सन्त॑म् । गुहा॑ । हि॒तम् । सु॒ऽवेद॑म् । कू॒चि॒त्ऽअ॒र्थिन॑म् ॥

**साभा०**— शश्वतीषु बह्वीषु मातृषु अप्सु । ताः सत्यादिनिर्मातृकत्वात् मातर इत्युच्यन्त । वने आ वृक्षसमूहे च । आकारश्चार्थे । सन्तं विद्यमानं वीतं कान्तम् अश्रितं प्राणिभिर्दाहभयात् असेवितम् । दुरासदमित्यर्थः । चित्रं चायनीयं गुहा गुहायां निहितं सुवेदं सुविज्ञानं सुधनं वा कूचिदर्थिनं क्वापि हविष्यर्थिनं समिदाज्यपुरोडाशादिहविः स्वीकुर्वन्तम् ॥ क्व इत्यत्र वकारस्य छान्दसे सम्प्रसारणे परपूर्वत्वे च 'हलः' इति दीर्घत्वम् । एवंभूतं तम् अग्निं निषेदिरे इति पूर्वेण सम्बन्धः ॥

**अन्वय**— शश्वतीषु मातृषु आ वने वीतम् अश्रितं चित्रं सन्तं गुहा हितं सुवेदं कूचिदर्थिनं (निषेदिरे) ।

**पदार्थ**— शश्वतीषु = शाश्वत् । मातृषु = माताओं (अर्थात् जलों) में । आ वने = और वन में । वीतम् = (सभी द्वारा) अभिलषित । अश्रितम् = असेवित । चित्रं सन्तम् = प्रकाशमान होते हुए । गुहा = गुहा (रहस्य) में । हितम् = निहित, छिपे हुए, पड़े हुए । सुवेदम् = सुन्दर ज्ञान वाले । कूचिदर्थिनम् = कहीं से भी (हविद्रव्य की) इच्छा करने वाले को ।

**अनुवाद**— शाश्वत् माताओं (अर्थात् जलों में बड़वाग्नि रूप में) और वन में (दावाग्नि रूप में) (रहने वाले), (सभी द्वारा) अभिलषित, (तथापि) असेवित, प्रकाश-मान होते हुए (भी) गुहा (रहस्य) में निहित (पड़े हुए), सुन्दर ज्ञान वाले (और) कहीं से भी (हविर्दव्य की) इच्छा करने वाले (अग्नि) को (घर में बैठाया है) ।

**व्याकरण**—

१. वीतम् – √वी + क्त द्वितीया, एकवचन ।
२. अश्रितम् – √श्रि + क्त, द्वितीया, एकवचन = श्रितम्, न श्रितम् आश्रितम् (नञ् तत्पुरुष) ।
३. सन्तम् – √अस् + शतृ, द्वितीया, एकवचन ।
४. हितम् – √धा अथवा √हि + क्त, द्वितीया, एकवचन ।

स॒सस्य॒ यद्वियु॑ता सस्मि॒न्नूध॑-
न्नृ॒तस्य॒ धाम॑न्र॒णय॑न्त दे॒वाः ।
म॒हाँ अ॒ग्निर्नम॑सा रा॒तह॑व्यो
वेर॑ध्व॒राय॒ सद॒मिदृ॒तावा॑ ॥७॥

**पदपाठ**— स॒सस्य॑ । यत् । विऽयु॑ता । सस्मि॑न् । ऊध॑न् । ऋ॒तस्य॑ । धाम॑न् । र॒णय॑न्त । दे॒वाः । म॒हान् । अ॒ग्निः । नम॑सा । रा॒तऽह॑व्यः । वेः । अ॒ध्व॒राय॑ । सद॑म् । इत् । ऋ॒तऽवा॑ ॥

**सा०भा०**— प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छन्दसि 'ससस्य यद्वियुता' इत्याद्याः पञ्चर्चः । सूत्रितं च— 'ससस्य यद्वियुतेति पञ्च' (आश्व०श्रौ० ४.१३) इति । यत् यमग्निं देवाः स्तोतारः ससस्य स्वप्नस्य वियुता वियुते वियोगे । उषरीत्यर्थः । ऋतस्य उदकस्य धामन् धामनि स्थाने सस्मिन् सर्वस्मिन् ऊधन् ऊधनि यज्ञे रणयन्त रमयन्ति । स्तोत्रैरिति शेषः । महान् प्रभूतः नमसा नमस्कारेण रातहव्यः दत्तहविष्कः ऋतावा

सत्य-वान् सः अग्निः सदमित् सदैव अध्वराय अध्वरं यजमानैः कृतं यज्ञम् ।। 'सुपां सुपो भवन्तीति वक्तव्यम्' (पा०सू० ७.१.३९) इति वचनादत्र द्वितीयार्थे चतुर्थी ।। वेः वेत्ति जानाति । यद्वा । देवा इन्द्रादयः समस्य ऋत्विग्भिः सेव्यस्य यद्यस्याग्नेर्वियुता विशिष्टे सस्मिन् भजनीये ऋतस्य सत्यस्य धामन् धामनि ऊधन्नूधनि यज्ञे रणयन्त रमयन्ते । महान् प्रभूतो नमसा हविषा रातहव्यो दत्तहविष्क ऋतावा सत्यवान् सोऽग्निध्वराय यज्ञार्थं सदमित् सदैव वेः गन्ता भवति । अध्वराय यज्ञं वेः कामयते वा ।।

**अन्वय**— ससस्य वियुता ऋतस्य धामन् सस्मिन् ऊधन् देवाः रणयन्त, महान् ऋतावा नमसा रातहव्यः अग्निः अध्वराय सदं वेः ।

**पदार्थ**— ससस्य = स्वप्न के, रात्रि के । वियुता = वियुक्त होने पर, बीतने पर, समाप्त होने पर । ऋतस्य = जल के, यज्ञ के । धामन् = स्थान पर । सस्मिन् = सभी । ऊधन् = यज्ञ में । देवाः = स्तुति करने वाले, यजमान । रणयन्त = रमण करते हैं, प्रसन्न करते हैं । महान् = महान् । ऋतावा = सत्यवान् । नमसा = नमस्कार के साथ । रातहव्यः = हवि की आहुति दिया जाने वाला । अग्निः = अग्नि । अध्वराय = यज्ञ का । सदम् = सर्वदा । इत् = निश्चित रूप से । वेः = आनन्द लेता है ।

**अनुवाद**— स्वप्न (रात्रि) के समाप्त होने पर (अर्थात् उषःकाल होने पर) जल के (अथवा यज्ञ के) स्थान पर सभी यज्ञों में स्तुति करने वाले (यजमान) (जिस अग्नि को) प्रसन्न करते हैं, (वह) महान्, सत्यवान्, नमस्कार के साथ (नमस्कारपूर्वक) हवि की आहुति दिया जाने वाला (अग्नि) यज्ञ का सर्वदा निश्चित रूप से आनन्द लेता है ।

**व्याकरण**—

१. वियुता – वि + √यु + क्त ।
२. सस्मिन् – सर्व शब्द सप्तमी एकवचन में सर्वस्मिन् का वैदिकरूप ।
३. ऊधन् – सप्तमी एकवचन ऊधनि का वैदिकरूप ।
४. धामन् – धाम शब्द के सप्तमी एकवचन धामनि का वैदिकरूप, √धा + मनिन् = धाम ।
५. रणयन्त – √रन् + आत्मनेपद लङ्, प्रथमपुरुष, बहुवचन ।
६. वेः – √वी विधानात्मक लट् + प्रथमपुरुष, एकवचन ।
७. रातहव्यः – रात = √रा + क्त, हव्य – √हु + यत्, रातं हव्यं यस्मै तम् (बहुव्रीहि) ।

**वेरध्वरस्य दूत्यानि विद्वा-**
**नुभे अन्ता रोदसी सञ्चिकित्वान् ।**
**दूत ईयसे प्रदिव उराणो**
**विदुष्टरो दिव आरोधनानि ।।८।।**

**पदपाठ**— वेः । अध्वरस्य । दूत्यानि । विद्वान् । उभे इति । अन्तरिति । रोदसी इति । सम्ऽचिकित्वान् ।। दूतः । ईयसे । प्रऽदिवः । उराणः । विदुःऽतरः । दिवः । आऽरोधनानि ।।

**सा०भा०**— हे अग्ने विद्वान् सर्वं जानानस्त्वम् अध्वरस्य यज्ञस्य सम्बन्धीनि दूत्यानि दूतकर्माणि वेः वेत्सि कामयसे वा । यद्वा वेरिति यज्ञविशेषणम् । वेर्यजमान-स्याभीष्टफलजनकस्याध्वरस्य यागस्य सम्बन्धीनि दूत्यानि दूतकर्माणि विद्वान् जानन् । उभे रोदसी उभयो रोदस्योर्द्यावापृथिव्योः अन्तः मध्ये स्थितमन्तरिक्षं सञ्चिकित्वान् सम्यक् जानन् प्रदिवः पुराणः । पुराणनामेदं 'प्रत्नं प्रदिवः' (नि० ३.२७.२) इति पुराणनामसु पाठात् । उराणः अल्पमपि हविः उरु बहु कुर्वाणः । 'उराण उरु कुर्वाणः' इति यास्के-नोक्तत्वात् । विदुष्टरः । विद्वत्तरो देवानां दूतः त्वं दिवः स्वर्गस्य आरोधनानि आरोहणानि । आरोहणार्हाणि स्थानानीत्यर्थः । देवानां हवींष्यर्पयितुम् ईयसे गच्छसि ।।

**अन्वय**— विद्वान् अध्वरस्य दूत्यानि वेः, उभे रोदसी अन्तः सञ्चिकित्वान् दूतः प्रदिवः उराणः विदष्टरः दिवः आरोधानि ईयसे ।

**पदार्थ**— विद्वान् = (सब कुछ) जानने वाले । अध्वरस्य = यज्ञ के । दौत्यानि = दौत्यकार्य को । वे: = जानते हो । उभे = दोनों । रोदसी = आकाश और पृथिवी को । अन्त: = (दोनों के) मध्य को । सञ्चिकित्वान् = अच्छी प्रकार से जानते हुए । दूत: = दूत । प्रदिव: = प्राचीन । उराण: = चाहने वाले । विदुष्टर: = अत्यधिक बुद्धिमान् । दिव: = द्युलोक के । आरोधानि = आरोहणों पर । ईयसे = जाते हो ।

**अनुवाद**— (सब कुछ) जानने वाला (अग्नि) यज्ञ के दौत्यकार्य को जानता है, दोनों आकाश तथा पृथिवी को, (उन दोनों के) मध्य को अच्छी प्रकार से जानते हुए दूत, प्राचीन, चाहने वाले, अत्यधिक बुद्धिमान् (तुम) द्युलोक के आरोहणों पर जाते हो ।

**व्याकरण**—

१. वे: – √वी + विधानात्मक लट् प्रथमपुरुष, एकवचन ।

२. दूत्यानि – दूत + यत् द्वितीया, बहुवचन ।

३. विद्वान् – √विद् + शतृ (वसु) पु. प्रथमा, एकवचन ।

४. सञ्चिकित्वान् – सम् + चित् + क्वसु = सञ्चिकित्वस्, पु. प्रथमा, एकवचन ।

५. ईयसे – √ई, (गतौ) अत्मनेपद लट् मध्यमपुरुष, एकवचन ।

**कृष्णं त एम रुशतः पुरो भा-**
**श्चरिष्णवर्चिर्वपुषामिदेकम् ।**
**यदप्रवीता दधते ह गर्भं**
**सद्यश्चिज्जातो भवसीदु दूतः ॥९॥**

**पदपाठ**— **कृष्णम् । ते । एम । रुशतः । पुरः । भाः । चरिष्णु । अर्चिः । वपुषाम् । इत् । एकम् ॥ यत् । अप्रऽवीता । दधते । ह । गर्भम् । सद्यः । चित् । जातः । भवसि । इत् । ऊँ इति । दूतः ॥**

**सा० भा०**— हे अग्ने रुशत: रोचमानस्य ते तव सम्बन्धि । अत्र एमञ्शब्देन गमनमार्ग उच्यते । एम वर्त्म कृष्णं कृष्णवर्णं भवति । भा: तव सम्बन्धिनी दीप्ति: पुर: पुरस्ताद्भवति । चरिष्णु सञ्चरणशीलम् अर्चि: त्वदीयं तेज: वपुषां वपुष्मतां रूपवताम् । तेजस्विनामित्यर्थ: । एकम् इत् मुख्यमेव भवति । यत् यं त्वाम् अप्रवीता अनुपगता यजमाना: गर्भं त्वज्जननहेतुमरणिं दधते ह धारयन्ति खलु । स त्वं सद्यश्चित् सद्य: एव जात: उत्पन्न: सन् दूत: भवसीदु यजमानस्य दूतो भवस्येव ॥

**अन्वय**— रुशत: ते एम कृष्णम्, भा: पुर:, चरिष्णु: अर्चि: वपुषाम् इत् एकम्, यत् अप्रवीता ह गर्भं दधते, सद्य: चित् जात: इत् दूत: भवसि ।

**पदार्थ**— रुशत: = चमकने वाले । ते = तुम्हारा । एम = मार्ग । कृष्णम् = काला । भा: = दीप्ति । पुर: = सामने । चरिष्णु: = सञ्चरणशील । अर्चि: = तेज, किरण । वपुषाम् = सुन्दर रूप वालों में । इत् = निश्चय ही । एकम् = अद्वितीय । यत् = जब । अप्रवीता = उपस्थित यजमान । ह = निश्चितरूप से । गर्भम् = गर्भ को, अरणि को । दधते = धारण करता है । सद्य: = शीघ्र । चित् = ही । जात: = उत्पन्न हुए । इत् उ = निश्चित रूप से । दूत: = दूत । भवसि = तुम हो जाते हो ।

**अनुवाद**— (हे अग्नि), चमकने वाले तुम्हारा मार्ग काला (है), (तुम्हारी) दीप्ति सामने (है), (तुम्हारा) सञ्चरणशील तेज (किरण) सुन्दर रूप वालों में निश्चय ही अद्वितीय है । (हे अग्नि), जब उपस्थित यजमान निश्चितरूप से गर्भ (अरणि) को धारण करता है (तो) शीघ्र ही उत्पन्न हुए तुम निश्चित रूप से दूत हो जाते (बन जाते) हो ।

**व्याकरण**—

१. एम – √हण् (गतौ) + मनिन् ।
२. रुशतः – √रुच् (दीप्तौ) + शतृ = रुशत्, पुलिंङ्ग षष्ठी, एकवचन ।
३. चरिष्णुः – √चर् + इष्णुच् ।
४. दधते – √धा + आत्मनेपद लट् प्रथमपुरुष, बहुवचन ।
५. भवसि – √भू लट् मध्यमपुरुष, एकवचन ।

**सद्यो जातस्य ददृशानमोजो**
**यदस्य वातो अनुवाति शोचिः ।**
**वृणक्ति तिग्मामतसेषु जिह्वां**
**स्थिरा चिदन्ना दयते वि जम्भैः ॥१०॥**

**पदपाठ—** सद्यः । जातस्य । ददृशानम् । ओजः । यत् । अस्य । वातः । अनुऽवाति । शोचिः ॥ वृणक्ति । तिग्माम् । अतसेषु । जिह्वाम् । स्थिरा । चित् । अन्ना । दयते । वि । जम्भैः ॥

**सा०भा०—** सद्यो जातस्य अरणिनिर्मथनादनन्तरमेवोत्पन्नस्याग्नेः ओजः तेजः ददृशानम् । ऋत्विगादिभिर्दृश्यमानं भवतीति शेषः । वातः वायुः यत् यदा अग्नेः शोचिः दीप्तिम् अनु लक्षीकृत्य वाति गच्छति तदा सोऽयमग्निः अतसेषु वृक्षसङ्घेषु तिग्मां तीक्ष्णां जिह्वां ज्वालां वृणक्ति संयोजयति । स्थिरा चित् स्थिराण्यपि अन्ना अन्नरूपाणि काष्ठादीनि जम्भैः तेजोभिः वि दयते विखण्डयति । भक्षयतीत्यर्थः ॥

**अन्वय—** सद्यः जातस्य ओजः ददृशानम्, यत् अस्य, शोधिः वातः अनुवाति तिग्मां जिह्वाम् असतेषु वृणक्ति, स्थिरा चित् अन्ना जम्भैः वि दयते ।

**पदार्थ—** सद्यः = शीघ्र । जातस्य = उत्पन्न (अग्नि) का । ओजः = तेज, पराक्रम । ददृशानम् = देखने योग्य (होता है) । यत = जब । अस्य = (अग्नि) की । शोचिः = दीप्ति को, लपटों को । वातः = वायु । अनु वाति = लक्ष्य करके बहता है (हवा करता है) । तिग्माम् = तीक्ष्ण । जिह्वाम् = जिह्वा को । असतेषु = सूखी लकड़ियों पर । वृणक्ति = संयोजित करता है, लगाता है । स्थिरा चित् = खड़े भी । अन्ना = अन्नरूप (वृक्षों) को । जम्भैः = दाँतों से, तेजो से । विदयते = खा जाता है, जला देता है ।

**अनुवाद—** शीघ्र उत्पन्न (अग्नि) का तेज (पराक्रम) देखने योग्य होता है । जब इस (अग्नि) की दीप्ति (लपटों) को लक्ष्य करके वायु बहता है (हवा करता है) (तब यह अग्नि अपनी) तीक्षण जिह्वा को सूखी लकड़ियों पर संयोजित करता (लगाता है) और खड़े भी अन्नरूप वृक्षों को (अपने) तेजों से (दाँत से) खा जाता है (जला देता है) ।

**व्याकरण—**

१. ददृशानम् – √दृश् (दर्शने) + कानच् = ददृशान, प्रथमा, एकवचन ।
२. अनुवाति – अनु + √वा लट् प्रथमपुरुष, एकवचन ।
३. वृणक्ति – √वृण् + लट्, प्रथमपुरुष, एकवचन ।
४. दयते – √दा (विभाजने) + आत्मनेपद लट्, प्रथमपुरुष, एकवचन ।
५. स्थिरा, अन्ना– क्रमशः नपुंसकलिङ्ग स्थिर और अन्न के द्वितीया बहुवचन में स्थिराणि और अन्नानि के वैदिकरूप ।

**तृषु यदन्ना तृषुणा ववक्ष**
**तृषुं दूतं कृणुते यह्वो अग्निः ।**

वातस्य मेळिं सचते निजूर्व-

न्नाशुं न वाजयते हिन्वे अर्वा ॥११॥

**पदपाठ**— तृषु । यत् । अन्ना । तृषुणा । ववक्ष । तृषुम् । दूतम् । कृणुते । यह्वः । अग्निः ॥ वातस्य । मेळिम् । सचते । निऽजूर्वन् । आशुम् । न । वाजयते । हिन्वे । अर्वा ॥

**सा० भा०**— यत् यः अग्निः तृषु क्षिप्रमेव अन्ना अन्नानि काष्ठादीनि तृषुणा क्षिप्रेण रश्मिसमूहेन ववक्ष वहति । दहतीत्यर्थः । यह्वः महान् सः अग्निः तृषुम् आत्मानं दूतं कृणुते यजमानदूतं करोति । निजूर्वन् काष्ठानि निःशेषेण दहन्नग्निः वायोः मेळिं बलं सचते सेवते । आशुं न अश्वसादी यथाश्वं तथा अर्वा गमनशीलोऽग्निः स्वरश्मिं वाजयते वाजिनं बलवन्तं करोति । हिन्वे प्रेरयति च ॥

**अन्वय**— यत् यह्वः अग्निः तृषुणा अन्ना तृषु ववक्ष तृषुं दूतं कृणुते । निजूर्वन् वातस्य मेळिं सचते, अर्वा आशुं न वाजयते हिन्वे (च) ।

**पदार्थ**— यत् = जब । यह्वः = महान् । अग्निः = अग्नि । तृषुणा = शीघ्रगामी रश्मिसमूह से । अन्ना = (कष्ठादि) भोजन को । तृषु = शीघ्र । ववक्ष = लाता है । तृषुम् = शीघ्रगामी । दूतम् = दूत । कृणुते = करता है, बनाता है । निजूर्वन् = निःशेष रूप से खाता हुआ । वातस्य = वायु के । मेळिम् = बल को । सचते = सेवित करता है, उपयोग में लाता है । अर्वा = शीघ्रगामी (अग्नि) । आशुं न = अश्व के समान । वाजयते = बलशाली (शक्तिशाली) बनाता है । हिन्वे = प्रेरित करता है ।

**अनुवाद**— जब महान् अग्नि शीघ्रगामी रश्मिसमूह से (काष्ठादि) भोजन को शीघ्र लाता है (तो अपने को) शीघ्रगामी दूत बनाता है । (उसको) पूर्णरूप से खाता हुआ (अग्नि) वायु के बल को सेवित करता है (उपयोग में लाता है)। शीघ्र-गामी (अग्नि) अश्व के समान (अपनी लपटों को) शक्तिशाली बनाता है (और) प्रेरित करता है ।

**व्याकरण**—

१. ववक्ष – √वक्ष् + लिट् प्रथमपुरुष, एकवचन ।

२. कृणुते – √कृ + आत्मनेपद लट् प्रथमपुरुष, एकवचन, कुरुते का वैदिकरूप ।

३. सचते – √सच् + आत्मनेपद लट् प्रथमपुरुष, एकवचन ।

४. निजूर्वन् – नि + √जूर्व + शतृ, प्रथमा, एकवचन ।

५. वाजयते – नामधातु √वाजय आत्मनेपद लट् प्रथमपुरुष, एकवचन ।

६. हिन्वे – √हि आत्मनेपद, लट् प्रथमपुरुष, एकवचन ।

अभ्यास— (१) निम्नलिखित मन्त्रों का हिन्दी में अनुवाद कीजिए—

(क) अयमिह प्रथमो धायि..................१

(ख) अग्ने कदा त आनुषक्.................२

(ग) आशु दूतं विवस्वतो....................४

(घ) तमीं होतारमानुषक् ....................५

(ङ) वेरध्वरस्य दूत्यानि विद्वान् .............८

(२) निम्नलिखित पर व्याकरणात्मक टिप्पणी लिखिए—

(क) विरुरुचः ।

(ख) भुवत् ।

(ग) जभ्रुः।

(घ) चिकित्वांसम्।

(ङ) दधते।

(च) ववक्ष।

## ५.३ अक्षसूक्तम्

**वेद–ऋग्वेद** **मण्डल संख्या–१०** **सूक्त संख्या–३४**

**ऋषि-ऐलूष कवष** देवता–अक्ष, कृषिः छन्द-७ जगती, अवशिष्ट त्रिष्टुप्

**प्रावेपा मा बृहतो मादयन्ति**
**प्रवातेजा इरिणे वर्वृताना।**
**सोमस्येव मौजवतस्य भक्षो**
**विभीदको जागृविर्मह्यमच्छान् ॥१॥**

**पदपाठ**—**प्रावेपाः। मा। बृहतः। मादयन्ति। प्रवातेऽजाः। इरिणे। वर्वृतानाः॥ सोमस्यऽइव। मौजऽवतस्य। भक्षः। विऽभीदकः। जागृविः। मह्यम्। अच्छान्॥**

**सा०भा०**— बृहतः महतो विभीतकस्य फलत्वेन सम्बन्धिनः प्रवातेजाः प्रवणे देशे जाताः इरिणे आस्फारे वर्वताना: प्रवर्तमानाः प्रावेपाः प्रवेपिणः कम्पनशीला अक्षाः मा मां मादयन्ति हर्षयन्ति। किंच जागृविः जयपराजययोर्हर्षशोकाभ्यां कितवानां जाग-रणस्य कर्त्ता विभीदकः विभीदकविकाराऽक्षो मह्यं माम् अच्छान् अचच्छदत् अत्यर्थं मादयति। तत्र दृष्टान्तः। सोमस्येव यथा सोमस्य मौजवतस्य। मूजवति पर्वते जातो मौजवतः। तस्य। तत्र ह्युत्तमः सोमो जायते। भक्षः पानं यजमानान् देवांश्च मादयति तद्वदित्यर्थः। तथा च यास्कः:– 'प्रवेपणो मा महतो विभीतकस्य फलानि मादयन्ति। प्रवातेजाः प्रवणेजा इरिणे वर्तमाना इरिणं निर्ऋणमृणातेरपार्णं भवत्यपरता अस्मादोषधय इति वा। सोमस्येव मौजवतस्य भक्षो मौजवतो मूजवति जातो मूजवान् पर्वतो मुञ्जवान् मुञ्जो विमुच्यत इषीकयेषीकेषतेर्गतिकर्मण इयमपीतरेषीकैतस्मादेव विभीदको विभेदनाज्जागृविर्जागरणन्मह्यमचच्छदत्' (निरु० ९.८) इति।

**अन्वय**— प्रवातेजाः बृहतः इरिणे वर्वृताना प्रावेपाः मा मादयन्ति। मौजवतस्य सोमस्य भक्ष इव जागृविः विभीदकः मह्यम् अच्छान्।

**पदार्थ**— प्रवातेजाः = तेज वायु वाले स्थानों में उत्पन्न होने वाले; ढालू प्रदेशों में उत्पन्न होने वाले। बृहतः = बड़े (विभीतक वृक्ष) से प्राप्त। इरिणे = अक्ष-फलक (खेलने के फर्श, चौपड़, अक्षपटल) पर। वर्वृतानाः = बार-बार नाचते हुए (लुढ़कते हुए)। प्रावेपाः = कम्पनशील, काँपते हुए। मा = मुझको। मादयन्ति = आनन्दित (उन्मादित, मस्त) करते हैं। मौजवतस्य = मुञ्जवान् पर्वत पर उत्पन्न होने वाले। सोमस्य = सोमरस के। भक्ष इव = भक्षण (पान) के समान। जागृविः = जगाने वाला, जागृत रखने वाला। विभीदकः = बहेड़ा का बीज, अक्ष; जुए का पासा। मह्यम् = मुझको। अच्छान् = आनन्दित करता है, आह्लादित करता है।

**अनुवाद**— तेज वायु वाले स्थान में उत्पन्न होने वाले तथा बड़े (विभीतक वृक्ष) से प्राप्त (जुए के पासे) अक्षफलक पर बार-बार नाचते हुए (लुढ़कते हुए) तथा काँपते हुए मुझको

आनन्दित करते हैं। (जुआरियों को) जगाने वाला जुए का पासा (बहेड़े का बीज, अक्ष) मुञ्जवान् पर्वत पर उत्पन्न होने वाले सोम के पान (भक्षण) के समान मुझको आनन्दित करता है। (अर्थात् जिस प्रकार मुञ्जवान् पर्वत पर उत्पन्न होने वाले सोम का पान व्यक्ति को मदोन्मत्त कर देता है, उसी प्रकार जुआड़ियो को रात-दिन जगाने वाला जुए का पासा मुझको अत्यधिक उन्मादित करता है। जो व्यक्ति जुए में जीतता है वह हर्ष से जागता है और जो व्यक्ति जुए में हारता है, वह दुख से जागता है। अतः जुए को जगाने वाला कहा गया है)।

**व्याकरण—**

१. वर्वृतानाः – √वृत् (होना) + लङ्-लुक् + शानच्, प्रथमा, बहुवचन।

२. मादयन्ति – √मद् (प्रसन्न करना, आनन्दित करना) + णिच् (मादय्) + लट्, प्रथमपुरुष, बहुवचन।

३. अच्छान् – √छन्द् (प्रसन्न करना, आनन्दित करना) + लुङ्, प्रथमपुरुष, एकवचन।

**न मा मिमेथ न जिहीळ एषा**
**शिवा सखिभ्य उत मह्यमासीत्।**
**अक्षस्याहमेकपरस्य हेतो-**
**रनुव्रतामप जायामरोधम् ॥२॥**

**पदपाठ—** न। मा। मिमेथ। न। जिहीळे। एषा। शिवा। सखिभ्यः। उत। मह्यम्। आसीत्॥ अक्षस्य। अहम्। एकऽपरस्य। हेतोः। अनुऽव्रताम्। अप। जायाम्। अरोधम्॥

**सा० भा०—** एषा अस्मदीया जाया मा मां कितवं न मिमेथ न चुक्रोध, न जिहीळे न च लज्जितवती। सखिभ्यः अस्मदीयेभ्यः शिवा सुखकरी आसीत् अभूत्। उत अपि च मह्यं शिवासीत्। इत्थम्। अनुव्रताम् अनुकूलां जायाम् एकपरस्य एकः परः प्रधानं यस्य तस्य अक्षस्य हेतोः कारणात् अहम् अप अरोधं परित्यक्त-वानस्मीत्यर्थः।

**अन्वय—** एषा मा न मिमेथ, न जिहीळे, सखिभ्यः उत मह्यम् शिवा आसीत्, अहम् एकपरस्य अक्षस्य हेतोः अनुव्रताम् जायाम् अप अरोधम्।

**पदार्थ—** एषा = यह (मेरी पत्नी)। मा = मुझको, मुझसे। न = नहीं। मिमेथ = कलह (झगड़ा) करती थी। न = नहीं। जिहीळे = क्रोध करती थी। सखिभ्यः = मित्रों के लिए। उत = और। मह्यम् = मेरे लिए। शिवा = कल्याण-कारिणी। आसीत् = थी। अहम् = मैनें। एकपरस्य = एक है प्रधान जिसमें ऐसे, एकमात्र। अक्षस्य = अक्ष के। हेतोः = कारण। अनुव्रताम् = अनुगमन करने वाली, आज्ञाकारिणी। जायाम् = पत्नी को। अप अरोधम् = परित्याग कर दिया, छोड़ दिया, घर से निकाल दिया।

**अनुवाद—** यह (मेरी पत्नी) मुझसे कलह (झगड़ा) नहीं करती थी और न मुझ पर क्रोध करती थी। मेरे मित्रों के लिए और मेरे लिए यह कल्याणकारी (अच्छा व्यवहार करने वाली) थी। एकमात्र जुए के कारण मैनें अपनी आज्ञाकारिणी पत्नी का परित्याग कर दिया।

**व्याकरण—**

१. मिमेथ – √मिथ् (कलह करना, हिंसा करना) + लिट्, प्रथमपुरुष, एकवचन।

२. जिहीळे – √हीड् (क्रोध करना) + लिट्,प्रथम पुरुष, एकवचन। दो स्वरों के मध्य में आने के कारण ड् का ळ् हो गया है।

३. अरोधम् – √रुध् (रोकना) + लुङ्, उत्तमपुरुष, एकवचन का वैदिक रूप।

**द्वेष्टि श्वश्रूरप जाया रुणद्धि**
**न नाथितो विन्दते मर्डितारम्।**

**अश्वस्येव जरतो वस्न्यस्य**
**नाहं विन्दामि कितवस्य भोगम् ॥३॥**

**पदपाठ**— द्वेष्टि । श्वश्रूः । अप । जाया । रुणद्धि । न । नाथितः । विन्दते । मर्डितारम् ॥ अश्वस्यऽइव । जरतः । वस्न्यस्य । न । अहम् । विन्दामि । कितवस्य । भोगम् ॥

**सा० भा०**— श्वश्रूः जायाया माता गृहगतं कितवं द्वेष्टि निन्दतीत्यर्थः । किंच जाया भार्या अप रुणद्धि निरुणद्धि । अपि च नाथितः याचमानः कितवो धनं मर्डितारं धनदानेन सुखयितारं न विन्दते न लभते । इत्थं बुद्ध्या विमृशन् अहं जरतः वृद्धस्य वस्न्यस्य । वस्नं मूल्यं तदर्हस्य अश्वस्येव कितवस्य भोगं न विन्दामि न लभे ।

**अन्वय**— श्वश्रूः द्वेष्टि, जाया अप रुणद्धि, नाथितः मर्डितारम् न विन्दते । अहम् वस्न्यस्य जरतः अश्वस्य इव कितवस्य भोगम् न विन्दामि ।

**पदार्थ**— श्वश्रूः = सास, पत्नी की माता । द्वेष्टि = द्वेष करती है । जाया = पत्नी । अप रुणद्धि = रोकती है, दूर भगा देती है, ढकेल देती है । नाथितः = याचना करता हुआ (जुआड़ी) । मर्डितारम् = सुख देने वाले को, दया करने वाले को । न = नहीं । विन्दते = प्राप्त करता है । अहम् = मैं । वस्न्यस्य = बहुमूल्य बेचे जाने वाले । जरतः = वृद्ध । अश्वस्य इव = घोड़े के समान । कितवस्य = जुआड़ी के । भोगम् = उपभोग । न विन्दामि = नहीं प्राप्त करता हूँ, नहीं पाता हूँ ।

**अनुवाद**— (जुआड़ी से उसकी) सास द्वेष करती है, उसकी पत्नी उसे दूर भगा देती है । (जुआ खेलने के लिए धन की) याचना करता हुआ जुआड़ी (धन देकर) सुख देने वाले (व्यक्ति) को नहीं प्राप्त करता है । मैं बहुमूल्य वृद्ध घोड़े के समान जुआड़ी को कोई उपभोग नहीं पाता हूँ (जुआड़ी जिस प्रकार बहुमूल्य अश्व भी वृद्ध होने के कारण उपयोग के अयोग्य हो जाता है, इसी प्रकार जुआड़ी व्यक्ति समाज के लिए भार बन जाता है) ।

**व्याकरण**—

१. द्वेष्टि – √द्विष् (द्वेष करना) + लट्, प्रथमपुरुष, एकवचन ।
२. रुणद्धि – √रुध् (रोकना) + लट्, प्रथमपुरुष, एकवचन ।
३. नाथितः – √नाथ् (याचना करना) + क्त, प्रथमा, एकवचन ।
४. मर्डितारम् – √मृड् (सुख देना) + तृच्, द्वितीया, एकवचन ।
५. विन्दते – √विद् (प्राप्त करना) + लट्, प्रथमपुरुष, एकवचन वैदिक रूप ।
६. जरतः – √जृ (वृद्ध होना) + शतृ + षष्ठी, एकवचन ।
७. विन्दामि – विद् (प्राप्त करना) + लट् उत्तमपुरुष, एकवचन ।

**अन्ये जायां परि मृशन्त्यस्य**
**यस्यागृधद्वेदने वाज्य१क्षः ।**
**पिता माता भ्रातर एनमाहु-**
**र्न जानीमो नयता बद्धमेतम् ॥४॥**

**पदपाठ**— अन्ये । जायाम् । परि । मृशन्ति । अस्य । यस्य । अगृधत् । वेदने । वाजी । अक्षः ॥ पिता । माता । भ्रातरः । एनम् । आहुः । न । जानीमः । नयत । बद्धम् । एतम् ॥

**सा० भा०**— यस्य कितवस्य वेदने धने वाजी बलवान् अक्षः देवः अगृधत् अभिकाङ्क्षां करोति तस्य अस्य कितवस्य जायां भार्याम् अन्ये प्रतिकितवाः परि-मृशन्ति वस्त्रकेशाद्याकर्षणेन संस्पृशन्ति ।

किंच पिता जननी च भ्रातरः सहोदराश्च एनं कितवम् आहुः वदन्ति न वयमस्मदीयमेनं जानीमः । रज्ज्वा बद्धमेतं कितवं हे कितवाः यूयं नयत यथेष्टदेशं प्रापयेति ।

**अन्वय**— यस्य वेदने अक्षः अगृधत्, अस्य जायाम् अन्ये परिमृशन्ति, पिता माता भ्रातरः एनम् आहुः न जानीमः बद्धम् एनम् नयत ।

**पदार्थ**— यस्य = जिस (व्यक्ति) के । वेदने = धन पर । वाजी = बलवान् । अक्षः = जुए का पासा । अगृधत् = लाया गया, लोभ किया । अस्य = इस (जुआड़ी) की । जायाम् = पत्नी को । अन्ये = दूसरे लोग । परि मृशन्ति = छूते हैं, छेड़ते हैं, आलिंगन करते है, वस्त्र केशादि खोलकर अपमानित करते हैं । पिता- माता भ्रातरः = पिता, माता एवं भाई । एनम् आहुः = इसके विषय में कहते हैं । न जानीमः = नहीं जानते हैं । बद्धम् एनम् = बँधें हुए इसको । नयत = ले जाओ ।

**अनुवाद**— जिस (व्यक्ति) के धन पर बलवान् जुए का पासा ललचाया (ललचाने लगता है) (अर्थात् जो अपने धन को जुए में लगाने लगता है), उस (जुआड़ी) की पत्नी को दूसरे लोग छूते हैं (आलिङ्गन करते हैं अथवा वस्त्र केश आदि खींचकर अपमानित करते हैं) । (जुआड़ी के) पिता, माता और भाई इस (जुआड़ी) के विषय में (राजकर्मचारी या ऋणदाता से) कहते हैं कि हम इसको नहीं जानते (इससे हमारा कोई सम्बन्ध नहीं है) । इसे बाँधकर ले जाओ (अथवा बँधे हुए इसको जहाँ चाहो वहाँ ले जाओ) ।

**व्याकरण**—

१. अगृधत् – √गृध् (लालच करना) + लङ्, प्रथमपुरुष, एकवचन, वैदिक रूप ।
२. मृशन्ति – √मृश् (स्पर्श करना) + लट्, प्रथमपुरुष, बहुवचन ।
३. आहुः – √आह् (कहना) + लिट्, प्रथमपुरुष, बहुवचन ।
४. जानीमः – √ज्ञा (जानना) + लट्, उत्तमपुरुष, बहुवचन ।
५. नयत – √नी (ले जाना) + लोट्, मध्यमपुरुष, बहुवचन । छान्दसदीर्घ है ।
६. **वाज्य१ क्षः** – वाजी + अक्षः, क्षैप्र सन्धि । क्षैप्र स्वरित के बाद उदात्त आने से कम्प ।

**यदादीध्ये न दविषाण्येभिः**
**परायद्भ्योऽवहीये सखिभ्यः ।**
**न्युप्ताश्च बभ्रवो वाचमक्रत**
**एमीदेषां निष्कृतं जारिणीव ॥५॥**

**पदपाठ**— यत् । आऽदीध्ये । न । दविषाणि । एभिः । परायत्ऽभ्यः । अव । हीये । सखिभ्यः ॥ निऽउप्ताः । च । बभ्रवः । वाचम् । अक्रत । एमि । इत् । एषाम् । निःऽकृतम् । जारिणीऽइव ॥

**सा० भा०**— यत् यद्वदा अहम् आदीध्ये ध्यायामि तदानीम् एभिः अक्षैः न दविषाणि न दूषये न परितपामि । यद्वा । न दविषाणि न देविष्यामीत्यर्थः । परायद्भ्यः स्वयमेव परागच्छद्भ्यः सखिभ्यः सखिभूतेभ्यः कितवेभ्यः अव हीये अवहितो भवामि । नाहं प्रथममक्षान् विसृजामीति । किंच बभ्रवः बभ्रुवर्णा अक्षाः न्युप्ताः कितवैरवक्षिप्ताः सन्तः वाचमक्रत शब्दं कुर्वन्ति । तदा सङ्कल्पं परित्यज्य अक्षव्यसनेनाभिभूयमानोऽहम् एषाम् अक्षाणां निष्कृतं स्थानं जारिणीव यथा कामव्यसनेनाभिभूयमाना स्वैरिणी सङ्केतस्थानं याति तद्वत् एमीत् गच्छाम्येव ।

**अन्वय**— यत् आदीध्ये एभिः न दविषाणि परायद्भ्यः सखिभ्य अव हीये, बभ्रवः न्युप्ताः वाचम् अक्रत, एषां निष्कृतं जारिणी इव एमि इत् ।

**पदार्थ**— यत् = जब । आदीध्ये = विचार करता हूँ, सोचता हूँ, सङ्कल्प (निश्चय) करता हूँ । एभिः = इन (पासों से अथवा इन जुआ खेलने वाले मित्रों) के साथ । न दविषाणि = नहीं खेलूँगा, नहीं

जाऊँगा । परायद्भ्यः = (जुए के स्थान की ओर) जाते हुए । सखिभ्यः = (जुआड़ी) मित्रों से । अव हीये = छूट जाता हूँ, पीछे रहा जाता हूँ, छिप जाता हूँ । बभ्रवः = भूरे रंग वाले । न्युप्ताः = फेंके गये (पासे) । वाचम् = शब्द । अक्रत् = किया, करते हैं । एषाम् = इन (पासों) के । निष्कृतम् = खेलने के स्थान पर । जारिणी इव = व्याभिचारिणी स्त्री के समान । एमि इत् = जाता ही हूँ ।

**अनुवाद**— जब मैं सोचता हूँ कि इन (पासों) से नहीं खेलूँगा (अथवा-इन जुआड़ियों के साथ नहीं खेलूँगा), तब (जुए के स्थान की ओर) जाते हुए मित्रों से छूट जाता हूँ । किन्तु जब भूरे रंग वाले (पासे) फेंके जाने पर शब्द करते हैं, तब मैं एक व्याभिचारिणी स्त्री के समान इन (पासों) के स्थान पर पहुँच जाता हूँ । (अर्थात् जिस प्रकार व्याभिचारिणी स्त्री जार से मिलने के लिए सङ्केत-स्थल पर पहुँच जाती है, उसी प्रकार मैं जुआघर में पहुँच जाता हूँ) ।

**व्याकरण**—

१. आदीध्ये – आ +√धी (विचार करना) लट् आत्मनेपद उत्तमपुरुष, एकवचन ।

२. दविषाणि – √दिव (जुआ खेलना) या दू (जाना), लेट्, उत्तमपुरुष, एकवचन ।

३. हीये – √हा (छोड़ना) कर्मवाच्य, लट्, उत्तमपुरुष, एकवचन ।

४. न्युप्ताः – नि + √वप् + क्त प्रथमा, बहुवचन ।

५. अक्रत – √कृ (करना) + लुङ् आत्मनेपद प्रथमपुरुष, बहुवचन । वैदिक रूप ।

६. एमि – √इ (जाना) + लट्, उत्तमपुरुष, एकवचन ।

**स॒भामे॑ति कि॒त॒वः पृच्छमा॑नो**

**जे॒ष्यामीति॑ त॒न्वा॒३ शूशु॑जानः ।**

**अ॒क्षासो॑ अस्य॒ वि ति॑रन्ति॒ काम॑ं**

**प्रति॒दीव्ने॒ दध॑त॒ आ कृ॒तानि॑ ॥६॥**

**पदपाठ— स॒भाम् । ए॒ति॒ । कि॒त॒वः । पृ॒च्छमा॑नः । जे॒ष्यामि॑ । इति॑ । त॒न्वा॑ । शूशु॑जानः ॥ अ॒क्षासः॑ । अ॒स्य॒ । वि । ति॒र॒न्ति॒ । काम॑म् । प्र॒ति॒ऽदीव्ने॑ । दध॑तः । आ । कृ॒तानि॑ ॥**

**सा० भा०**— तन्वा शरीरेण शूशुजानः शोशुचानो दीप्यमानः कितवः कोऽत्रास्ति धनिकस्तं जेष्यामीति पृच्छमानः पृच्छन् सभां कितवसम्बन्धिनीम् एति गच्छति । तत्र प्रतिदीव्ने प्रतिदेवित्रे कितवाय कृतानि देवनोपयुक्तानि कर्माणि आ दधतः जयार्थमाभिमुख्येन मर्यादया वा दधतः कितवस्य कामम् इच्छाम् अक्षासः अक्षाः वि तिरन्ति वर्धयन्ति ।

**अन्वय**— तन्वा शूशुजानः कितवः जेष्यामि इति पृच्छमानः सभाम् एति, अक्षासः प्रतिदीव्ने कृतानि दधतः अस्य कामं वि तिरन्ति ।

**पदार्थ**— तन्वा = शरीर से । शूशुजानः = काँपता हुआ या चमकता हुआ (अर्थात् गर्व को व्यक्त करता हुआ) । कितवः = जुआड़ी । जेष्यामि = जीतूँगा । इति = ऐसा, इस प्रकार । पृच्छमानः = पूछता हुआ, सोचता हुआ, विचार करता हुआ । सभाम् = द्यूतसभा में, जुआ खेलने के स्थान में, जुआघर में । एति = जाता है । अक्षासः = जुए के पासे । प्रतिदीव्ने = विरोधी (प्रतिद्वन्द्वी) जुआड़ी के लिए । कृतानि = कृत नाम की चाल, उत्तम दाँव । दधतः = रखते हुए, लाते हुए, प्रदान करते हुए । अस्य = इस (जुआड़ी) की । कामम् = अभिलाषा को, मनोरथ को । वि तिरन्ति = विफल बना देते हैं, विनष्ट कर देते हैं, मिट्टी में मिला देते हैं या बढ़ा देते हैं, वर्धित कर देते हैं ।

**अनुवाद**— शरीर से काँपता हुआ (अथवा गर्व से छाती को फुलाता हुआ) जुआड़ी 'जीतूँगा' ऐसा विचार करता हुआ द्यूतसभा (जुआघर) में जाता है । जुए के पासे विरोधी (प्रतिद्वन्द्वी) जुआड़ी के लिए (अर्थात् विरोधी के पक्ष में) उत्तम दाँवों (कृत नामक उत्तम चाल) को रखते (लाते) हुए इस (जुआड़ी)

के मनोरथ को विफल बना देते हैं।

**व्याकरण—**

१. तन्वा३ शूशुजानः – जात्यस्वरित, कम्प।
२. शूशुजानः – √शुज् (चमकना, गर्व करना) + कानच्, प्रथमा, एकवचन।
३. पृच्छमानः – √प्रच्छ् (पूछना) + शानच्, प्रथमा, एकवचन।
४. अक्षासः – अक्षाः, का वैदिक रूप, प्रथमा, बहुवचन। लौकिक संस्कृत में अक्षाः रूप बनता है।
५. दधतः – √धा (रखना, स्थापित करना) + शतृ, प्रथमा, बहुवचन। अथवा षष्ठी, एकवचन।
६. तिरन्ति – √तृ (बढ़ाना) + लट्, प्रथमपुरुष, बहुवचन।

**अक्षास इदङ्कुशिनो नितोदिनो**
**निकृत्वानस्तपनास्तापयिष्णवः ।**
**कुमारदेष्णा जयतः पुनर्हणो**
**मध्वा सम्पृक्ताः कितवस्य बर्हणा ॥७॥**

**पदपाठ—** अक्षासः । इत् । अङ्कुशिनः । निऽतोदिनः । निऽकृत्वानः । तपनाः । तापयिष्णवः ॥ कुमारऽदेष्णाः । जयतः । पुनःऽहनः । मध्वा । सम्ऽपृक्ताः । कितवस्य । बर्हणा ॥

**सा० भा०—** अक्षास इत् अक्षा एव अङ्कुशिनः अङ्कुशवन्तः नितोदिनः नितो-दितवन्तश्च निकृत्वानः पराजये निकर्तनशीलाश्छेत्तारो वा तपनाः पराजये कितवस्य सन्तापकाः तापयिष्णवः सर्वस्वहारकत्वेन कुटुम्बस्य सन्तापशीलाश्च भवन्ति। किंच जयतः कुमारदेष्णाः धनदानेन धान्यतां लम्भयन्तः कुमाराणां दातारो भवन्ति। अपि च मध्वा मधुना सम्पृक्ताः प्रतिकितवेन बर्हणा परिवृद्धेन सर्वस्वहरणेन कितवस्य पुरर्हणः पुनर्हन्तारो भवन्ति।

**अन्वय—** अक्षासः इत् अङ्कुशिनः नितोदिनः निकृत्वानः तपनाः तापयिष्णवः कुमारदेष्णाः पुनर्हणः कितवस्य बर्हणा मध्वा सम्पृक्ताः।

**पदार्थ—** अक्षासः = जुए के पासे। इत् = निश्चय ही। अङ्कुशिनः = अङ्कुश वाले। नितोदिनः = चाबुक (कोड़े) वाले। निकृत्वानः = काटने वाले। तपनाः = तपाने (जलाने) वाले। तापयिष्णवः = सन्ताप (कष्ट) दिलाने वाले। कुमारदेष्णाः = बच्चों के समान (धन) देने वाले। जयतः = विजयी का। पुनर्हणः = पुनः हनन करने वाले। कितवस्य = जुआड़ी की। बर्हणा = वृद्धि के द्वारा। मध्वा = मधु (शहद) से। सम्पृक्ताः = सने हुए।

**अनुवाद—** जुए के पासे निश्चित ही अङ्कुश वाले हैं (अर्थात् जिस प्रकार अङ्कुश हाथी पर शासन करता है, उसी प्रकार पासे जुआड़ी पर शासन करते हैं– उसे जुआ खेलने के लिए प्रेरित करते हैं), चाबुक (कोड़े) वाले हैं (अर्थात् जिस प्रकार चाबुक घोड़े, बैल आदि को चलाता है, उसी प्रकार पासे जुआड़ी को चलाते हैं– जुआ खेलने के लिए बाध्य करते हैं), काटने वाले (अर्थात् विनाश करने वाले) हैं, ताप देने (जलाने) वाले (अर्थात् सन्ताप देने वाले) हैं, तपवाने (जलवाने) वाले (सन्ताप दिलाने वाले अर्थात् जुआड़ी द्वारा उसके परिवार को कष्ट दिलाने वाले) हैं, बच्चों के समान धन देने वाले (और पुनः ले लेने वाले), विजयी का पुनः हनन करने वाले, (जीतने वाले जुआड़ी को फिर मारने वाले अर्थात् जीतने वाले जुआड़ी से पुनःधन छीन लेने वाले, हराकर पुनः धन का नाश करने वाले) तथा जुआड़ी की वृद्धि द्वारा (अर्थात् जुआड़ी के धन की वृद्धि करने के कारण) मधु (शहद) से युक्त (मधु से सने हुए, मीठे, आकर्षक) होते हैं।

**व्याकरण—**

१. अक्षासः – अक्ष का प्रथमा बहुवचन, वैदिकरूप। लौकिक संस्कृत में अक्षाः।
२. अङ्कुशिनः – अङ्कुश + इनि + (इन्) प्रथमा, बहुवचन।
३. निकृत्वानः – नि + √कृत् (काटना) + क्वनिप् प्रथमा, बहुवचन।
४. तपनाः – √तप् (तपाना) + ल्युट् (अन्) प्रथमा, बहुवचन।
४. तापयिष्णवः – √तप् + णिच् + इष्णुच् प्रथमा, बहुवचन।
५. जयतः – √जि (जीतना) + शतृ + पञ्चमी या षष्ठी, एकवचन।
६. मध्वा – तृतीया एकवचन। वैदिक रूप। लौकिक संस्कृत में मधुना।
७. सम्पृक्ताः – सम् + √पृच् + क्त, प्रथमा, बहुवचन।

**त्रिपञ्चाशः क्रीळति व्रात एषां**
**देव इव सविता सत्यधर्मा।**
**उग्रस्य चिन्मन्यवे ना नमन्ते**
**राजा चिदेभ्यो नम इत्कृणोति ॥८॥**

**पदपाठ—** त्रिऽपञ्चाशः। क्रीळति। व्रातः। एषाम्। देवःऽइव। सविता। सत्यऽधर्मा। उग्रस्य। चित्। मन्यवे। न। नमन्ते। राजा। चित्। एभ्यः। नमः। इत्। कृणोति॥

**सा० भा०—** एषाम् अक्षाणां त्रिपञ्चाशः त्र्यधिकपञ्चाशत्संख्याकः व्रातः संघः क्रीळति आस्फारे विहरति। आक्षिकाः प्रायेण तावद्भिरक्षैर्दीव्यन्ति हि। तत्र दृष्टान्तः। सत्यधर्मा। सविता सर्वस्य जगतः प्रेरकः सूर्यो देव इव। यथा सविता देवो जगति विहरति तद्वदक्षाणां संघ आस्फारे विहरतीर्त्यः। किञ्च उग्रस्य चित् क्रूरस्यापि मन्यवे क्रोधाय एते अक्षाः न नमन्ते न प्रह्वीभवन्ति। न वशे वर्तन्ते। तं नमयन्तीत्यर्थः। राजा चित् जगत ईश्वरोऽपि एभ्यः नम इत् नमस्कारमेव देवनवेलायां कृणोति। नावज्ञां करोतीत्यर्थः॥

**अन्वय—** सत्यधर्मा सविता देवः इव एषाम् त्रिपञ्चाशः व्रातः क्रीळति, उग्रस्य मन्यवे न नमन्ते। राजा चित् एभ्यः नमः कृणोति।

**पदार्थ—** सत्यधर्मा = सत्य नियमों वाले। सविता देवः = सवितृ देवता। इव = समान। एषाम् = इन (इन पासों) का। त्रिपञ्चाशः = तिरपन संख्या वाला। व्रातः = समूह। क्रीळति = खेलता है, उछलता है। उग्रस्य = क्रोधी के, प्रचण्ड के, शक्तिशाली के। मन्यवे = क्रोध के समक्ष। न = नहीं। नमन्ते = झुकते हैं। राजा = राजा। चित् = भी। एभ्यः = इनके लिए। नमः = नमस्कार। इत् = ही। कृणोति = करता है।

**अनुवाद—** सत्य नियमों वाले सवितृ देव के समान इन पासों का तिरपन संख्या वाला समूह (उछलता है)। क्रोधी (व्यक्ति) के क्रोध के समक्ष भी (ये पासे) नहीं झुकते हैं। राजा भी इन्हें नमस्कार ही करता है। (जुआड़ी प्रायः तिरपन पासों से जुआ खेलते हैं। स्वयं नियम का पालन करने वाले सविता के समान पासे भी स्वतन्त्र होते हैं और अपने ही नियम पर चलते हैं अथवा यों कहिए- जिस प्रकार सविता देवता के नियम का उल्लंघन नहीं होता है, उसी प्रकार पासों के नियम का भी उल्लंघन नहीं होता है)।

**व्याकरण—**

१. क्रीळति – √क्रीड् (खेलना) + लट्, प्रथमपुरुष, एकवचन। दो स्वरों के मध्य में स्थित ड् का ळ हो गया है।
२. नमन्ते – √नम् (झुकना) + लट्, प्रथमपुरुष, बहुवचन। वैदिक रूप।
३. कृणोति – √कृ (करना) + लट्, प्रथमपुरुष, एकवचन वैदिक रूप। लौकिक संस्कृत में करोति।

नीचा वर्तन्त उपरि स्फुर-
न्त्यहस्तासो हस्तवन्तं सहन्ते ।
दिव्या अङ्गारा: इरिणे न्युप्ता:
शीता: सन्तो हृदयं निर्दहन्ति ॥९॥

**पदपाठ**— नीचा: । वर्तन्ते । उपरि । स्फुरन्ति । अहस्तास: । हस्तऽवन्तम् । सहन्ते ॥ दिव्या: । अङ्गारा: । इरिणे । नि:ऽउप्ता: । शीता: । सन्त: । हृदयम् । नि: । दहन्ति ॥

**सा० भा०**— अपि चैतेऽक्षा: नीचा नीचीनस्थले वर्तन्ते । तथापि उपरि परा-जयात् भीतानां द्यूतकराणां कितवानां हृदयस्योपरि स्फुरन्ति । अहस्तास: हस्तरहिता अप्यक्षा: हस्तवन्तं द्यूतकरं कितवं सहन्ते पराजयकरणेनाभिभवन्ति । दिव्या: दिवि भवा अपकृता: अङ्गारा: अङ्गारसदृशा अक्षा: इरिणे इन्धनरहिते आस्फारे न्युप्ता: शीता: शीत-स्पर्शा: सन्त: हृदयं कितवानामन्त:करणं निर्दहन्ति पराजयजनितसन्तापेन भस्मीकुर्वन्ति ॥

**अन्वय**— नीचा: वर्तन्ते उपरि स्फुरन्ति । अहस्तास: हस्तवन्तम् सहन्ते । इरिणे न्युप्ता: दिव्या: अङ्गारा: शीता: सन्त: हृदयम् निर्दहन्ति ।

**पदार्थ**— नीचा: = नीचे । वर्तन्ते = रहते हैं, पड़ते हैं, लुढ़कते हैं । उपरि = ऊपर । स्फुरन्ति = उछलते हैं, फड़कते हैं । अहस्तास: = हस्तरहित, बिना हाथों के । हस्तवन्तम् = हाथों वाले को । सहन्ते = अभिभूत करते हैं, दबा लेते हैं । इरिणे = अक्ष-पटल पर । न्युप्ता: = फेंके गये । दिव्या: = दिव्य, अलौकिक, अद्भुत । अङ्गारा = अङ्गारे । शीता: सन्त: = शीतल होते हुए भी । हृदयम् = हृदय को । निर्दहन्ति = जलाते हैं ।

**अनुवाद**— ये (पासे) नीचे (= अक्षपटल पर) लुढ़कते (पड़ते) हैं किन्तु ऊपर उछलते (फड़कते) हैं (जुआड़ी के हृदय-पटल के ऊपर प्रभाव डालते है-पराजय के भय से जुआड़ी को डराते रहते हैं); हाथों से रहित होते हुए भी हाथों वाले (जुआड़ी) को अभिभूत कर लेते हैं (दबा लेते हैं) । अक्षपटल पर फेंके गये ये दिव्य अङ्गारे (अथवा-दिव्य अङ्गारों के सदृश ये पासे) स्वयं शीतल (ठण्डे) होते भी (जुआड़ी के) हृदय को (पराजय के सन्ताप) से जलाते हैं ।

**व्याकरण**—

१. अहस्तास: – प्रथमा बहुवचन; वैदिकरूप अहस्ता: (लौकिक संस्कृत); न विद्येते हस्तौ येषां ते अहस्तास:, नञ्तत्पुरुष ।
२. सहन्ते – √सह् (अभिभूत करना) + आत्मनेपद लट्, प्रथमपुरुष, बहुवचन ।
२. दिव्या:– दिवि भवा: दिव्या:, √दिव् + यत्, प्रथमा, बहुवचन ।
४. न्युप्ता: – नि + वप् + क्त, प्रथमा, बहुवचन ।
५. निर्दहन्ति – निर् + √दह् + लट् प्रथम पुरुष, बहुवचन ।

जाया तप्यते कितवस्य हीना
माता पुत्रस्य चरत: क्व स्वित् ।
ऋणावा बिभ्यद्धनमिच्छमानो-
ऽन्येषामस्तमुप नक्तमेति ॥१०॥

**पदपाठ**— जाया । तप्यते । कितवस्य । हीना । माता । पुत्रस्य । चरत: । क्व । स्वित् ॥ ऋणऽवा । बिभ्यत् । धनम् । इच्छमान: । अन्येषाम् । अस्तम् । उप । नक्तम् । एति ॥

**सा० भा०**— क्व स्वित् क्वापि चरत: निर्वेदाद्गच्छत: कितवस्य जाया भार्या हीना परित्यक्ता सती

तप्यते वियोगजसन्तापेन सन्तप्ता भवति। माता जनन्यपि पुत्रस्य क्वापि चरतः कितवस्य सम्बन्धाद्धीना तप्यते। पुत्रशोकेन सन्तप्ता भवति। ऋणावा अक्षपराजयादृणवान् कितवः सर्वतो बिभ्यद्धनं स्तेयजनितम् इच्छमानः कामयमानः अन्येषां ब्राह्मणादीनाम् अस्तं गृहम्। 'अस्तं पस्त्यम्' इति गृहनामसु पाठात्। नक्तं रात्रौ उप एति चौर्यार्थमुपगच्छति।

**अन्वय**— कितवस्य हीना जाया तप्यते, क्व स्वित् चरतः पुत्रस्य माता, ऋणावा बिभ्यत् धनम इच्छमानः नक्तम् अन्येषाम् अस्तम् उप एति।

**पदार्थ**— कितवस्य = जुआड़ी की। हीना = आश्रयहीना, परित्यक्ता। जाया = पत्नी। तप्यते = सन्तप्त (दुःखी) होती है। क्व स्वित् = कहीं। चरतः = विचरण करते हुए, घूमते, भटकते हुए पुत्रस्य माता = पुत्र की माता। ऋणावा = ऋणी, ऋण से युक्त। बिभ्यत् = डरता हुआ। धनम् इच्छमानः = धन को चाहता हुआ। नक्तम् = रात्रि में। अन्येषाम् = दूसरों के। अस्तम् = घर। उप एति = जात है, पहुँचता है।

**अनुवाद**— जुआरी की आश्रयहीना पत्नी सन्तप्त (दुःखी) रहती है; कहीं घूमते हुए (इधर-उधर भटकते हुए) (जुआड़ी) पुत्र की माता भी (दुःखी रहती है)। ऋणी (जुआड़ी) (ऋणदाता से) डरता हुअ तथा धन की इच्छा (कामना, अभिलाषा) करता हुआ (चोरी करने के लिए) रात्रि में दूसरों के घर जात है।

**व्याकरण**—

१. हीना – √हा (छोड़ना) + क्त + टाप्, प्रथमा, एकवचन।
२. तप्यते – √तप् (जलना,सन्तप्त होना) + आत्मनेपद लट् प्रथम पुरुष, एकवचन।
३. चरतः – √चर् (विचरण करना) + शतृ, षष्ठी, एकवचन।
४. बिभ्यत् – √भी (डरना) शतृ, प्रथमा, एकवचन, वैदिक रूप।
५. इच्छमानः – √इष् (इच्छा) + शानच् प्रथमा, एकवचन।

**स्त्रियं दृष्ट्वाय कितवं ततापा-**
**न्येषां जायां सुकृतं च योनिम्।**
**पूर्वाह्णे अश्वान्युयुजे हि बभ्रू-**
**न्त्सो अग्नेरन्ते वृषलः पपाद ॥११॥**

**पदपाठ**— **स्त्रियम्। दृष्ट्वाय। कितवम्। ततापं। अन्येषाम्। जायाम्। सुऽकृतम्। च। योनिम्॥ पूर्वाह्णे। अश्वान्। युयुजे। हि। बभ्रून्। सः। अग्नेः। अन्ते। वृषलः। पपाद॥**

**सा० भा०**— कितवं कितवः। विभक्तिव्यत्ययः। अन्येषां स्वव्यतिरिक्तानां पुरु-षाणां जायां जायाभूत स्त्रियं नारीं सुखेन वर्तमानां सुकृतं सुष्ठुकृतं योनिं गृहं च दृष्ट्वाय मज्जाया दुःखिता गृहं चासंस्कृतमिति ज्ञात्वा तताप तप्यते। पुनः पूर्वाह्णे प्रातःकाले बभ्रून् बभ्रुवर्णान् अश्वान् व्यापकानक्षान् युयुजे युनक्ति। पुनश्च वृषलः वृषलकर्मा सः कितवो रात्रौ अग्नेरन्ते समीपे पपाद शीतार्तः सन् शेते।

**अन्वय**— कितवम् स्त्रियम् अन्येषां जायाम् सुकृतम् योनिम् दृष्टवाय तताप पूर्वाह्णे बभ्रून् युयुजे, वृषलः अग्नेः अन्ते पपाद।

**पदार्थ**— कितवम् = कितवः (विभक्तिव्यत्यय से कर्ता के स्थान पर कर्म का प्रयोग हुआ) जुआड़ी। स्त्रियम् = (अपनी) पत्नी को। अन्येषाम् = दूसरों की। जायाम् = पत्नी को; जातावेकवचनम्। सुकृतम् = सुनिर्मित, सुसज्जित। योनिम् = घर को। दृष्ट्वाय = देखकर। तताप = संतप्त (दुःखी) होता है। पूर्वाह्णे = दिन के पहले भाग में, प्रातःकाल। बभ्रून् = भूरे। अश्वान् = अश्वों को, पासों को। युयुजे = जोतता है। वृषलः = नीच। अग्नेः अन्ते = अग्नि के समीप। पपाद = गिर पड़ता है, पड़ा रहता है।

**अनुवाद**— जुआड़ी (अपनी कष्ट भोगती हुई) पत्नी को तथा दूसरे की (सुख भोगती) हुई पत्नी

और सुसज्जित (सुनिर्मित) घर को देखकर संतप्त (दु:खी) होता है। वह (जुआड़ी) प्रात:काल भूरे अश्वों (पासों) को जोतता है (अर्थात् पासों को दाँव पर लगाता है– (जुआ खेलता है और (जुए में हार कर सायंकाल) वह नीच (शीत से पीड़ित होकर) अग्नि के पास गिर पड़ता है (अग्नि के पास पड़ कर रात बिताता है)!

**व्याकरण—**

१. दृष्ट्वाय – √दृश् (देखना) + कत्वाय (त्वाय) वैदिक रूप, लौकिक संस्कृत में दृष्ट्वा।

२. तताप – √तप् (संतप्त होना) + लिट्, प्रथमपुरुष, एकवचन। लट् अर्थ में प्रयुक्त।

३. युयुजे – √युज् (जोतना) लिट् प्रथमपुरुष, एकवचन लट् अर्थ में।

४. पपाद – √पद् (गति करना) + लिट् प्रथमपुरुष, एकवचन लट् अर्थ में।

**यो वः सेनानीर्महतो गणस्य**
**राजा व्रातस्य प्रथमो बभूव।**
**तस्मै कृणोमि न धना रुणध्मि**
**दशाहं प्राचीस्तदृतं वदामि॥१२॥**

**पदपाठ**— यः। वः। सेनाऽनीः। महतः। गणस्य। राजा। व्रातस्य। प्रथमः। बभूव॥ तस्मै। कृणोमि। न। धना। रुणध्मि। दश। अहम्। प्राचीः। तत्। ऋतम्। वदामि॥

**सा० भा०**— हे अक्षाः वः युष्माकं महतो गणस्य संघस्य यः अक्षः सेनानीः नेता बभूव भवति व्रातस्य च। गणव्रातयोरल्पो भेदः। राजा ईश्वरः प्रथमः मुख्यो बभूव तस्मै अक्षाय कृणोमि अहमञ्जलिं करोमि। अतः परं धना धनानि अक्षार्थ-महं न रुणध्मि न सम्पादयामीत्यर्थः। एतदेव दर्शयति। अहं दशसंख्याका अङ्गुलीः प्राचीः प्राङ्मुखीः करोमि। तत् एतत् अहम् ऋतं सत्यमेव वदामि। नानृतं ब्रवीमीत्यर्थः।

**अन्वय**— वः महतः गणस्य यः सेनानी बभूव, व्रातस्य प्रथमः राजा, तस्मै अहम् दश प्राचीः कृणोमि, धना न रुणध्मि, तत् ऋतम् वदामि।

**पदार्थ**— वः = तुम्हारे। महतः गणस्य = महान् गण (तिरपन संख्या वाले समुदाय का)। यः = जो (अक्ष, पासा)। सेनानीः = सेनापति, नायक। बभूव = था, है। व्रातस्य = संघ का, समूह का। प्रथमः राजा = प्रमुख राजा। तस्मै = उस (अक्ष) के लिए। अहम् = मैं (जुआड़ी)। दश = दश (अंगुलियाँ)। प्राचीः = पूर्व की ओर, सामने करता हूँ। धना न रुणध्मि = मैं धनों को नहीं रोकता हूँ। तत् = वह, यह। ऋतम् = सत्य। वदामि = कहता हूँ।

**अनुवाद**— (हे अक्षो!) जो (अक्ष) तुम्हारे महान् गण का सेनापति है, जो तुम्हारे संघ का प्रमुख राजा है, उसके सामने (उसके लिए) मैं दसों अंगुलियाँ सामने करता हूँ (अर्थात् हाथ जोड़कर नमस्कार करता हूँ)। मैं धनों को रोकता नहीं हूँ। (मैंने धन नहीं छिपाया है– जुआ खेलने के लिए अब मेरे पास धन नहीं रह गया है); यह मै सत्य कहता हूँ।

**व्याकरण—**

१. बभूव – √भू + लिट्, प्रथमपुरुष, एकवचन।

२. कृणोमि – √कृ + लट्, उत्तमपुरुष, एकवचन, वैदिक रूप। लौकिक संस्कृत में करोमि रूप बनता है।

३. रुणध्मि – √रुध् + लट् उत्तमपुरुष, एकवचन।

४. धना – द्वितीया बहुवचन वैदिक रूप। लौकिक संस्कृत में धनानि रूप होता है।

**अक्षैर्मा दीव्यः कृषिमित्कृषस्व**
**वित्ते रमस्व बहु मन्यमानः ।**
**तत्र गावः कितव तत्र जाया**
**तन्मे वि चष्टे सवितायमर्यः ॥१३॥**

**पदपाठ—** अक्षैः । मा । दीव्यः । कृषिम् । इत् । कृषस्व । वित्ते । रमस्व । बहु । मन्यमानः ॥ तत्र । गावः । कितव । तत्र । जाया । तत् । मे । वि । चष्टे । सविता । अयम् । अर्यः ॥

**सा० भा०—** हे कितव बहु मन्यमानः मद्वचने विश्वासं कुर्वंस्त्वम् अक्षैर्मा दीव्यः द्यूतं मा कुरु । कृषिमित् कृषिमेव कृषस्व कुरु । वित्ते कृष्या सम्पादिते धने रमस्व रतिं कुरु । तत्र कृषौ गावः भवन्ति । तत्र जाया भवन्ति । तत् एव धर्मरहस्यं श्रुतिस्मृतिकर्त्ता सविता सर्वस्य प्रेरकः अयं दृष्टिगोचरः अर्यः ईश्वरः वि चष्टे विविध-माख्यातवान् ॥

**अन्वय—** कितव! अक्षैः मा दीव्यः कृषिम् इत् कृषस्व । बहु मन्यमानः वित्ते रमस्व, तत्र गावः, तत्र जाया, तत् मे अयम् अर्यः सविता विचष्टे ।

**पदार्थ—** कितव = हे जुआड़ी! अक्षैः = पासों से । मा दीव्य = मत खेलो । कृषिम् इत् = खेती ही । कृषस्व = जोतो; करो । वित्ते = धन में । बहुत, पर्याप्त । मन्यमानः = मानते हुए, समझते हुए । रमस्व = रमण करो, आनन्द करो, । तत्र = वहाँ । गावः = गायें । तत्र = वहाँ । जाया = पत्नी । तत् = यह । मे = मुझसे । अयम् = यह । अर्यः = श्रेष्ठ । सविता = सविता (देवता) ने । विचष्टे = समझा कर कहा है ।

**अनुवाद—** हे जुआड़ी! पासों से मत खेलो (अर्थात् जुआ मत खेलो), खेती ही जोतो (अर्थात् खेती करो) । (खेती द्वारा प्राप्त धन को) (पर्याप्त) मानते हुए (उस) धन में रमण करो (आनन्द का अनुभव करो) । वहाँ (खेती के कर्म में) गायें हैं तथा वहाँ (खेती के कर्म में) तेरी स्त्री है । (खेती करने से जुए में हार गए तुम्हारे पशु मिल जायेंगे और जुआ खेलने के कारण अन्यत्र गयी तुम्हारी पत्नी तुम्हें मिल जायेगी)– यह मुझसे श्रेष्ठ सविता (देवता) ने समझा कर कहा है ।

**व्याकरण—**

१. दीव्यः – √दिव् (जुआ खेलना) + लङ् (अट्–रहित), मध्यमपुरुष, एकवचन; 'मा' के कारण अट् का अभाव ।
२. कृषस्व – √कृष् (खींचना) + लोट्, मध्यमपुरुष, एकवचन, वैदिक रूप ।
३. रमस्व – √रम् (रमण करना) + लोट्, मध्यमपुरुष, एकवचन ।
४. चष्टे – √चक्ष् (देखना, कहना) + लट्, प्रथमपुरुष, एकवचन ।

**मित्रं कृणुध्वं खलु मृळता नो**
**मा नो घोरेण चरताभि धृष्णु ।**
**नि वो नु मन्युर्विशतामराति-**
**रन्यो बभ्रूणां प्रसितौ न्वस्तु ॥१४॥**

**पदपाठ—** मित्रम् । कृणुध्वम् । खलु । मृळत । नः । मा । नः । घोरेण । चरत । अभि । धृष्णु । नि । वः । नु । मन्युः । विशताम् । अरातिः । अन्यः । बभ्रूणाम् । प्रऽसितौ । नु । अस्तु ॥

**सा० भा०**— हे अक्षाः यूयं मित्रं कृणुध्वं । अस्मासु मैत्रीं कुरुत । खलु इति पादपूरणः । न अस्मान् मृळता सुखयत च । नः अस्मान् धृष्णु धृष्णुना तृतीयार्थे प्रथमा । घोरेण असह्येन मा अभिचरत मा गच्छत । किञ्च वः युष्माकं मन्युः क्रोधः अरातिः अस्माकं शत्रुः नि विशताम् अस्मच्छत्रुषु तिष्ठतु । अन्यः अस्माकं शत्रुः कश्चित् बभ्रूणां बभ्रुवर्णानां युष्माकं प्रसितौ प्रबन्धने नु क्षिप्रं अस्तु भवतु ।

**अन्वय**— मित्रम् कृणुध्वम्, खलु नः मृळत, धृष्णु, घोरेण मा अभिचरत । नु वः मन्युः अरातिः नि बिशताम्, नु अन्यः बभ्रूणाम् प्रबन्धने प्रसितौ अस्तु ।

**पदार्थ**— मित्रम् = मित्र, मित्रता । कृणुध्वम् = करो, बनाओ । खलु = पादपूर्ति के लिए निपात । नः = हमारे ऊपर । मृळत = दया करो । धृष्णु = दबा लेने वाले, अभिभूत करने वाले । घोरेण = भयङ्कर प्रभाव से,भयङ्कर जादू से । मा = मत । अभिचरत = अभिचार करो, मोहित करो । नु = अब । वः = तुम्हारा । मन्युः = क्रोध । अरातिः = शत्रुता । निविशताम् = रुक जाय,शान्त हो जाय । नु = अब । अन्यः = दूसरा । बभ्रूणाम् = भूरे (पासों) के । प्रसितौ = बन्धन में, जाल में । अस्तु = होवे, पड़े ।

**अनुवाद**— (हे पासो! अब मुझको) मित्र बना लो, हमारे ऊपर दया (कृपा) करो । (अपने) दबा लेने वाले तथा भयङ्कर प्रभाव से हमें मोहित न करो (हमारे ऊपर अभिचार न करो) । तुम्हारा क्रोध और तुम्हारी शत्रुता अब शान्त हो जाय । अब कोई दूसरा व्यक्ति भूरे (पासों) के बन्धन (जाल) में न पड़े ।

**व्याकरण**—

१. कृणुध्वम् – √कृ + लोट्, आत्मनेपद मध्यमपुरुष बहुवचन,
२. मृळत– √मृड् (दया करना, सुख देना) + लोट् मध्यमपुरुष, बहुवचन । वेदमें दो स्वरों के मध्य में डकार का लकार हुआ है ।
३. विशताम् – √विश् + लोट्, प्रथमपुरुष एकवचन ।
४. प्रसितौ – प्र + √सि (बाधना) + क्तिन् (ति), सप्तमी एकवचन ।
५. अरातिः – न रातिः अरातिः (नञ् तत्पुरुष स०) न + √रा (देना) + क्तिन् (ति) प्रथमा एकवचन ।

**अभ्यास**– (१) निम्नलिखित मन्त्रों का हिन्दी में अनुवाद कीलिए—

(क) न मा मिमेथ न जिहीळ एषा.................२
(ख) अन्ये जायां परि मृशन्त्यस्य.................४
(ग) सभामेति कितवः पृच्छमानो...................६
(घ) जाया तप्यते कितवस्य........................१०
(ङ) अक्षैर्मा दीव्यः कृषिमित्कृषस्व..................१३

(१) निम्नलिखित पर व्याकरणात्मक टिप्पणी लिखिए—

(क) मिमेथ ।
(ख) अगृधत् ।
(ग) अक्रत ।
(घ) अक्षासः ।
(ङ) नमन्ते ।

# इकाई - ६ वैदिक सूक्त

## इकाई की रूपरेखा

६.० उद्देश्य

६.१ राष्ट्राभिवर्धन सूक्त

६.२ पृथिवी सूक्त

## ६.० उद्देश्य

इस यूनिट में अथर्ववेदीय निम्नलिखित सूक्तों के मन्त्रों की व्याख्या का बोध कराया जायेगा।

## ६.१ राष्ट्राभिवर्धनम्

**वेद–अथर्ववेद** काण्ड संख्या–१ सूक्त संख्या–२९

**अभीवर्तेन मणिना येनेन्द्रो अभिवावृधे ।**
**तेनास्मान् ब्रह्मणस्पतेऽभि राष्ट्रीय वर्धय ॥१॥**

**पदपाठ**— अभिऽवर्तेन । मणिना । येन । इन्द्रः । अभिऽववृधे ॥ तेन । अस्मान् । ब्रह्मणः । पते । अभि । राष्ट्राय । वर्धय ॥१॥

**सा० भा०**— येन समृद्धिसाधनत्वेन प्रसिद्धेन अभीवर्तेन । अभितो वर्तते चक्रम् अनेनेति अभिवर्तो नेमिः । वृतु वर्तने । अस्मात् 'अकर्तरि च कारके संज्ञायाम्' (पा०सू० ३.३.१९) इति करणे घञ् । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' (पा०सू० ६.३.१२२) इति दीर्घः । 'थाथघञ्क्ताजबित्रकाणाम्' (पा०सू० ६.२.१४४) इति उत्तरपदान्तोदा-त्तत्वम् । अत्र कार्ये कारणशब्दः । चक्रनेमिनिर्मितो मणिः । यद्वा अभितः सर्वतः प्रवृद्धो-ऽभूत् । परमैश्वर्योपेतस्त्रिलोकीपतिर्बभूवेत्यर्थः । वृधु वृद्धौ । अस्मात् लिटि 'तुजादीनां दीर्घोऽभ्यासस्य' (पा०सू० ६.१७) इत्यभ्यासस्य दीर्घः । प्रत्ययस्वरेण अन्तोदात्तत्वम् । 'यद्वृत्तान्नित्यम्' (पा०सू० ८.१.६६) इति निघातप्रतिषेधः । हे ब्रह्मणस्पते वेदराशेरधिपते । षष्ठ्या पतिपुत्र' (पा०सू० ८.५३) इति विसर्जनीयस्य सत्वम् । 'सुबामन्त्रिते पराङ्गवत् स्वरे' (पा०सू० २.१.२) इति षष्ठ्यन्तस्य पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य 'आमन्त्रितस्य च' (पा०सू० ८.१.१९) इति आष्टमिकं सर्वानुदात्तत्वम् । एतत्संज्ञक देव तेन प्रागुदीरितमहिमोपेतेन मणिना अस्मान् शत्रुभिः पीडितान् राष्ट्राय । तादर्थ्ये चतुर्थी । स्वराष्ट्राभिवृद्ध्यर्थम् अभिवर्धय करितुरगधनादिभिः समृद्धान् कुरु । त्वत्प्रसा-दात् समृद्धैरस्माभी रक्षितं राष्ट्रं शत्रुभयरहितं यथा अभिवृद्धं भवति तथा कुरु इत्यर्थः ॥

**अन्वय**— ब्रह्मणस्पते येन अभीवर्तेन मणिना इन्द्रः वावृधे, तेन अस्मान् राष्ट्राय अभिवर्धय ।

**पदार्थ**— ब्रह्मणस्पते = हे ब्रह्मणस्पति । येन = जिस । अभीवर्तेन = चारो ओर (अप्रतिहत रूप से) घूमने वाली । मणिना = मणि के द्वारा । इन्द्रः = इन्द्र ने । अभिवावृधे = सभी ओर से बढ़ा, वृद्धि को प्राप्त किया । तेन = उस (मणि) से । अस्मान् = हम लोगों को । राष्ट्राय: = राष्ट्र (की समृद्धि) के लिए । अभि वर्धय = बढ़ाओ ।

**अनुवाद**— हे ब्रह्मणस्पति, जिस चारो ओर (अप्रतिहत रूप से) घूमने वाली मणि के द्वारा इन्द्र ने सभी ओर से वृद्धि को प्राप्त किया, उस (मणि) से हम लोगों को राष्ट्र (की समृद्धि) के लिए बढ़ाओ ।

**व्याकरण—**

१. अभीवर्तेन ' अभि + √वृ (वर्तने) + घञ्, तृतीया एकवचन 'घञ्यमनुष्ये बहुलम्' पा० ६.३.१२२) से उपसर्ग का दीर्घ ।

२. अभिवावृधे - अभि + √वृध् (वर्धने) + लिङ्, प्रथमपुरुष, एकवचन तुजादीनां दीर्घोऽभ्यासस्य (पा० ६.१.७) से अभ्यास का दीर्घ ।

३. वर्धय - √वृध् लोट् मध्यमपुरुष, एकवचन ।

**अभिवृत्य सपत्नानभि या नो अरातयः ।**

**अभि पृतन्यन्तं तिष्ठाभि यो नो दुरस्यति ॥२॥**

**पदपाठ**— **अभिऽवृत्य । सऽपत्नान् । अभि । याः । नः । अरातयः ॥ अभि । पृतन्यन्तम् । तिष्ठ । अभि । यः । नः । दुरस्यति ॥२॥**

**सा०भा०**— हे अभिवर्तं मणे त्वं सपत्नान् । सपत्नीव सपत्ना सहजशत्रवः । अस्मदीयांस्तान् शत्रून् अभिवृत्य अभिमुखं पर्यावृत्य । तिष्ठेति वक्ष्यमाणक्रिया अत्रापि सम्बध्यते त्वमेव प्रतिपक्षी भूत्वा तान् पराकुरु इत्यर्थः । तथा याः नः अस्माकम् अरातयः अदातारः अस्मदीयं राष्ट्रधनादिकम् अपहृत्य शात्रवं कुर्वाणा बाह्याः शत्रवः तानपि । अभि इत्युपसर्गश्रवणात् तिष्ठेति सम्बन्धः । अभिमुखं तिष्ठ । तथा पृतन्यन्तम् युद्धार्थं पृतनां सेनाम् आत्मन इच्छन्तम् । पृतनाशब्दात् 'सुप आत्मनः क्यच्' (पा०सू० ३.१.८) इति क्यच् । 'कव्यध्वरपृतनस्यर्चि लोपः' (पा०सू० ७.४.३९) इत्याकारलोपः । युद्धोन्मुखमपि शत्रून् अभितिष्ठ । तथा यः शत्रुः नः अस्माकं दुरस्यति दुष्टम् अभिचारादिरूपं क्षुद्रं कर्म कर्तुम् इच्छति । 'दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति' (पा०सू० ७.४.३६) इति क्यचि दुष्टशब्दस्य दुरस्भावो निपात्यते । तथाविधमपि शत्रुम् अभितिष्ठ । शप्तिपोः पित्त्वाद् अनुदात्तत्वे क्यच्स्वरेण मध्योदात्तत्वम् । 'यद्वृत्तान्नित्यम्' (पा०सू० ८.१.६६) इति निघातप्रतिषेधः ॥

**अन्वय**— सपत्नान् अभिवृत्य याः नः अरातयः अभि पृतन्यतम् अभितिष्ठ । यः नः दुरस्यति अभि (तिष्ठ) ।

**पदार्थ**— सपत्नान् = शत्रुओं को, विपक्षियों को । अभिवृत्य = चारो ओर से घेरकर । याः = जो । नः = हमको । अरातयः = नहीं देने वाले । अभि = (उनको) चारो ओर से (घेरकर) । पृतन्यन्तम् = युद्ध की इच्छा करने वाले को । अभि तिष्ठ = चारो ओर से (घेरकर) बैठ जाओ (अर्थात् पराजित करो) । यः = जो । नः = हमको । दुरस्यति = दुर्व्यवहार करता है । अभि = चारो ओर से (पराजित करो) ।

**अनुवाद**— (हे ब्रह्मणस्पति), (हमारे) शत्रुओं (विपक्षियों) को चारो ओर से घेरकर, जो हमको नहीं देने वाले (हैं, उनको) चारों ओर से (घेरकर) (और हमसे) युद्ध की इच्छा करने वाले को चारों ओर से (घेरकर) बैठ जाओ (अर्थात् उन्हें पराजित करो) । जो हमसे दुर्व्यवहार करता है (उसको) चारो ओर से (पराजित करो) ।

**व्याकरण**—

१. अभिवृत्य - अभि + √वृ + ल्यप् ।

२. पृतन्यतम् - पृतना + क्यच् (य) ।

३. अभितिष्ठ - अभि + √स्था + लोट्, मध्यमपुरुष, एकवचन ।

४. दुरस्यति - नामधातु √दुरस्य, लट् प्रथमपुरुष, एकवचन ।

**अभि त्वा देवः सविताभि सोमो अवीवृधत् ।**

**अभि त्वा विश्वा भूतान्यभीवर्तो यथाससि ॥३॥**

**पदपाठ**— **अभि । त्वा । देवः । सविता । अभि । सोमः । अवीवृधत् ॥ अभि । त्वा । विश्वा । भूतानि । अभिऽवर्तः । यथा । अससि ॥३॥**

**सा०भा०**— हे मणे त्वा त्वां देवः द्योतनात्मकः सविता सर्वस्य प्राणिजातस्य प्रेरकः एतत्संज्ञको देवः । अभि इत्युपसर्गश्रवणाद् अवीवृधत् इति क्रिया अत्रापि सम्बध्यते । अभ्यवीवृधत् अभितःसमृद्धम्

अकार्षीत्। वृधु वृद्धौ। अस्मात् ण्यन्तात् लुङि चङि गुणे प्राप्ते 'नित्यं छन्दसि' (पा०सू० ७.४.८) इति उपधऋवर्णस्य ऋकारादेशः। तथा सोमो देवः अभ्यवीवृधत्। 'व्यवहिताश्च' (पा०सू० १.४.८२) इति उपसर्गस्य व्यवहितप्रयोगः। तथा हे मणे त्वा त्वां विश्वा विश्वानि निखिलानि। 'शेश्छन्दसि बहुलम्' (पा०सू० ६.१.७०) इति शेर्लोपः। भूतानि भवन्ति सत्ता लभन्त इति भूतानि चराचरात्मकानि। 'क्तोऽधिकरणे च ध्रौव्यगति प्रत्यवसानार्थेभ्यः' (पा०सू० ३.४.७४) इति भवतेः कर्तरि क्त प्रत्ययः। उपसर्गश्रवणाद् अत्रापि अनुकृतक्रियासम्बन्ध। अभ्यवीवृधत्। अभिवर्धना विधिम् आह यथा येन प्रकारेण हे मणे त्वम् अभिवर्तः त्वद्धारयितुः पुरुषस्य अभितः स्वराष्ट्रपरराष्ट्रादौ वर्तनसाधनभूतः असति भवसि तथा त्वाम् अवीवृधत् इति पूर्वेण सम्बन्धः। असभुवि। 'बहुलं छन्दसि' (पा०सू० २.४.७३) इति शपो लुगभावः। 'यावद्याथाभ्याम्' (पा०सू० ८.१.३६) इति निघातप्रतिषेधः॥

**अन्वय**— त्वा सविता देवः अभि अवीवृधत्, सोमः अभि (अवीवृधत्); विश्वा भूतानि त्वा अभि (अवीवृधत्) यथा अभिवर्तः असति।

**पदार्थ**— त्वा = तुमको। सविता देवः = सविता देवता ने। अभि = चारों ओर से)। अवीवृधत् = समृद्ध किया है। सोमः = सोम ने। अभि = चारों ओर से (समृद्ध किया है)। विश्वा = सम्पूर्ण। भूतानि = प्राणियों ने। त्वा = तुमको। अभि = चारों ओर से (समृद्ध किया है)। यथा = जिससे। अभिवर्तः = चारो ओर घूमने वाले। असति = तुम होओ।

**अनुवाद**— तुमको सविता देवता ने चारों ओर से समृद्ध किया है, सोम ने चारों ओर से (समृद्ध किया) है (और) सम्पूर्ण प्राणियों ने तुमको चारो ओर से (समृद्ध किया है) जिससे तुम चारों ओर घूमने वाले होवो।

**व्याकरण**—

१. अवीवृधत् - √वृध् (वर्धने) लुङ् प्रथमपुरुष, एकवचन।

२. असति - √अस् लटमूलक लेट्, मध्यमपुरुष, एकवचन।

**अभीवर्तो अभिभवः सपत्नक्षयणो मणिः।**

**राष्ट्राय मह्यं बध्यतां सपत्नेभ्यः पराभुवे॥४॥**

**पदपाठ**— **अभिऽवर्तः। अभिऽभवः। सपत्नऽक्षयणः। मणिः॥ राष्ट्राय। मह्यम्। बध्यताम्। सऽपत्नेभ्यः। पराऽभुवे॥४॥**

**सा०भा०**— अभीवर्तः अभिवर्तनसाधनभूतः। तत्र हेतुम् आह— अभिभवः शत्रूणाम् अभिभविता। अभिभवनं विशिनष्टि— सपत्नक्षयणः सपत्नानां भ्रातृव्याणां क्षयकरः। यत एवम् अतः अभीवर्त इत्यर्थः तादृशो मणिः मह्यम्। षष्ठ्यर्थे चतुर्थी। 'ङयि च' (पा०सू० ६.१.२१२) इत्याद्युदात्तत्वम्। मम बध्यताम्। बन्ध बन्धने। कर्मणि लोट्। मणिबन्धनप्रयोजनम् आह— राष्ट्राय राष्ट्राभिवृद्धये। तथा सम्पनेभ्यः। पूर्ववत्। षष्ठ्यर्थे चतुर्थी। भ्रातृव्याणां पराभुवे पराभवनाय। परापूर्वाद् भवतेः संपादादिलक्षणो भावे क्विप्। बध्यमानोऽयं मणिः पूर्वं शत्रुभिः पीडितस्य स्वराष्ट्रस्य अभि-वृद्धिं बाधकानां शत्रूणां नाशनं च करोतु इत्यर्थः॥

**अन्वय**— अभीवर्तः अभिभवः सपत्नक्षयणः मणिः राष्ट्राय सपत्नेभ्यः पराभुवे मह्यं बध्यताम्।

**पदार्थ**— अभीवर्तः = चारों ओर घूमने वाली। अभिभवः = पराजित करने वाली। सपत्नक्षयणः = शत्रुओं का संहार करने वाली। मणिः = मणि। राष्ट्राय = राष्ट्र (की समृद्धि) के लिए। सपत्नेभ्यः = शत्रुओं को। पराभुवे = पराजित करने के लिए। मह्यम् = मेरे लिए, मेरे साथ। बध्यताम् = बँध जाय।

**अनुवाद**— चारों ओर घूमने वाली, पराजित करने वाली (तथा) शत्रुओं का संहार करने वाली मणि राष्ट्र (की समृद्धि) के लिए और शत्रुओं को पराजित करने के लिए मेरे लिए (मेरे साथ) बँध जाय।

**व्याकरण**—

१. बध्यताम् - √बन्ध् + लोट् प्रथमपुरुष, एकवचन।

२. पराभुवे - परा + √भू + तुमर्थक वैदिक ए प्रत्यय।

**उदसौ सूर्यो अगादुदिदं मामकं वचः ।**

**यथाहं शत्रुहोऽसान्यसपत्नः सपत्नहा ॥५॥**

**पदपाठ**— उत् । असौ । सूर्यः । अगात् । उत् । इदम् । मामकम् । वचः ॥ यथा । अहम् । शत्रुऽहः । असानि । असपत्नः । सपत्नऽहा ॥५॥

**सा० भा०**— असौ नभो मण्डले परिदृश्यमानः सूर्यः सर्वस्य प्राणिजातस्य प्रेरको देवः । 'राजसूयसूर्य' (पा०सू० ३.१.११४) इत्यादिना क्यपि निपात्यते । उदागात् उदितवान् । 'इणो गा लुङि' (पा०सू० २.४.४५) इति गादेशः । 'गातिस्था०' (पा०सू० २.४.७७) इति सिचो लुक् । किञ्च मामकम् मदीयम् इदम् अधुनोच्चार्यमाणं वचः आत्मनो जयाशंसात्मकं शत्रूणाम् अभिभवप्रतिपादकं च वाक्यम् । यद्वा जयोद्देशेन प्रयुज्यमानं मन्त्रात्मकं वाक्यम् । उत् इति उपसर्गश्रवणात् प्रकृतिक्रियासम्बन्धः । उद-गात् । मामकम् इति । अस्मच्छब्दात् 'तस्येदम्' (पा०सू० ४.३.१२०) इत्यण् । 'तवक-ममकावेकवचने' (पा०सू० ४.३.३) इत्यस्मदो ममकादेशः । सूर्योदयस्य वाग्व्यव-हारस्य च प्रतिदिनं सत्त्वेऽपि विशेषतस्तत्कथनस्य प्रयोजनम् आह— अहम् अभीवर्त-मणिधारकः यथा येन प्रकारेण शत्रुहः शत्रूणां हन्ता असानि भवानि । हन हिंसागत्योः । 'आशिषि हनः' (पा०सू० ३.२.४९) इति डप्रत्ययः । अस्तेर्लोटि 'आडुत्तमस्य पिच्च' (पा०सू० ३.४.९२) इति आडागमः । 'यावद्यथाभ्याम्' (पा०सू० ८.१.३६) इति निघातप्रतिषेधः । मिपि पित्त्वाद् अनुदात्तत्वे 'आगमा अनुदात्ताः' (पा०म० ३.१.३) इति आटोऽपि अनुदात्तत्वे धातुस्वरेण आद्युदात्तत्वम् । यथाहम् एवं भवानि तथा उद-गाद् इति पूर्वेण सम्बन्धः । मणिप्रभावात् अद्यतनसूर्योदयः अधुनाप्रयुज्यमानवचश्च शत्रुहननानुकूलम् अभूद् इत्यर्थः । यत एवम् अतः अहम् असपत्नः शत्रुरहित एव । यदि च सपत्ना भवेयुस्तर्हि सपत्नहा सपत्नानां शत्रूणां हन्ता अस्मि । हन्तेः 'क्विप् च' (पा०सू० ३.२.७६) इति क्विप् ॥

**अन्वय**— असौ सूर्यः उत् अगात् मामकं इदं वचः उत् (अगात्) यथा अहं शत्रुहः असपत्नः सपत्नहा असानि ।

**पदार्थ**— असौ = यह । सूर्यः = सूर्य । उत् अगात् = ऊपर चला गया । मामकम् = मेरा । इदम् = यह । वचः = वाणी, स्तोत्र । उत् = ऊपर (चला गया) । यथा = जिससे । अहम् = मैं । शत्रुहः = शत्रुघ्न, शत्रु को मारने वाला । असपत्नः = शत्रुरहित । सपत्नहा = प्रतिद्वन्द्वियों को मारने वाला । असानि = होऊँ ।

**अनुवाद**— यह सूर्य ऊपर चला गया मेरा यह स्तोत्र ऊपर (चला गया), जिससे मैं शत्रु को मारने वाला, शत्रुरहित तथा प्रतिद्वन्द्वियों को मारने वाला होऊँ ।

**व्याकरण**—

१. अगात् - √गा (गमने), लङ् प्रथमपुरुष, एकवचन ।

२. असानि - √अस् लडर्थक लेट्, उत्तमपुरुष, एकवचन ।

**सपत्नक्षयणो वृषाभिराष्ट्रो विषासहिः ।**

**यथाहमेषां वीराणां विराजानि जनस्य च ॥६॥**

**पदपाठ**— सपत्नऽक्षयणः । वृषा । अभिऽराष्ट्रः । विऽससहिः ॥ यथा । अहम् । एषाम् । वीराणाम् । विऽराजानि । जनस्य । च ॥६॥

**सा० भा०**— उत्तरवाक्ये यथेति श्रवणात् पूर्ववाक्येऽपि अर्थात् तथेत्यध्याह्रियते । सपत्नक्षयणः सपत्नानां शत्रूणां नाशकः । 'क्षि क्षये' । 'नन्दिग्रहिपचादिभ्यः' (पा०सू० ३.१.१३४) इति कर्तरि ल्युप्रत्ययः ।

अत: वृषा प्रजानाम् इष्टफलस्य वर्षक: । वृष सेचने 'कनिन्युवृषि' (पा०उ० १.१५४) इत्यादिना कनिन्प्रत्यय: । अत एव अभिराष्ट्र: स्वराष्ट्रं परराष्ट्रं च अभिगत: अधिपतित्वेन प्राप्त: । 'अत्यादय: कान्ताद्यर्थे द्वितीयया' (पा० १.४.७२.२) इति प्रादिसमास: । अतो विषासहि: विविधं पुन: पुन: परेषां सोढा अभिभविता । वह अभिभवे । अस्माद् यङन्तात् 'सहिवहिचलिपतिभ्यो यङन्तेभ्य: किकिनौ वक्तव्यौ' (पाव० ३.२.१७१.२) इति किप्रत्यय: । अतोलोपयलोपौ । मणि-प्रभावाद् एवंगुणविशिष्ट: तथा भूयासम् । कथम् इत्यत आह— अहम् मणिधारक: यथा येन प्रकारेण एषाम् शत्रुसम्बन्धिनां पूर्वम् आत्मनो बाधकानां वीराणाम् शत्रुभटानां जनस्य स्वकीयस्य परकीयस्य प्राणिजातस्य च विराजानि । राजतिरैश्वर्यकर्मा । नियन्ता भवानि । तथेति पूर्वेण सम्बन्ध: उदीरितगुणोपेत: सन् मणिप्रभावात् शत्रुप्रभृतीनां सर्वेषां शासिता भवामीति भाव: । यद्वा उक्तगुणोपेत: सन् अहं वीराणां जनस्य च यथा विराजानि हे मणे त्वत्प्रभावात् तथा भूयासम् इति शेष: ।।

**अन्वय**— सपत्नक्षयण: वृषा अभिराष्ट्र: विषसहि: (असानि) यथा अहम् एषां वीराणां जनस्य च विराजानि ।

**पदार्थ**— सपत्नक्षयण: = प्रतिद्वन्द्वी को विनष्ट करने वाला, वृषा = कामनाओं को पूर्ण करने वाला । अभिराष्ट्र: = (सामर्थ्य से) राष्ट्र को प्राप्त करने वाला । विष-सहि = पराजित करने वाला । यथा = जिससे । अहम् = मैं । एषां = इन । वीराणाम् = वीरों को । जनस्य च = और लोगों का प्रजाओं का । विराजानि = शासक बनूँ ।

**अनुवाद**— मैं प्रतिद्वन्द्वी को विनष्ट करने वाला, (प्रजा की) कामनाओं को पूर्ण करने वाला, (अपने सामर्थ्य से) राष्ट्र को प्राप्त करने वाला (तथा) शत्रुओं को परा- जित करने वाला (होऊँ); जिससे मैं (शत्रुपक्ष वाले) इन वीरों का और प्रजाओं का शासक बनूँ ।

**व्याकरण**—

१. विराजानि - वि + √राज्, लेट् उत्तमपुरुष एकवचन ।

२. विषासहि – वि + √ससह + इ ।

**अभ्यास**— (१) निम्नलिखित मन्त्रों का हिन्दी में अनुवाद कीजिए ।

(क) अभीवर्तेन मणिना.....................१

(ख) अभिवृत्य सपत्नानभि..................२

(ग) अभि त्वा देव: .......:.................३

(घ) अभीवर्तो अभिभर्तो....................४

(ङ) सपत्नक्षयणो वृषाभिराष्ट्रो................६

(१) निम्नलिखित पर व्याकरणात्मक टिप्पणी लिखिए—

(क) वर्तय

(ख) असिसि

(ग) पराभुवे

(घ) असानि

(ङ) विराजानि

## ६.२. पृथिवीसूक्तम्

**वेद–अथर्ववेद** **अध्याय संख्या–१२** **सूक्त संख्या–१**

**सत्यं बृहदृतमुग्रं दीक्षा तपो**
**ब्रह्म यज्ञः पृथिवीं धारयन्ति ।**
**सा नो भूतस्य भव्यस्य पत्न्यु-**
**रुं लोकं पृथिवी नः कृणोतु ॥१॥**

**पदपाठ**— **सत्यम् । बृहत् । ऋतम् । उग्रम् । दीक्षा । तपः । ब्रह्म । यज्ञः । पृथिवीम् । धारयन्ति ॥ सा । नः । भूतस्य । भव्यस्य । पत्नी । उरुम् । लोकम् । पृथिवी । नः । कृणोतु ॥**

**अन्वय**— सत्यं बृहत् ऋतम् उग्रं दीक्षा तपः यज्ञः पृथिवीं धारयन्ति । भूतस्य भव्यस्य पत्नी सा नः पृथिवी नः लोकम् उरुं करोतु ।

**पदार्थ**— सत्यम् = सत्य । बृहत् = महिमा । ऋतम् = शाश्वत् नियम । उग्रं = उग्रता, शक्ति । दीक्षा = दीक्षा, यज्ञ का व्रत । तपः = तप, तपस्या । ब्रह्म = ब्रह्म । यज्ञः = यज्ञ । पृथिवीम् = पृथिवी को । धारयन्ति = धारण करते हैं । भूतस्य = भूत की, भूतकाल की । भव्यस्य = भविष्य की । पत्नी = पत्नी, रक्षिका । सा = वह । नः = हमारी । पृथिवी = पृथिवी । नः = हमारे । लोकम् = लोक को । उरुम् = विस्तृत, विशाल । करोतु = करे, बना दे ।

**अनुवाद**— सत्य, महिमा (महत्ता), ऋत (शाश्वतनियम), उग्रता (शक्ति), दीक्षा (यज्ञ का व्रत), तपस्या, ब्रह्म (वेद) और यज्ञ पृथिवी को धारण करते हैं । भूतकाल और भविष्यत्काल की रक्षिका वह हमारी पृथिवी हमारे लोक को विस्तृत बना दें ।

**व्याकरण**—

१. ऋतम् – √ऋ + क्त ।
२. धारयन्ति – √धृ + णिच् + लट्, प्रथमपुरुष, बहुवचन ।
३. कृणोतु – √कृ + लोट् + प्रथमपुरुष, एकवचन; 'करोतु' का वैदिक रूप ।

**असंबाधं मध्यतो मानवानां**
**यस्या उद्वतः प्रवतः समं बहु ।**
**नानावीर्या ओषधीर्या बिभर्ति**
**पृथिवी नः प्रथतां राध्यतां नः ॥२॥**

**पदपाठ**— **असम्ऽबाधम् । मध्यतः । मानवानाम् । यस्याः । उत्ऽवतः । प्रऽवतः । समम् । बहु ॥ नानाऽवीर्याः । ओषधीः । या । बिभर्ति । पृथिवी । नः । प्रथताम् । राध्यताम् । नः ॥**

**अन्वय**— यस्याः बहु उद्वतः प्रवतः समं मानवानां मध्यतः असम्बाधं याः नानावीर्याः ओषधीः बिभर्ति, पृथिवी नः प्रथताम्, नः राध्यताम् ।

**पदार्थ**— यस्याः = जिसके (अर्थात् जिस पर) । बहु = बहुत से । उद्वतः = ऊँचे । प्रवतः = नीचे । समम् = समतल । मानवानाम् = मनुष्यों के । मध्यतः = बीच में । असम्बाधम् = निर्बाध । याः = जो । नानावीर्याः = अनेक प्रकार की शक्तियों से युक्त । ओषधीः = ओषधियों को । बिभर्ति = धारण करती है । पृथिवी = पृथिवी । नः = हमारे लिए । प्रथताम् = विस्तृत हो । नः = हमारे लिए । राध्यताम् = समृद्ध बने, समृद्धि से युक्त हो जाय ।

**अनुवाद**— जिसके (अर्थात् जिस पृथ्वी पर) बहुत से ऊँचे, नीचे और समतल (क्षेत्र) मनुष्यों के बीच बाधारहित (अर्थात् बिना किसी बाधा के) स्थित हैं, जो अनेक प्रकार की शक्तियों से युक्त औषधियों को धारण करती हैं, (वह) पृथिवी हमारे लिए विस्तृत हो और हमारे लिए समृद्ध बने।

**व्याकरण**—

१. प्रथताम् – √प्रथ् (विस्तृत होना) + लोट्, प्रथमपुरुष, एकवचन।
२. राध्यताम् – √राध् (समृद्ध होना) + लोट्, प्रथमपुरुष, एकवचन।
३. नानावीर्याः – नाना वीर्याणि यासां ताः (बहुव्रीहि)।
४. बिभर्ति – √भृ + लट्, प्रथमपुरुष, एकवचन।

**यस्यां समुद्र उत सिन्धु रापो**
**यस्यामन्नं कृष्टयः संबभूवुः।**
**यस्यामिदं जिन्वति प्राणदेजत्**
**सा नो भूमिः पूर्वपेये दधातु ॥३॥**

**पदपाठ**— **यस्याम्। समुद्रः। उत। सिन्धुः। आपः। यस्याम्। अन्नम्। कृष्टयः। सम्ऽबभूवुः॥ यस्याम्। इदम्। जिन्वति। प्राणत्। एजत्। सा। नः। भूमिः। पूर्वऽपेये। दधातु॥**

**अन्वय**— यस्याम् समुद्रः सिन्धुः उत आपः, यस्यां अन्नम् कृष्टयः सम्बभूवुः, यस्याम् इदम् प्राणत् एजत् जिन्वति, सा भूमिः नः पूर्वपेये दधातु।

**पदार्थ**— यस्याम् = जिस (पृथिवी) पर। समुद्रः = समुद्र। सिन्धुः = नदियाँ। उत = और। आपः = जल। यस्याम् = जिस पर। अन्नम् = अन्न। कृष्टयः = खेतियाँ, फसलें। सम्बभूवुः = उत्पन्न होती हैं। यस्याम् = जिस पर। इदम् = यह। प्राणात् = साँस लेने वाला। एजत् = गतिशील। जिन्वति = जीवित रहता है, प्रसन्न होता है। सा = वह। भूमिः = पृथ्वी। नः = हमें। पूर्वपेये = प्रथम पेय में। दधातु = धारण करे, स्थापित करे।

**अनुवाद**— जिस (पृथिवी) पर समुद्र, नदियाँ और जल (हैं), जिस पर अन्न और खेतियाँ (फसलें) उत्पन्न होती है; जिस पर यह साँस लेने वाला और गतिशील जगत् जीवित रहता है (अथवा प्रसन्न होता है), वह पृथ्वी हमें प्रथम पेय में (उत्तम पेय वाले प्रदेश में) धारण करे (स्थापित करे)।

**व्याकरण**—

१. सम्बभूवुः – सम् + √भू + लिट्, प्रथमपुरुष, बहुवचन।
२. प्राणत् – प्र + √अन् + शतृ।
३. एजत् – √एज् + शतृ।
४. जिन्वति – √जिन्द + लट्, प्रथमपुरुष, एकवचन।
५. दधातु – √धा + लोट्, प्रथमपुरुष, एकवचन।

**यस्याश्चतस्त्रः प्रदिशः पृथिव्याः**
**यस्यामन्नं कृष्टयः संबभूवुः।**
**या बिभर्ति बहुधा प्राणदेजत्**
**सा नो भूमिर्गोष्वप्यन्ने दधातु ॥४॥**

**पदपाठ**— **यस्याः। चतस्त्रः। प्रऽदिशः। पृथिव्याः। यस्याम्। अन्नम्। कृष्टयः। सम्ऽबभूवुः॥ या। बिभर्ति। बहुऽधा। प्राणत्। एजत्। सा। नः। भूमिः। गोषु। अपि।**

अन्नें । दुधातु ॥

**अन्वय**— यस्याः पृथिव्याः चतस्रः प्रदिशः, यस्याम् अन्नम् कृष्टयः सम्बभूवुः, या प्राणत् एजत् बहुधा बिभर्ति, मा भूमिः नः गोषु अपि अन्नेषु दधातु ।

**पदार्थ**— यस्याः = जिस पृथिवी की । चतस्रः प्रदिशः = चार प्रमुख दिशाएँ । यस्याम् = जिस पर । अन्नम् = अन्न । कृष्टयः = खेतियाँ, फसलें । संबभूवुः = उत्पन्न होती हैं । या = जो । प्राणत् = प्राण धारण करने वाले, साँस लेने वाले । एजत् = गतिशील । बहुधा = अनेक प्रकार से । बिभर्ति = धारण करती है । सा = वह । भूमिः = पृथ्वी । नः = हमें । गोषु = गायों में । अपि = भी । अन्ने = अन्न में । दधातु = धारण करे, स्थापित करे, प्रदान करे ।

**अनुवाद**— जिस पृथिवी की चार प्रमुख दिशाएँ हैं, जिस पर अन्न और खेतियां (फसलें) उत्पन्न होती हैं, जो प्राण धारण करने वाले और गतिशील (जगत्) को अनेक प्रकार से धारण करती है, वह पृथिवी हमें गायों और अन्न में स्थापित करे (अर्थात् हमें गाएँ और अन्न प्रदान करें) ।

**यस्यां पूर्वे पूर्वजुना विचक्रिरे**
**यस्यां देवा असुरानुभ्यवर्तयन् ।**
**गवामश्वानां वयसश्च विष्ठा**
**भगं वर्चः पृथिवी नो दधातु ॥५॥**

**पदपाठ**— यस्याम् । पूर्वे । पूर्वऽजनाः । विचक्रिरे । यस्याम् । देवाः । असुरान । अभिऽअवर्तयन् । गवाम् । अश्वानाम् । वयसः । च । विऽस्था । भगम् । वर्चः । पृथिवी । नः । दुधातु ॥

**अन्वय**— यस्यां पूर्वे पूर्वजनाः विचक्रिरेः यस्यां देवाः असुरान् अभ्यवर्तयन् । पृथिवी गवाम् अश्वानां वयसः च विष्ठा, नः भगं वर्चः दधातु ।

**पदार्थ**— यस्याम् = जिस पर । पूर्वे = प्राचीन । पूर्वजनाः = पूर्वजों ने । विचक्रिरे = विचरण किया था, विशिष्ट कर्म किये थे । यस्याम् = जिस पर । देवाः = देवताओं ने । असुरान् = असुरों को । अभ्यवर्तयन् = आक्रमणपूर्वक भगा दिया । पृथिवी = पृथिवी । गवाम् = गायों का । अश्वानां = अश्वों का । वयसः च = और पक्षियों का । विष्ठा = निवास-स्थान (है) । नः = हमें । भगम् = ऐश्वर्य । वर्चः = तेज । दधातु = धारण करे, प्रदान करे ।

**अनुवाद**— जिस (पृथिवी) पर (हमारे) प्राचीन पूर्वजों ने विशिष्ट कर्म किये, जिस पर देवताओं ने असुरों को आक्रमणपूर्वक भगा दिया, (जो) पृथ्वी गायों, अश्वों और पक्षियों का निवास-स्थान है, (वह पृथिवी) हमें ऐश्वर्य (और) तेज प्रदान करे ।

**व्याकरण**—

१. विचक्रिरे – वि + √कृ (करना) + आत्मनेपद लिट्, प्रथमपुरुष, बहुवचन ।
२. अभ्यवर्तयन् – अभि + √वृ +णिच् + लङ्, प्रथमपुरुष, बहुवचन ।
३. विष्ठा – वि + √स्था + क ।

**विश्वंभरा वसुधानी प्रतिष्ठा**
**हिरण्यवक्षा जगतो निवेशनी ।**
**वैश्वानरं बिभ्रती भूमिरग्नि-**
**मिन्द्रऋषभा द्रविणे नो दधातु ॥६॥**

**पदपाठ— विश्वम्ऽभरा । वसुऽधानी । प्रतिऽस्था । हिरण्यऽवक्षा । जगतः । निवेशनी ॥ वैश्वानरम् । बिभ्रती । भूमिः । अग्निम् । इन्द्रऽऋषभा । द्रविणे । नः । दधातु ॥**

**अन्वय—** विश्वंभरा, वसुधानी, प्रतिष्ठा, हिरण्यवक्षा, जगतः निवेशनी, इन्द्रऋषभा भूमिः वैश्वानरम् अग्नि बिभ्रती नः द्रविणे दधातु ।

**पदार्थ—** विश्वम्भरा = सभी (संसार) का भरण-पोषण करने वाली । वसु-धानी = धन को धारण करने वाली । प्रतिष्ठा = (सभी को) स्थित (खड़े) होने के स्थान वाली । हिरण्यवक्षा = स्वर्ण की वक्षस्थल वाली, (अपने) हृदय में स्वर्ण को धारण करने वाली, स्वर्ण है हृदय में जिसके ऐसी । जगतः = उत्पन्न होने वाले (प्राणियों) को । निवेशनी = आराम (विश्राम) देने वाली । इन्द्रऋषभा = इन्द्र द्वारा रक्षित । भूमिः = पृथिवी । वैश्वानरं = वैश्वानर नामक । अग्निं = अग्नि को । विभ्रती = धारण करती हुई । नः = हम लोगों को । द्रविणे = धन में । दधातु = प्रतिष्ठित (स्थापित करे) ।

**अनुवाद—** सभी (संसार) का भरण-पोषण करने वाली, धन को धारण करने वाली, (सभी के) स्थित (खड़े) होने के स्थान वाली, (अपने) हृदय में सुवर्ण को धारण करने वाली, उत्पन्न होने वाले (प्राणियों) को आराम (विश्राम) देने वाली तथा इन्द्र द्वारा रक्षित पृथिवी वैश्वानर (नामक) अग्नि को धारण करती हुई हम लोगों को धन में प्रतिष्ठित (स्थापित) करे (अर्थात् हम लोगों को धन प्रदान करें) ।

**व्याकरण—**

१. विश्वम्भरा – विश्वं भरतीति या सा विश्वम्भरा ।

२. वसुधानी – वसु + √धा + ल्युट् + ङीप् ।

३. हिरण्यवक्षा – हिरण्यं वक्षे यस्याः सा (बहुव्रीहि) ।

४. निवेशनी – नि + √विश् + ल्युट् + ङीप् ।

५. विभ्रती – वि + भृ + शतृ + ङीप् ।

६. इन्द्रऋषभा – इन्द्रः ऋषभः यस्याः सा (बहुव्रीहि) ।

**यां रक्षन्त्यस्वप्ना विश्वदानीं**
**देवा भूमिं पृथिवीमप्रमादम् ।**
**सा नो मधु प्रियं दुहा-**
**मथो उक्षतु वर्चसा ॥७॥**

**पदपाठ— याम् । रक्षन्ति । अस्वप्नाः । विश्वऽदानीम् । देवाः । भूमिम् । पृथिवीम् । अप्रऽमादम् ॥ सा । नः । मधु । प्रियम् । दुहाम् । अथो इति । उक्षतु । वर्चसा ॥**

**अन्वय—** यां पृथिवी भूमिम् अस्वप्नाः देवाः विश्वदानीम् अप्रमादं रक्षन्ति सा (पृथिवी) नः प्रियं मधु दुहाम् अथो वर्चसा उक्षतु ।

**पदार्थ—** यां = जिस । पृथिवीं = फैली हुई, विस्तृत । भूमिं = भूमि को । अस्वप्नाः = (कभी भी) न सोने वाले । देवाः = देवगण । विश्वदानीं = सर्वदा । अप्रमादं = प्रमाद रहित होकर । रक्षन्ति = रक्षा करते हैं । सा = वह (पृथिवी) । नः = हम लोगों के लिए । प्रियं = प्रिय । मधु = मधु को । दुहाम् = चुवाये । अथो = और । वर्चसा = तेज से । उक्षतु = सिञ्चित करें ।

**अनुवाद—** जिस विस्तृत भूमि की (कभी भी) न सोने वाले देवगण सर्वदा प्रमादरहित होकर रक्षा करते हैं वह (पृथिवी) हम लोगों के लिए प्रिय मधु को चुवाये और तेज से सिञ्चित करें (अर्थात् हमें प्रिय मधु और तेज प्रदान करें)।

**व्याकरण—**



१. रक्षन्ति – √रक्ष् + लट् प्रथमपुरुष, बहुवचन ।

२. विश्वदानीम् – विश्व +√धा + ल्युट् + ङीप् । सायण ने इसे क्रियाविशेषण माना है ।
३. दुहाम् – √दुह् लोट्, आत्मनेपद, प्रथमपुरुष, एकवचन ।
४. उक्षतु – √उक्ष् लोट, प्रथमपुरुष, एकवचन ।

**यार्णवेधि सलिलमग्र आसीत्**
**यां मायाभिरन्वचरन् मनीषिणः ।**
**यस्या हृदयं परमे व्योऽमन्**
**सत्येनावृतममृतं पृथिव्याः ।**
**सा नो भूमिस्त्विषिं बलं**
**राष्ट्रे दधातूत्तमे ॥८॥**

**पदपाठ**— या । अर्णवे । अधि । सलिलम् । अग्रे । आसीत् । याम् । मायाभिः । अनुऽअचरन् । मनीषिणः ॥ यस्याः । हृदयम् । परमे । विऽओमन् । सत्येन । आऽवृतम् । अमृतम् । पृथिव्याः ॥ सा । नः । भूमिः । त्विषिम् । बलम् । राष्ट्रे । दधातु । उत्ऽतमे ॥

**अन्वय**— या अग्रे अर्णवे सलिलम् अधि आसीत् याम् मनीषिणः मायाभिः अन्वचरन्, यस्याः पृथिव्याः सत्येन आवृतम्, अमृतं हृदयं परमे व्योमन् सा भूमिः न बलं त्विषि उत्तमे राष्ट्रे दधातु ।

**पदार्थ**— या = जो । अग्रे = पहले । अर्णवे = समुद्र में । सलिलम् अधि = जल के अन्दर । आसीत् = थी । याम् = जिसे । मनीषिणः = मनीषियों ने । मायाभिः = बुद्धि द्वारा । अन्वचरन् = अन्वेषण किया, प्राप्त किया । यस्याः पृथिव्याः = जिस पृथिवी का । सत्येन आवृतम् = सत्य द्वारा अच्छादित । अमृतम् = अमर । हृदयं = हृदय । परमे व्योमन् = सर्वोच्च आकाश में । सा = वह । भूमिः = पृथिवी । नः = हमें । बलम् = बल । त्विषिम् = तेज । उत्तमे राष्ट्रे = उत्तम राष्ट्र में । दधातु = प्रतिष्ठित (स्थापित) करे ।

**अनुवाद**— जो पृथिवी पहले (प्रारम्भ में) समुद्र में जल के अन्दर थी, जिसे मनीषियों (विद्वानों) ने (अपनी) बुद्धि द्वारा प्राप्त किया, जिस पृथिवी का सत्य द्वारा आच्छादित अमर हृदय सर्वोच्च आकाश में (स्थित है) वह पृथ्वी हमें बल और तेज (प्रदान करे) तथा हमें उत्तम राष्ट्र में प्रतिष्ठित (स्थापित) करे ।

**व्याकरण**—

१. अन्वचरन् – अनु + √चर् + लङ्, प्रथमपुरुष, बहुवचन ।
२. व्योमन् – 'व्योम्नि' का वैदिक रूप, सप्तमी, एकवचन ।

**यस्यामापः परिचराः समानी-**
**रहोरात्रे अप्रमादं क्षरन्ति ।**
**सा नो भूमिर्भूरिधारा पयो-**
**दुहा मथो उक्षतु वर्चसा ॥९॥**

**पदपाठ**— यस्याम् । आपः । परिऽचराः । समानीः । अहोरात्रे इति । अप्रमा-दम् । क्षरन्ति । सा । नः । भूमिः । भूरिऽधारा । पयः । दुहाम् । अथो इति । उक्षतु । वर्चसा ॥

**अन्वय**— यस्यां परिचरा आपः समानी अहोरात्रे अप्रमादम् क्षरन्ति । भूरिधारा सा भूमिः नः पयः दुहाम् अथो वर्चसा उक्षतु ।

**पदार्थ**— यस्याम् = जिस (पृथिवी) पर । परिचराः = चारों ओर विचरण करने वाले । आपः = जल । समानीः = समान रूप से । अहोरात्रे = दिन-रात । अप्रमादम् = प्रमादरहित, निर्बाधरूप से । क्षरन्ति

= बहते हैं, प्रवाहित होते हैं। भूरिधारा = अनेक धाराओं वाली। सा भूमिः = वह पृथिवी। नः = हमें। पयः = दुग्ध, जल। दुहाम् = प्रदान करे। अथो = और। वर्चसा = तेज से। उक्षतु = सम्पृक्त करे, अभिषिञ्चित करे, सींच दे।

**अनुवाद**— जिस पृथिवी पर चारों ओर विचरण करने वाला जल समान रूप से रात-दिन निर्बाधरूप से प्रवाहित होते हैं, अनेक धाराओं वाली वह पृथिवी हमें दुग्ध (जल) प्रदान करे तथा हमें तेज से सम्पृक्त करे (सींच दे)।

**व्याकरण**—

१. दुहाम् – √दुह् + लोट्, प्रथमपुरुष, एकवचन।

२. उक्षतु – √उक्ष् (सींचना) + लोट्, प्रथमपुरुष, एकवचन।

**यामश्विनावभिमातां विष्णुर्यस्यां विचक्रमे।**

**इन्द्रो यां चक्र आत्मनेऽनमित्रां शचीपतिः।**

**सा नो भूमि र्विसृजतां माता पुत्राय मे पयः ॥१०॥**

**पदपाठ**— याम्। अश्विनौ। अभिमाताम्। विष्णुः। यस्याम्। विऽचक्रमे॥ इन्द्रः। याम्। चक्रे। आत्मने। अनमित्राम्। शचीऽपतिः॥ सा। नः। भूमिः। वि। सृजताम्। माता। पुत्राय। मे। पयः॥

**अन्वय**— याम् अश्विनौ अभिमाताम्, यस्यां विष्णुः विचक्रमे, यां शचीपतिः इन्द्र आत्मने अनमित्राम् चक्रे, नः सा पृथिवी माता मे पुत्राय पयः विसृजताम्।

**पदार्थ**— याम् = जिस (पृथिवी) को। अश्विनौ = अश्विनीकुमारों ने। अभि-माताम् = नापा। यस्याम् = जिस पर। विष्णुः = विष्णु ने। विचक्रमे = डग भरा। याम् = जिसे। शचीपतिः = इन्द्राणी के स्वामी। इन्द्रः = इन्द्र ने। आत्मने = अपने (हित के) लिए। अनमित्राम् = शत्रुरहित। चक्रे = कर दिया। नः = हमारी। सा = वह। माता = माता। भूमिः = पृथिवी। मे पुत्राय = मुझ पुत्र के लिए। पयः = दूध। विसृजताम् = छोड़े, प्रदान करे।

**अनुवाद**— जिस (पृथिवी) को अश्विनीकुमारों ने नापा, जिस पर विष्णु ने (अपना) डग भरा (पादन्यास किया), जिसे इन्द्राणी (अथवा शक्ति) के स्वामी इन्द्र ने अपने (हित के) लिए शत्रुरहित कर दिया; वह हमारी पृथिवी माता मुझ पुत्र के लिए दूध प्रदान करे (जैसे माता पुत्र को दूध देती है हमें उसी प्रकार दूध दे।)

**व्याकरण**—

१. अभिमाताम् – अभि + √मा + लङ्, प्रथमपुरुष, द्विवचन।

२. विचक्रमे – वि + √क्रम् + लिट्, प्रथमपुरुष, एकवचन।

३. चक्रे – √कृ + लिट्, प्रथमपुरुष, एकवचन।

४. वि सृजताम् – वि + √सृज् + लोट्, प्रथमपुरुष, एकवचन।

**अभ्यास**—(१) निम्नलिखित मन्त्रों का हिन्दी में अनुवाद कीजिए—

(क) सत्यं बृहदृतमुग्रं..............................१

(ख) यस्या पूर्वे पूर्वजना विचक्रिरे....................५

(ग) विश्वंभरा वसुधानी प्रतिष्ठा.......................६

(घ) यामश्विनावभिमातां विष्णुर्यस्यां विचक्रमे.........१०

(१) निम्नलिखित पर व्याकरणात्मक टिप्पणी लिखिए—

(क) कृणोतु। (ख) राध्यताम्। (ग) एजत्।

(घ) विचक्रिरे। (ङ) व्योमन्।